THE

[C]HOWKHAMBÁ SANSKṚIT SERIES;

A [C]OLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 355

न्यायलीलावती

श्रीवल्लभाचार्य्यविरचिता

श्रीभगीरथठक्कुरकृतविवृतिसनाथेन श्रीवर्धमानोपाध्यायकृत-
प्रकाशेन समुद्भासिता
श्रीशङ्करमिश्ररचितकण्ठाभरणेन च समन्विता ।

काशीहिन्दुविश्वविद्यालयाध्यापकेन
पण्डितश्रीहरिहरशास्त्रिणा
टिप्पण्यादिभिः सम्पादिता ।

NYĀYA LĪLĀVATĪ

BY

VALLABHĀCHĀRYYA

With the commentaries of Vardhamānopādhyāya,
S'aṅkara Miśra and Bhagīratha Ṭhakkura.

Edited by Pt. Harihara S'āstrī,
L[illegible]r, Benares Hindu University.

FASCICULUS I–१

[illegible] & *SOLD BY THE SECRETARY*,
[illegible] SANSKRIT SERIES OFFICE, BENARES.
[illegible] *by Jai Krishna Das Gupta*,
[illegible]*e Vidya Vilas Press, Benares.*

1927.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

The Oriental Book-supplying Agency,
POONA.

श्रीकण्ठाश्लिष्टतनुर्धृतवलिदानवविजृम्भमानश्रीः ।
कौमारजन्महेतुर्गौरी वा शौरिरस्तु भव्याय ॥ १ ॥
लङ्केशपूज्यचरणं मुकुन्दवल्लभमुमासमायुक्तम् ।
शशिखण्डशोभिशिरसं परमेशमनादिमीडेऽहम् ॥ २ ॥
संस्कृतपाठागारे काशीस्थे राजकीये ये ।
विद्यावदातचरिताः प्रभुपदमध्यास्य राजन्ते ॥ ३ ॥
मित्रवरैस्तैः श्रीमद्गोपीनाथकविराज इत्याख्यैः ।
प्रोत्साहितोऽहमासं लीलावत्याः प्रकाशकार्य्येऽस्मिन् ॥ ४ ॥
तैरेव मुद्रणार्थं ग्रन्थागाराददायि टीकाभिः ।
आदर्शमूलपुस्ती कृपया जीर्णापि संशुद्धा ॥ ५ ॥
श्रीराजेश्वरशास्त्री 'तरङ्गिणी'पूरणेन विख्यातः ।
पुस्तकमेकं विवृतेर्भागीरथ्या ददाति स्म ॥ ६ ॥
किन्तु द्वावपि विवृतिग्रन्थौ नितरामशुद्धिभिर्ग्रस्तौ ।
क्वचिदपि लिपिरवलुप्ता पत्राणां कीटदष्टत्वात् ॥ ७ ॥
तदपि परस्परयोगात् कथमपि निर्णीय पाठमायासैः ।
साविधे बुधवृन्दानां प्रकाश्यतेऽयं सुसन्दर्भः ॥ ८ ॥
श्रीमद्वामाचरणन्यायाचार्य्यैः प्रसिद्धविद्वद्भिः ।
सुगृहीतनामधेयैः श्रीशङ्करतर्करत्नैश्च ॥ ९ ॥
पाठविनिर्णयकर्म्मण्यनेकवारं व्यधायि साहाय्यम् ।
आवश्यककार्य्याणि स्वानि जहद्भिर्मयि स्नेहात् ॥ १० ॥
सर्व्वेष्वेषु मनीषिष्वादिमखण्डप्रकाशकालेऽस्मिन् ।
हार्द्दिककृतज्ञताया निवेदनेनोद्वहामि सन्तोषम् ॥ ११ ॥

संस्कृतपुस्तकमालाप्रचारकर्म्मव्रतैकनिष्ठो यः ।
जनयति बुधजनचित्ते नित्यं नवनवमुदास्वादम् ॥ १२ ॥
परिशेषे चास्माकं विलसतु तस्मिन् शुभाशिषां राशिः ।
श्रीलजयकृष्णदासे श्रेष्ठिकवर्य्ये ससोदर्य्ये ॥ १३ ॥
शारीरास्वास्थ्यान्मे सुतरां मनसोऽपि चञ्चलत्वेन ।
त्रुटयोऽनेका जाताः क्षम्यन्तां साधुभिः क्षमासारैः ॥ १४ ॥
यस्य कटाक्षक्षेपाद् भवन्ति लोके समस्तकार्य्याणि ।
कृपया तस्य पुरारेर्निर्विघ्नं पूर्य्यतां ग्रन्थः ॥ १५ ॥
राखालदासनाम्नो गौतममूर्त्तेर्गुरोः पदाम्भोजम् ।
संसेव्य लब्धविद्यो हरिहरशास्त्री निवेदयति ॥ १६ ॥
वसुवेदनागचन्द्र (१८४८) प्रमाणशाके पिनाकभृत्पुर्य्याम् ।
श्रीहिन्दुविश्वविद्यासद्मनि शुक्लाष्टमीदिने पौषे ॥ १७ ॥ *

---

* मुलकृतामपि टीकाप्रणेतृवृन्दस्य कालादिः ।
विदुषां विचारणार्थं पश्चिमखण्डे निरूप्येत ॥

वल्लभाचार्यकृता

न्यायलीलावती

नाथः सृजत्यवति यो जगदेकपुत्रः

शङ्करमिश्रकृत—न्यायलीलावतीकण्ठाभरणम्

पितुर्व्याख्यां कृत्वा मनसि भवनाथस्य कृतिनो
वयं लीलावत्याः प्रथयितुमिहोक्तिं व्यवसिताः ।
तदेतस्मिन् कर्म्मण्यतिगुरुणि गौरीपरिवृढे
दृढा भक्तिः शक्तिं जनयतु यथा स्याम निपुणाः॥

कर्त्तव्यविघ्ननिराचिकीर्षया कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति-नाथ इति । तस्मै पुरुषोत्तमाय नमः । पुरुषोत्तम इति निर्द्धारणषष्ठ्य-

वर्द्धमानोपाध्यायकृत—न्यायलीलावतीप्रकाशः

एकत्र शूलमपरत्र विसप्रसूनमन्यत्र कृत्तिरितरत्र च पीतवासः ।
तत्पातु वर्ष्म शशलक्ष्मकलाकिरीटनिष्पिष्टकैटभदृढोर्मम वाञ्छितानि ।
न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्रभवते नमः ॥ २ ॥

विशिष्टशिष्टाचारानुमितकर्त्तव्यताकं विघ्नविघातकं मङ्गलं नमस्कारं निबध्नाति—नाथ इति । यद्यपि पुरुषाणामुत्तम इत्यत्र न निर्धा-

भगीरथठक्कुरकृता—न्यायलीलावतीप्रकाशविवृतिः ।

सद्योदलितदैत्येन्द्रदलद्वयदिदृक्षया ।
विस्फारितं दिक्षु चक्षुर्नारसिंहं नमाम्यहम् ॥ १ ॥
आसेविता गुणवतापि निगूढभावा लीलावती गुणवती न मुदं तनोति ।
एतत्प्रकाशविवृतिच्छलतस्तदस्या भावं भगीरथसुधीः सरलीकरोति ॥

ग्रन्थारम्भे विघ्नविघाताय कृतं मङ्गलं तत्र शिष्याणां शिष्टाचारविषयत्वरूपलिङ्गज्ञानाय निबध्नाति—एकत्रेति । यत्रेत्यध्याहारः । वर्ष्मेत्येकवचनेनाग्रे द्विवचनेन च हरिहरात्मकशरीरलाभः ।

अप्रामाणिकत्वनिरर्थकत्वशङ्कापरिहाराय प्रमाढ्यमाचरणं फलं च मङ्गलस्य दर्शयति—विशिष्टेति । यद्यपीति । यद्यपि पुरुषोत्तमपदस्य योगार्थानपेक्षरूढिस्वीकारे समासविकल्पोयमसङ्गतः तथापि योगार्थस्याभा-

प्रीत्या ततः परमनिर्वृतिमादधाति ।
तस्मै नमः सहजदीर्घकृपानुबन्ध-
लब्धत्रितत्त्वतनवे पुरुषोत्तमाय ॥ १ ॥

न्यायलीलावतीकण्ठाभरणम्

भावात् समासः जातिगुणक्रियाभिरेकदेशपृथक्करणस्य निर्द्धारण-स्याविवक्षितत्वात् । निर्द्धारणाविवक्षायामेव सप्तमीतत्पुरुषो वा । उत्तमत्वमेव पुरुषत्वेन विशेषणीयमेवेति कर्म्मधारयो वा । यस्मात् क्षरमतीतोऽहमित्यादिगीतापद्यं पञ्चमीतत्पुरुषव्यवस्थापकत्वेनोक्त-मनादेयं तदर्थासमर्पकत्वात् । अनेन हेतुनाऽहं पुरुषोत्तमोस्मी-त्येतावन्मात्रस्य तदर्थत्वात् । यः कार्य्यजातरूपं जगत् सृजति सृष्ट्वा चावति परिपालयति । एकस्मिन् पुत्रे या प्रीतिस्तयाऽवतीति स-म्बन्धः । जगत्पदस्य संसारिमात्रविवक्षायामाह—परमेति । निर्वृतिः सुखं दुःखाभावश्च । तत्राद्यस्य परमत्वं दुःखासम्भिन्नत्वं अन्त्यस्य दुः-खप्रागभावासहवृत्तित्वम् । कृपा निरुपधिपरदुःखप्रहाणेच्छा तस्याः सहजत्वमनागन्तुकत्वमनुत्पन्नत्वमिति यावत् । दीर्घत्वमविनाशित्वं कृपाया अनुबन्धः सृष्टिस्थितिसंहारसहकारिणां पौनःपुन्येन समवधा-नम्, तेन लब्धास्त्रितत्त्वरूपास्तनवो ब्रह्मविष्णुशिवात्मिका येन तस्मै । ग्रन्थकृता स्वपित्रे पुरुषोत्तमनाम्ने नतः कृतेत्यपि वदन्ति ।

न्यायलीलावतीप्रकाशः

रण इति षष्ठीसमासनिषेधः स्यात्, पुरुषश्चाऽसावुत्तमश्चेति कर्म-

न्यायलीलावतीप्रकाशविवृतिः

ने रूढ्यर्थविरोधे वा केवलरूढिस्वीकार इह तु न तथेत्याशयेन नम-स्यताप्रयोजकरूपलाभानुरोधेन च योगपुरस्कारमभ्युपेत्य विकल्पो-ऽयं कृत इति ध्येयम् । पुरुषश्चासाविति । ननु विशेषणविशेष्यभावस्य काम-चारादिदमयुक्तम् । न च विशेष्यतावच्छेदकावच्छिन्नमध्ये व्यावृत्तिबो-धकं विशेषणं न चेह पुरुषत्वं तथा सर्वज्ञत्वादिरूपोत्तमत्वव्यापकत्वादि-ति वाच्यम् । उत्तमपदस्योत्कर्षवत्त्ववाचकत्वात् तस्य च घटादिसा-धारण्येन पुरुषत्वाव्याप्यत्वादन्यथा परस्परव्यभिचाराभावेन कर्म्मधा-रयानुपपत्तेः । विशेषणं विशेष्येनेतिसूत्रेऽन्यतरपदेनैवापरसम्बन्धि-लाभे यदुभयपदोपादानं तेन परस्परव्याभिचार एव कर्म्मधारयसाधु-त्वमितिज्ञापनात् । न चोत्कर्षवत्त्वं न घटादिसाधारणमेकमिति श-

न्यायलीलावतीप्रकाशः

धारये विशेषणत्वादुत्तमपदस्य पूर्वनिपातापत्तिः। पुरुषेषूत्तम इत्यत्र निर्धारणसप्तमीसमासे न निर्धारण इत्यस्य वैयर्थ्यप्रसङ्गः, तत्र षष्ठी

न्यायलीलावतीप्रकाशविवृतिः

च्छसाम्येऽपि नार्थसाम्यमिति वाच्यम्, उत्कर्षशब्दप्रवृत्तिनिमित्तत्वेन नानोत्कर्षाणामनुगमे तद्धर्त्त्वस्याप्यनुगतत्वात्। एतेन कर्मधारयसमास एवात्र परस्परव्यभिचाराभावादसम्भवीत्यत्रैव तात्पर्य्यमिति मिश्रमतमपास्तमिति चेत् मैवम्, विशेषणं हि विधेयं तच्चाज्ञातं न चेहोत्तमत्वेन ज्ञाते पुरुषत्वमज्ञातं किन्तु पुरुषत्वेन ज्ञाते उत्तमत्वमिति तदेव विधेयम्। अतस्तदेव विशेषणम्। न च कस्यचिद्वैपरीत्येनापि ज्ञानमिति न नियम इति वाच्यम्, नमस्यताप्रयोजकत्वेन प्रकृते उत्तमत्वज्ञानस्यापेक्षिततया तज्ज्ञाने सति पुरुषत्वज्ञानस्याकिञ्चित्करत्वेन तदसम्भवात्। यत्तु उत्पलनीलमित्यादिप्रयोगापत्त्या नैवं विशेषणविशेष्यभावे कामचार इति मतं तत्तुच्छम्। तथा विवक्षायां तथाप्रयोग इष्टापत्तेः। अन्यथा चन्द्रमुखमुखचन्द्रपदयोरुभयोः साधुत्वानुपपत्तेः। यत्तु लोकप्रसिद्धमेव यद्विशेषणं तद्वाचकमेव पदं सूत्रे विशेषणपदार्थः, तच्चेहोत्तमत्वमेवेति मतं तन्न लोकपदस्य यावदेकदेशविकल्पग्रासात्। वयं तु उत्तमत्वमत्र सर्व्वज्ञत्वादिकमेव तस्यैव नमस्यताप्रयोजकत्वात्। तच्च पुरुषत्वव्याप्यमेवेति न पुरुषत्वस्य विशेषणता, विशेष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगिन एव विशेषणत्वादिति नात्र कामचारः। न चैवं कर्मधारयाशङ्कैव न, परस्परव्यभिचाराभावादिति वाच्यम्। ज्ञापकेनापि विशेष्यतावच्छेदकव्यभिचारमात्रलब्धेरन्यथा शिंशपा वृक्ष इति प्रयोगानुपपत्तेः। अत एव शिंशपा इत्यादिकमेव प्रत्युदाहरणं वृत्तिकारो दर्शयति स्मेति ब्रूमः। पुरुषेष्विति। तदर्थकतत्पदसाधुत्वनिषेधो हि निषेधसूत्रप्रयोजनम्। तादृशं पदं च यदि विभक्त्यन्तरसमासेनापि निष्पन्नं तदा सूत्रवैयर्थ्यमिति भावः। इदं चापाततो दूषणम्। वस्तुतः स्वरविशेषनिषेधार्थमेव षष्ठीसमासनिषेधकसूत्रोपपत्तेर्न सप्तमीसमासनिषेधे तात्पर्य्यम्, तस्य सप्तमीसमासे हि पूर्व्वपदे प्रकृतस्वर एवावतिष्ठते षष्ठीसमासे तु पूर्व्वपदस्योदात्तत्वं भवतीति भाष्यकारादिस्वरसात्। तदुक्तं त्रिधा हि भिद्यते शब्दोऽर्थतो रूपतः स्वरतश्चेति॥ अतएव कुसुमाञ्जलिप्रकाशे सप्तमीविग्रह एव प्रदर्शितः। यत्तु स्वरभेदस्य वेदविष

न्यायलीलावतीप्रकाशः

सप्तम्योरभेदात्, तथाऽन्यत्र निर्धारणमेव नाऽस्तीति षष्ठीसमास एव नराणां क्षत्रियः शूरतम इत्यादाविव समुदायापेक्षया जातिगुणक्रिया-भिरेकदेशस्याऽपृथक्करणात्। यद्वा पञ्चमीतियोगविभागादत्र समासः। पुरुषेभ्य उत्तमः पुरुषोत्तमः। यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि वेदे लोके च प्रथितः पुरुषोत्तम इति गीतासु भगवद्वचनात्। तस्मै पुरुषोत्तमाय नमः। पुरुषोत्तमत्वमेव नमस्कार्यताप्रयोजकं रूपम्। अन्यदप्याह। यो नाथः प्रभुः, जगत् कार्यजातम्, सृजति जनयति । ततः सृष्टेरनन्तरम् अवति अनिष्टनिवृत्तिशालि

न्यायलीलावतीप्रकाशविवृतिः

यत्वेनास्य निषेधस्य तदविषयत्वमिति मतं तत्तुच्छम् सूत्रस्य लोक-वेदोभयसाधारणतया वेद्रमादायैव सार्थकत्वादिति दिक्। तथापीति। निर्धारणप्रयोजकरूपस्य समस्यमानपदादन्यत उपस्थितौ सत्यामेव समासनिषेधः, भवति च नराणां क्षत्रियः शूरतम इत्यत्र समस्यमानन-रक्षत्रियपदादन्येन शूरपदेन निर्द्धारणप्रयोजकरूपलाभो न चात्र तथा। न चैवं नरशूर इत्यपि स्यात्, वृत्तिकारस्य तज्जातीयमात्रोदाहरणप्र-दर्शनेन तथासूत्रतात्पर्यनिश्चयादिष्टापत्तेः। यद्वेति। पञ्चमी भयेनेतिसूत्रे यद्यपि भयहेतुनैव पञ्चमीसमासविधिस्तथापि प्रयोगानुरोधेन पञ्चमी-त्येतावन्मात्रं व्यवच्छिद्यावधिपञ्चम्यन्तेनापि समासः साधुरित्यर्थः। योगविभागः सूत्रव्यवच्छेदः। न चैवं पञ्चमीसमासेनापि नरशूर इत्यपि स्यादिष्टापत्तेः। मिश्रास्तु उत्तमत्वस्येव शूरत्वस्य सावधित्वाभावादेव नात्र स प्रसंगः। अतएव नरशूर इतिप्रयोगाभावमेव हृदि निधाय पूर्वापरितोषेणायं कल्प इत्याहुः। तच्चिन्त्यम्। शूरस्येवोत्तमस्यापि निरवधित्वात्, उत्तमत्वस्येव शूरत्वस्यापि सावधित्वात्। अन्यथा तस्मादयं शूर इतिप्रयोगानुपपत्तेः। तस्मात्पूर्वापरकल्पयोरुभयत्र नरशूर इतिप्रयोगे इष्टापत्तिरेव शरणम्। यस्मादिति। द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव चेतिगीतादर्शनादक्षरपदस्य पुरुषवाचकत्वात् पुरुषोत्तमत्वलाभः। ननु परमनिर्वृत्याधानमेवावनमपीति पौनरुक्त्य-मत आह—अनिष्टेति। विरोधीत्यर्थः, तेन "सृष्ट्यवनयोः कार्यमात्रे संभवेपी"त्यग्रिमग्रन्थाविरोधः पौनरुक्त्यपरिहारश्च, अनिष्टपदस्य दुःख-परत्वे तदुभयदोषापत्तेः। ननु प्रीतिः सुखं तज्ज्ञानं वा द्वयमपि

द्रव्यं नाकुलमुज्ज्वलो गुणगणः कर्माधिकं श्लाघ्यते
जातिर्विप्लुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः।
सम्बन्धः सहजो गुणादिभिरयं यत्रास्तु सत्प्रीतये
सान्वीक्षानयवेश्मकर्मकुशला श्रीन्यायलीलावती ॥ २ ॥

न्यायलीलावतीकण्ठाभरणम्

ग्रन्थे स्वप्रेयसीनाम योजयन्नेव प्रेक्षावतां प्रवृत्तयेऽभिधेयं श्लाघनीयविशेषणेन विशिंषन्नाह—द्रव्यमिति। न्यायः पञ्चावयववाक्यं स एव लीला तद्वतीति ग्रन्थनाम। प्रेयसीपक्षे न्यायेन उचितमार्गेण या लीला तद्वतीत्यर्थः। स्वामिन्येव विलासं बिभ्रतीत्यर्थः। श्रीपदमुभयत्रोत्कर्षद्योतनाय। सतां मुमुक्षूणां प्रीतये प्रमोदाय ग्रन्थः। सतां विदग्धानां प्रीतये प्रियास्तु। ग्रन्थे द्रव्यपदार्थो नाकुलो नाविस्पष्टः अन्यत्र द्रव्यं भाजनादि अलङ्कारादि वा। नाकुलं न विपर्य्यस्तम्। ग्रन्थपक्षे गुणगणो रूपादिसमूहः उज्ज्वलोऽन्योन्यासङ्कीर्णतया व्युत्पादितः अन्यत्र गुणगणः शीलसौन्दर्य्यादिरूप उज्ज्वलो मनोरमः। ग्रन्थे च कर्म-

न्यायलीलावतीप्रकाशः

करोति एकपुत्रे या प्रीतिः अनुजिघृक्षा, तया परमां दुःखासहवृत्ति निर्वृतिं सुखं दुःखाभावं चादधाति। सृष्ट्यवनयोः कार्यमात्रे सम्भवेऽपि परमनिर्वृतेरसम्भवादत्र जगत् संसारिमात्रम्। सहजा आगन्तुकहेत्वजन्या, अतएव दीर्घा उत्तरकालानवच्छिन्ना या कृपा निरुपधिपरदुःखप्रहाणेच्छा, तया अनुबन्धेन पौनःपुन्येन सृष्टिस्थितिसंहारकरणाय लब्धास्त्रितत्त्वस्वरूपाः ब्रह्मविष्णुशिवात्मिकास्तनवो येन, तस्मै। अथ च ग्रन्थकृता स्वपित्रे पुरुषोत्तमनाम्ने नमस्कारो निबद्धः। तत्र सहजा दीर्घा उर्वी या कृपा तदनुबन्धेन वशीकृतास्त्रितयवतनवो ब्रह्मादयो येनेत्यर्थः। अन्यत् तुल्यमेव ॥

प्रेक्षावतां प्रवृत्त्यङ्गमभिधेयमाह—द्रव्यमिति। न्यायः समस्तरूपोपेतं

न्यायलीलावतीप्रकाशविवृतिः

भगवति नास्तीत्यत आह—प्रीतिरनुजिघृक्षेति। आगन्तुकेति। यद्यपि हेत्वनपेक्षत्वेनैव सम्यक् तथापि पितृपक्षसाधारण्यार्थमागन्तुकत्वं विशेषणं स्वरूपनिर्वचनार्थं वा। तथा च स्वेच्छावशादत्र शरीरपरिग्रहो न तु धर्माधर्माभ्यामिति भावः।

समस्तेति। समस्तरूपोपेतलिङ्गप्रतिपादकमित्यर्थः। प्राप्यते कान्त-

न्यायलीलावतीकण्ठाभरणम्

पदार्थो द्रव्यादिपदार्थादधिकं श्लाघास्पदम् । अन्यत्र कर्म्म गृहादिपरिकर्म्म प्रियचेतोहरणचेष्टा वाऽधिकं यथा स्यादेवं श्लाघ्यते । ग्रन्थे जातिपदार्थो नापोहादिरूपतया विप्लुतिमन्यथासिद्धिमागतो विप्लुतिर्जातीनां परस्परसांकर्य्यं वा । अन्यत्र जातिर्ब्राह्मणत्वमाचारभ्रंशादिना विप्लुतिमागता । ग्रन्थे विशेषपदार्थस्थितिः श्लाघ्या अन्यत्र विशेषस्थितिर्योषिदन्तरापेक्षया वैलक्षण्यं श्लाघ्यम् । ग्रन्थे गुणादिभिर्गुणकर्म्मसामान्यविशेषैः सहजो नित्यः सम्बन्धः समवायोऽस्ति अन्यत्र प्रागुक्तगुणयोगः सहजः प्रयत्नानपनेयः । ग्रन्थेऽन्वीक्षा न्यायशास्त्रं तदेव वेश्म तस्य कर्म्म परिकर्म्म तत्र कुशला तथा चान्वीक्षायामपीयमुपकरिष्यतीत्यर्थः । यद्वा अन्वीक्षात्वं श्रवणानन्तरमननार्थं यो नयो न्यायः स एव वेश्म तत्कर्म्मणि परिकर्म्मणि तद्दूषणनिरासकुशलेत्यर्थः । अन्यत्रान्वीक्षात्वं पुनरवलोकनार्थं नयेन नीत्या यद्वेश्मकर्म्म परिकर्म्म चित्रादिलिखनं तत्र कुशला दक्षेत्यर्थः ।

न्यायलीलावतीप्रकाशः

वाक्यम्, स एवाऽस्य शास्त्रस्य लीला तद्वतीतिग्रन्थनाम । तत्र श्रीपदेनोत्कर्ष उक्तः । सा इयं सतां प्रीतयेऽस्तु । अथ च श्लेषतो ग्रन्थकृतः प्रेयसी लीलावती । नीयते प्राप्यते कान्तचेतोऽनयेति न्यायः तादृशी या लीला तद्वती सा सतः प्रियस्य प्रीतये भवति । यत्र ग्रन्थे । प्रियापक्षे तु एकत्र द्रव्यं नाऽऽकुलम् न सदोषं व्याख्यातम् । अन्यत्र तु धनं न सदोषम् । एकत्र गुणगणो रूपादिसङ्घ उज्ज्वलः प्रमापितः । अन्यत्र गुणानां शीलादीनां गणो दोषासम्भिन्नः । एकत्र कर्म उत्क्षेपणादि अधिकं द्रव्यादिभ्य पृथक् श्लाघ्यते प्रशंसाविषयः । अन्यत्र कर्म गृहव्यापारः । अधिकमिति क्रियाविशेषणम् । एकत्र जातिः पदार्थविशेषः विप्लुतिं साङ्कर्य न गता । अन्यत्र जातिर्ब्राह्मणत्वं सतीत्वाद्विप्लुतिं परपुरुषसम्बन्धात्(१) सदोषत्वं न गता । एकत्र विशेषाणां

न्यायलीलावतीप्रकाशविवृतिः

चेत इति स्वायत्तं क्रियत इत्यर्थः । परपुरुषसंसर्गादिति सदोषत्वे हेतुः । तस्य न्यायस्य शास्त्रं वेश्मेत्यन्वयः । स्त्रीपक्षे अन्वीक्षेत्यादिव्याख्यानं क्वचिन्नास्ति तत्र तस्यान्वीक्षा पश्चाच्चिन्ता स्वामिनि देशान्तरस्थे गृहाचिन्ता नयो नीतिश्च वेश्मकर्म गृहव्यापारः, तत्र कुशलेत्यर्थः ।

(१) संसर्गादिति 'विवृति'कृद्धृतः पाठः ।

न्यायलीलावतीप्रकाशः

अन्त्यानां स्थितिः व्यवस्था श्लाघ्या प्रशंसाविषयः। अन्यत्र विशेषस्योत्कर्षस्य स्थितिस्तादृशी। एकत्र गुणादिभिर्गुण्यादेर्यः सहजः सम्बन्धः समवायो ग्रन्थप्रतिपाद्यत्वेनाऽस्ति। अन्यत्र प्रागुक्तगुणैः सम्बन्धः सहजः अकृत्रिमः स्वाभाविकः। श्रवणादनु पश्चादीक्षणमन्वीक्षा मननहेतुर्न्यायः, स एव नीयतेऽनेनेति व्युत्पत्त्या नयः शास्त्रं तस्य वेश्म, तस्य न्यायाधारत्वात्। तस्य कर्म परिकर्म दूषणनिरासादि, तत्र कुशला दक्षा। नय इत्यत्र श्रिणीभुवोऽनुपसर्ग इति घञि प्राप्ते कृत्यल्युटो बहुलमिति बाहुलकात् एरजित्यच्।

इह पदार्थानां सामान्यतः प्रयोजनसम्बन्धेऽवगते के ते इति विशेषाकाङ्क्षायां द्रव्यगुणेत्यादितद्विशेषाभिधानमेतावन्त एव पदार्था इत्यवधारणपरविभागार्थकम्। सामान्यजिज्ञासायां तद्विशेषवचनस्येतरव्यवच्छेदपरत्वेन व्युत्पत्तिसिद्धत्वात्। तच्च न यद्यपि शब्दविधया विभागे मानम्, युक्तिशास्त्रत्वविरोधात्, मानान्तरात्तत्प्रतिपादने च परीक्षायास्तत्परत्वावश्यकत्वे तत एव न्यूनाधिकसङ्ख्याव्यवच्छेदः सिद्ध इत्येतस्याऽपि तत्र तात्पर्ये मानाभावः सामान्य-

न्यायलीलावतीप्रकाशविवृतिः

ननु षडेवेत्यस्य सूत्रस्य भाष्यस्य वा अभावाद्विकल्पोऽयमाश्रयासिद्ध इत्यत आह—इहेति। सामान्येति। कियन्त इत्याकाङ्क्षायां विशेषाभिधानस्य तदितरविशेषनिषेधप्रत्यायकत्वव्युत्पत्तेरित्यर्थः। कियन्तो घटा इत्याकाङ्क्षायां चत्वार इत्युक्ते पञ्चमाभावप्रतीतेरिति भावः। सामान्यधर्मावच्छिन्नस्य विशेषाकाङ्क्षेति सामान्येत्युक्तम्। तत्र च तात्पर्यविषयावधारणविकल्पोऽयमिति भावः। युक्तीति। शब्दादेव तत्सिद्धौ पदार्थान्तरनिरासकयुक्त्यननुसरणापत्तेः। तथा च तादृशव्युत्पत्तिः प्रकृते असिद्धा तन्मूलीभूतस्य तथाविधवक्तृतात्पर्यानुमानावश्यम्भावस्याग्रे युक्तिसहस्रदर्शनबाधितत्वादिति भावः। मानान्तरात् परीक्षाप्रयोजकमानान्तरात्। परीक्षाया इति। एवं च परीक्षायास्तत्परत्वावश्यकत्वे तन्निर्वाहकप्रमाणादेव व्यवच्छेदप्रत्ययोपपत्तौ विभागवाक्यस्यापि तत्र तात्पर्यं कल्पयित्वा तन्निर्वाहकं च मानान्तरकल्पनमपि गौरवपराहतमित्यवधेयम्। ननु परीक्षया कथं तत्सिद्धिरत आह—सामान्येति। सामान्यलक्षणस्यातिव्याप्तिनिरासेऽधिकसङ्ख्याव्यवच्छेदस्य विशेषलक्षणानाञ्च परस्परसङ्कीर्णत्वव्युदासे न्यूनसङ्ख्याव्यवच्छेदस्य लाभा-

न्यायलीलावतीप्रकाशः

दिलक्षणपरीक्षयाऽधिकसंङ्ख्याव्यवच्छेदस्य विशेषलक्षणपरीक्षया च न्यूनसङ्ख्याव्यवच्छेदस्य लब्धत्वात्, तथापि पदार्थमुद्दिश्य द्रव्यादित्वविधानादुद्देश्यस्य व्याप्यत्वाद्विधेयस्य व्यापकत्वाद्विधेयस्य व्यापकत्वेन समानैव प्रतीतिरिति लोकव्युत्पत्तिसिद्धत्वान्न तत्र तात्पर्यं कल्प्यम्। न च पदार्थत्वं नैकं सामान्यम्, येन विभागः स्यात्, किन्तु पदानामर्थो वाच्यस्तत्त्वम्, वाच्यत्वं च पदानामर्थानां च भेदाद्भिन्नमेवेति वाच्यम्। सर्वत्र पदार्थानुगतमतेरनुगतस्य तस्य सिद्धेः, नाऽयं पदार्थ इत्यभिधान एवैतत्पदार्थत्वापदार्थत्वाभ्यां व्याघातात्। तथाऽपि न तद्भावरूपम्, अभावेऽपि वृत्तेः, नाऽभाव·

न्यायलीलावतीप्रकाशविवृतिः

ति भावः। नात्र तात्पर्यं कल्प्यमपि तु शब्दस्वाभाव्यादेव व्यवच्छेदप्रतीतिरित्याह—तथापीति। औत्सर्गिके हि तात्पर्यमौत्सर्गिकम्, न तु कल्प्यम्, यथा गङ्गापदस्य पूरे। आपवादिके तु कल्प्यम्, यथा तस्यैव तीरे। तदिहोक्तव्युत्पत्त्या शब्दस्वाभाव्येनौत्सर्गिकतया न तत्कल्प्यमिति भावः। एतेन पदार्था द्रव्यादय इति वाक्यं पदार्थत्वद्रव्यत्वायोः सामानाधिकरण्यं बोधयतु पदानां पदार्थसंसर्गमात्रबोधे सामर्थ्यात्, न तु नियतसामानाधिकरण्यं नियतत्वादीनामुपस्थापकाभावादिति परास्तम्। औत्सर्गिकतात्पर्यगम्यनियतसामानाधिकरण्यरूपविशेषलाभात्, न रपतिपदान्नररूपस्य नरपतेरिव। न च तथापि नियतत्वप्रकारिका धीर्न स्यादिति वाच्यम्, तदभावेऽपि क्षतेरभावात्, नरपतिपदान्नरत्वप्रकारकप्रतीतिविरहवत्। न च सामानाधिकरण्यमपि न प्रकारतया भातं किन्तु संसर्गतयेति कथं तस्य विशेषपरत्वम्? यदि चानुपस्थितमपि सामानाधिकरण्यं प्रतीतिप्रकारस्तदा नियतसामानाधिकरण्यमेव तथा स्वीक्रियतामिति वाच्यम्, तात्पर्यविशेषेण पदार्थविशेषभानवत् संसर्गविशेषभानस्याप्यविरोधात्। केचित्तु व्युत्पत्तिबललभ्यं नियतसामानाधिकरण्यं प्रकार एव नरपतिपदजन्यप्रतीतौ नरत्ववत् प्रतीतिबलेन पदानुपस्थितस्यापि प्रकारत्वस्वीकारात्। अस्तु वा तत्र लक्षणा, प्रतीत्यनुरोधात्। अथ वा व्युत्पत्तेस्तात्पर्यमात्रग्राहकत्वं तन्निर्वाहश्चानुमानादेवेत्याहुः। न च द्रव्यत्वादेः प्रत्येकमव्यापकत्वात् कथं व्याप्यव्यापकभावप्रतीतिरिति वाच्यम्, अन्यतमत्वावच्छिन्नव्यापकताया एव व्युत्पत्तिबललभ्यत्वात् तज्ज्ञानं च संसर्गतया प्रकारतया वेति दिक्।

न्यायलीलावतीप्रकाशः

रूपम् , विधित्वेन प्रतीतेः । प्रतियोग्यनुपपत्तेश्चेति न युक्तम्, अ-
स्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरज्ञानरूपसङ्केतात्मकत्वात्तस्य ।
तच्च ज्ञानमनादिनिधनरूपं सर्वगोचरमेकमेव, तत्सम्बन्धश्चाऽर्थैर्वि
षयत्वलक्षणः । अवधारणार्थो व्यवच्छेदः । तत्रैवकारस्य व्यवच्छेद-
मात्रे शक्तिः, विशेषणविशेष्यक्रियावाचकसमभिव्याहारात् अयोगा-
न्ययोगात्यन्तायोगव्यवच्छेदाश्च प्रतीयन्त इति व्युत्पत्तिरिति मत-
मयुक्तम् । उपस्थितपदार्थेष्वेव समभिव्याहारव्युत्पत्तेः संसर्गभेदस्य
प्रतीतेः, न तु ततः पदार्थोपस्थितिरपि, प्रकृते च व्यवच्छेदमात्रात्
प्रतियोगिमात्रलाभेऽप्ययोगान्ययोगात्यन्तायोगरूपप्रतियोगिविशेषा-

न्यायलीलावतीप्रकाशविवृतिः

अस्मादिति । अन्यत्र यद्यपीश्वरेच्छा सङ्केत इत्युक्तं तथापि ज्ञान-
रूपत्वेऽप्यविरोध इत्याशयेनेदमुक्तम्। तत्सम्बन्धश्चेति । यद्यपि स-
म्बन्धिद्वयात्मकमेव विषयत्वमिति विषयाननुगमेनाननुगतमेव
तथापि ज्ञानमात्रमेव सम्बन्धोऽत एवातीतानागतविषयेऽपि ज्ञा-
नवैशिष्ट्यज्ञानम्, ज्ञातोऽयमिति व्यवहारस्तु ज्ञानध्वंसवैशिष्ट्या-
वगाही, यत्र त्वेकतरसत्त्वेऽपि न विशिष्टधीस्तत्रोभयसम्बन्धो
यथाधिकरणध्वंसयोः, अतएव बौद्धाधिकारप्रकाशे ज्ञानमेव स-
म्बन्ध इत्युक्तम् । अस्तु वा सम्बन्धिद्वयात्मकविषयत्वं तथापि नान-
नुगमो विशिष्टधीजननयोग्यतया विषयस्याप्यननुगतत्वादिति दिक् ।

ननु नियमपरत्वेऽपि विभागस्य व्यवच्छेदाविकल्पोऽसङ्गत एवेत्य-
त आह—अवधारणार्थ इति । नियमशरीरान्तर्गत इत्यर्थः । ननु नान्ययो-
गव्यवच्छेदादौ शक्तिर्यन्नैवकारार्थत्वाक्षेपस्तत्र घटेत, किन्तु व्यवच्छे-
दमात्र एव, लाघवादित्यत आह—तत्रेति । प्रतियोगिमात्रेति । आक्षेपतः प्र-
तियोगिमात्रलाभाभ्युपगमेऽपीत्यर्थः । यद्यपि विरोधिव्यवच्छेद एवका-
रार्थः, विरोधित्वं च विरोधित्वेनोपस्थितत्वमुपस्थितिश्च सर्वनामशब्द
इव तटस्थोपलक्षणमिति सम्भवत्येव, तथापि शङ्खः पाण्डर एवेत्यत्र
पाण्डरविरोधी नेतिवत् पार्थ एवेत्यत्रापि विरोधी नेतिप्रत्ययापत्तिः,
शक्तौ तुल्यायां समभिव्याहारादन्वयनियमात् । न हि शक्तौ तुल्यायां
क्वचिद्विरोधप्रतियोगिकव्यवच्छेदः, क्वचिद्विरोध्याश्रयकव्यवच्छेदः
प्रतीयते । शक्तिवैचित्र्ये तु वक्ष्यमाणक्रमादर एवास्तां कुतः

षडेव पदार्था इति नियमव्यवच्छेद्यं प्रतीतं न वा अप्रतीतं

न्यायलीलावतीकण्ठाभरणम्

वैशेषिकशास्त्रे पदार्थविभागमवधारणफलकमाक्षिपति—षडेवेति अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरज्ञानेन तदिच्छया वा विषयविषयीभावलक्षणः सम्बन्धः पदार्थत्वम्, तच्च ज्ञानेच्छयोरेकैकत्वादेकमेव षोढा भिद्यते विभागश्च न्यूनाधिकसङ्ख्याव्यवच्छेदफलकस्तेन षडेव पदार्था इति । अत एवकारस्य व्यवच्छेदमात्रमर्थोऽन्ययोगादिप्रतियोगिलाभस्तु समभिव्याहारविशेषाद् व्युत्पत्तिबलायातः शाब्दे त्वन्वयबोधे व्युत्पत्तिबलादपदार्थोऽपि भासत एवान्यथाऽयोगान्ययोगात्यन्तयोगेषु शक्तित्रयकल्पनागौरवं स्यात् न न्यायश्चानेकार्थत्वमिति न्यायात्। तथा च समभिव्याहारस्तात्पर्य्यमात्रग्राहकः एवकारो नानार्थ इत्ययुक्तम् । तथा च षट्त्वस्य विशेष्यतावच्छेदकत्वं पदार्थत्वस्य विशेषणत्वमुररीकृत्य विशेष्यसङ्गतस्य चान्ययोगव्यवच्छेद-

न्यायलीलावतीप्रकाशः

नुपस्थितेः, किन्तु व्यवच्छेदत्रये शक्तिभेद एव, समभिव्याहारविशेषात्तत्र तात्पर्यविशेष उन्नीयते इति युक्तम् । तत्राऽन्ययोगव्यवच्छेदमवधारणार्थमाक्षिपति—षडेवेति । न च पदार्थमुद्दिश्य षट्त्वविधानात्तद्विशेषणं तत्समभिव्याहृतश्चैवकारोऽयोगव्यवच्छेदार्थ इत्यन्ययोगव्यवच्छेदोऽपदार्थः, पदार्थश्चाऽयोगवच्छेदोऽग्रे वाच्य इति तेनैव गतार्थ इति वाच्यम् । यथा पदार्थे द्रव्यत्वादिवैशिष्ट्यमज्ञातं ज्ञाप्यत इति तस्य विधेयता, तथा द्रव्यादिष्वपि पदार्थत्वव्यवच्छेदस्य प्रतिपाद्यत्वात् व्यवच्छेद्यपदेन चाऽत्र व्यवच्छेदार्हं तदधिकरणमेव विवक्षितं न तु तत्कर्म, तस्य पदार्थत्वरूपस्य प्रमितत्वात् । तथा च द्रव्यादिषड्भिन्नस्याऽप्रमितेः तत्र पदार्थत्वं न निषेध्यम्, अधिकरणज्ञानं विना निषेधाज्ञानादित्यर्थः । निषेधः प्रतिषेधज्ञानमित्यर्थः । सप्तैवेत्येवकारस्य नाऽधिकसङ्ख्याव्यवच्छेदोऽर्थः, अपि तु

न्यायलीलावतीप्रकाशविवृतिः

शब्दान्तरेऽपि सर्वनामसाधारण्यकल्पनेति भावः । किन्त्विति । न चायोगव्यवच्छेदादेः शक्यत्वे पदार्थैकदेशान्वयस्वीकारापत्तिः । चैत्रस्य मातेत्यत्रेव प्रकृतेऽपि तत्स्वीकारात् । न चायोगप्रतियोगिनः पाण्डरत्वस्य पाण्डरपदात् विशेषतयोपस्थितेः कथमयोगान्वय इति वाच्यम्, पाण्डरत्वस्य लक्षणया स्वतन्त्रोपस्थि-

न्यायलीलावतीकण्ठाभरणम्

कत्वं सम्भाव्य दूषयितुं विकल्पयति—प्रतीतं न वेति। अन्ययोगव्यवच्छेदो विशेष्यादन्यत्र विशेषणयोगव्यवच्छेदः यथा पार्थ एव धनुर्द्धर इत्यत्र भीमादौ धनुर्द्धरत्वयोगो व्यवच्छिद्यते। एवं च द्रव्यादिषड्भ्यो विशेष्येभ्योऽन्यद्यदि प्रतीतं तदा तत्र पदार्थत्वव्यवच्छेदोऽनुपपन्नः। पदार्थत्वव्यवच्छेदो हि पदार्थत्वव्यवच्छित्तिप्रत्ययः स चाधिकरणज्ञानतन्त्रः सद्भ्यामभावो निरूप्यत इति सिद्धान्तात्, अधिकरणं च षड्भिन्नमप्रतीतमेवेत्याह—सुप्रतीतं चेति(१)। व्यवच्छेद्यं व्यवच्छेदकर्म्म पदार्थान्तरमेवावधारणव्यवच्छेद्यं तद्व्यवच्छेदश्च पदार्थव्यवच्छेदमुखेनेत्यन्यदेतत्। तथा च व्यवच्छेद्यं व्यवच्छेदाधिकरणमित्यपव्याख्यानम्। तथा च षडेव पदार्था इत्यवधारणेन व्यवच्छेद्यः सप्तमपदार्थः स चेन्न प्रतीतस्तदा तत्र पदार्थत्वव्यवच्छेदो न शक्य इत्यर्थः। यद्वा अन्ययोगव्यवच्छेद इत्यत्रान्यस्य विशेषणेन सह योगस्य सम्बन्धस्य व्यवच्छेदः स च पदार्थ एवेत्यत्रान्यो भीमादिः प्रसिद्धस्तस्य विशेषणयोगो व्यवच्छिद्यत इति युक्तं प्रकृते तु न तथेत्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

तेः। समभिव्याहार इति। न च तात्पर्यस्य पुरुषेच्छाधीनतया विशेषणसङ्गतैवकारादपि क्वचिदन्ययोगव्यवच्छेदप्रतीत्यापत्तिरिति वाच्यम्, अनादितात्पर्यस्यैवात्र नियामकत्वात्। यदि प्रोत्तरस्थात्वेनेव विशेषणसङ्गतैवकारत्वादिना शक्तिस्तदा शङ्कैव नोदेतीति(२) ध्येयम्। मिश्रास्तु व्यवच्छेदमात्रे शक्तिर्लाघवात् अयोगादिलाभस्तु पाण्डरादिपदालक्षणया स्वतन्त्रोपस्थितये प्रतियोगित्वोपस्थितये च लक्षणायास्त्वयापि तत्र स्वीकारात। अत एव पदार्थैकदेशान्वयप्रसङ्गोऽपि न, अत एवौत्सर्गिको विशेष्यान्वयोऽपि समर्थितो भवति। एवं च पाचकादिपदे रूढिस्वीकारोऽपि सङ्गच्छते। अन्यथा कृतियोग्यताशक्तप्रत्ययपदार्थैकदेशकृत्यन्वयस्य तत्र(३) वाधात। अतएव च सन्ध्याकालेऽकरणे विशेष्येऽन्वेति, न तु करणे विशेषण इत्यपि सङ्गच्छते। अन्यथा तत्रापि विशेषणान्वयाविरोधात्। न च स एवायमित्यत्र सर्वनाम्नि लक्षणाया अस्वीकारादयं कल्पो नोचित(४) इति वाच्यम्, तत्र भेदानुभवेन(५) त्वयाप्येवकारस्य शक्त्यन्तरस्वीकारादिति वदन्ति। अत्र केचित्। पाण्डरपदस्यायोगलक्षणायां पाण्डरत्वमेव न प्रतीयेत

(१) अप्रतीतं चेदिति साधुः पाठः।
(२) शङ्कापि नेति पाठान्तरम्।
(३) तत्रावाधादिति पाठान्तरम्।
(४) न सङ्गच्छते इति पाठान्तरम्।
(५) अत्राभेदानुभवेनेत्यन्यः पाठः।

चेत् कथं निषेधः । प्रतीतं चेत्सप्तैव । पदार्थेषु सप्तत्वं नास्तीति चेन्न । आन्तर्गणिकभेदेन सत्त्वात् । षड्लक्षणयोगितया नास्तीति चेन्न । षड्लक्षणयोगिष्वेव सप्तत्वप्रसक्तेरप्रकृतत्वेन प्रतिषेधे अ-

---

न्यायलीलावतीकण्ठाभरणम्

ननु प्रतीतेऽन्यत्र विशेषणयोगो व्यवच्छिद्यत इत्यत आह—प्रतीतं चेदिति । सप्तैवेति न षडेवेत्यर्थः । ननु षडेवेति सप्तमः पदार्थो निषिध्यते तच्च पदार्थेष्वप्रतीतेषु सप्तत्वस्य प्रतीतस्य निषेधनापि निर्वहतीत्याशङ्क्यते—पदार्थेष्विति । घटादिषु पदार्थेषु सप्तत्वस्य सत्त्वात् तन्निषेधानुपपत्तिरिति परिहरति—नेति । अन्तर्गणो विशेषगणस्तत्र भवो भेद आन्तर्गणिकः । ननु प्रसिद्धा द्रव्यादयः षट् पदार्थाः सप्त न भवन्तीति ब्रूम इति शङ्कते—षड्लक्षणेति । य एव पदार्थाः षट् त एव सप्त इति केन प्रसञ्जितं येन निषेधोऽयमर्थवान् भवेत् तथा च तत्र सप्तत्वनिषेधो ममाप्यभ्युपगत इति परिहरति—षड्लक्षणयोगिष्वेवेति ।

न्यायलीलावतीप्रकाशः

षट्त्वमात्रव्यवच्छेदः । ननु पदार्थेषु सप्तत्वस्याऽयं निषेधो न तु सप्तमस्य, सप्तत्वं च प्रसिद्धमेवेत्याह—पदार्थेष्विति । उभयसिद्धपदार्थमात्रेऽयं निषेधः, द्रव्यत्वाद्येकैकलक्षणयोगित्वेनैकीकृतेषु षट्सु वा ? तत्र नाऽऽद्य इत्याह—आन्तर्गणिकेति । घटादिषु सप्तत्वादिव्यवहारदर्शनादित्यर्थः । अन्त्यं शङ्कते—षड्लक्षणेति । तथाविधापेक्षाबुद्धिविषयत्वमत्र सप्तत्वम्, सङ्ख्यायास्तत्राऽभावनियमात् । यदि पराभ्युपगमेन तत्रैव सप्तत्वप्रसक्तिः कृता स्यात् तदा तद्व्यवच्छेदः सप्रयोजनः स्यात्, न चैवमिति परिहरति—षड्लक्षणयोगिष्वेवेति । ननु द्रव्यत्वाद्युपाधिषट्के

न्यायलीलावतीप्रकाशविवृतिः

युगपद्वृत्तिद्वयविरोधादिति वदन्ति । तत्तुच्छम्, विशिष्टलक्षणयैव तस्याप्युपस्थितेः । केचित्तु तथा सति पाण्डरत्वायोगव्यवच्छेद एव पाण्डरादिपदस्य लक्षणास्तु तात्पर्यमात्रमेवकार इति वदन्ति, तदपि न(१) एवं सति निपातमात्र एव तादृशपर्यनुयोगापत्तेः । एवमपि नानाशक्तेरस्वीकाराच्चेति । एतदतिरिक्त इत्यस्याधिकरणपरत्वे नियमव्यवच्छेद्यमित्यादिना सङ्कर इत्यत उपाधिपरतया तद्व्याचष्टे—ननु द्रव्यत्वेति

---

(१) सम्यगित्यधिकं द्वितीयपुस्तके ।

विवादात् । एतदतिरिक्ते नास्तीति चेन्न । प्रतीत्यप्रतीतिभ्यां व्याघातात् । भावानां षड्लक्षणपरित्यागो नास्तीति नियमार्थ इति चेन्न । षण्णां तत्त्वादेव । सर्वेषामिति चेन्न । षड्लक्षणयोग्याभि-

न्यायलीलावतीकण्ठाभरणम्

षड्लक्षणावच्छेदेन षण्णामेकत्वानामाश्रयेष्वेवेत्यर्थः। एतदतिरिक्त इति । षड्लक्षणयोग्यतिरिक्ते सप्तत्वं नास्तीत्यर्थः । तदतिरिक्तप्रतीतिश्चेत्तदा सप्तत्वप्रतीतिरस्त्येवाप्रतीतौ निषेधानुपपत्तिरित्याह—प्रतीतीति । द्रव्यत्वादीनां षण्णां लक्षणानां विरोधी यः पदार्थत्वव्याप्य उपाधिस्तदवच्छेदेन सप्तत्वं निषिध्यत इति शङ्कार्थ इत्येके । षण्णां लक्षणानां विशेषणत्वं पदार्थत्वस्य च विशेष्यत्वं विशेषणसमभिव्याहृतस्य एवकारस्य विशेष्ये विशेषणायोगव्यवच्छेदोऽर्थः । तथा च पदार्थानां षड्लक्षणपरित्यागो व्यवच्छेद्यस्तेन पदार्थाः षड्लक्षणाक्रान्ता एवेति नियमात् सप्तमः पदार्थोऽर्थाद्व्यवच्छिन्नो भवतीति शङ्कते—भावानामिति । प्रसिद्धाः षड् भावाः षड्लक्षणपरित्यागिनो न भवन्त्येवेति सिद्धसाधनमाह—षण्णामिति । तत्त्वादेव षड्लक्षणयोगव्यवच्छिन्न-

न्यायलीलावतीप्रकाशः

द्रव्यत्वादिविरोधिपदार्थत्वव्याप्योपाधिमन्तर्भाव्य सप्तत्वं न वर्त्तते इति नियमार्थ इत्याह—एतदतिरिक्त इति । तथाविधोपाधेरप्रतीतौ न तमन्तर्भाव्य सप्तत्वनिषेधः, प्रतीतौ वा तन्निषेधोऽशक्य इत्याह—प्रतीतीति। ननु पदार्थत्वमुद्दिश्य षट्त्वविधानात् षडेवेति विशेषणसङ्गत एवकारः षड्लक्षणायोगनिषेधं ब्रूते इति नोक्तदोष इत्याह—भावानामिति । अभावबुद्धौ प्रतियोगिज्ञानवदनुयोगिज्ञानमपि हेतुः, तत्र यदि षडेवाऽनुयोगिनस्तदा सिद्धसाधनमित्याह—षण्णामिति । नन्वभावव्यक्तयः षड्लक्षणायोगव्यवच्छेदव्याप्या इत्यर्थात् सप्तमपदार्थाभावः स्यादि-

न्यायलीलावतीप्रकाशविवृतिः

द्रव्यत्वादीति । द्रव्यत्वादिषट्काभावसमूहसमानाधिकरण(१)भावत्वसमानाधिकरणोपाधिमित्यर्थः । तेन प्रत्येकविरुद्धगुणत्वव्याप्यरूपत्वाद्युपाधिमादाय न बाधः न वा अभावत्वादिकमादाय बाधो न वा व्याप्यत्वविवेचने व्यर्थत्वमिति भावः । व्यवच्छेदव्याप्या इति व्यवच्छेदमात्राधिकरणानि न तु तद्विरुद्धाश्रया इति यावदित्यर्थः । व्याप्य-

(१) 'भावत्वसमानाधिकरणे'ति नास्ति द्वितीयादर्शपुस्तके ।

प्रायेण सर्वशब्दप्रयोगे तत्त्वादेव। अतिरिक्ताभिप्रायेण च व्याघातात्। सामान्याकारे असिद्धत्वात्। अपि च प्रत्येकलक्षणाभि-

न्यायलीलावतीकण्ठाभरणम्

त्वादेव। ननु षडेव भावाः षड्लक्षणाक्रान्ता इति न ब्रुमः, येन सिद्धसाधनं स्यादपि तु सर्वे भावाः षड्लक्षणाक्रान्ता इति, तथा च न सिद्धसाधनं न वा सप्तमपदार्थप्रसक्तिरित्याह—सर्वेषामिति। सर्वशब्दस्य बुद्धिस्थाशेषवाचकतया यदि षडेव बुद्धिस्थास्तदा सिद्धसाधनमेव षडतिरिक्तं यदि बुद्धिस्थं तदा सप्तमपदार्थस्यावश्यकत्वेन षड्लक्षणायोगव्यवच्छेदो व्याहत एवेत्याह—षड्लक्षणेति। ननु षट्त्वं सर्वत्वं वा न विशेषणतावच्छेदकं अपि तु सामान्यतो भावत्वमात्रं तथा च भावत्वावच्छिन्नं षड्लक्षणाक्रान्तमेवेत्युक्ते क्व सिद्धसाधनं क्व वा सप्तमपदार्थप्रसङ्ग इत्याशङ्क्याह—सामान्येति। भावत्वेन प्रकारेण यदि षडेव विषयीक्रियन्ते तदा सिद्धसाधनम्। षडतिरिक्तविषयतायां च सप्तमप्रसक्तिरेवेत्यर्थः। किं च भावेषु षण्णां लक्षणानां

न्यायलीलावतीप्रकाशः

त्याह—सर्वेषामिति। सर्वशब्दस्य विधेयव्याप्यत्ववाचित्वादिति भावः। व्याप्यत्वं तदवच्छेदकभावत्वसम्बन्धप्रतीत्यैव प्रतीयत इति यत्र स प्रतीतस्तत्रैव प्रत्येतव्यम्, स च षट्त्वेन प्रतीत इति न सिद्धसाधनमेवेत्याह—षड्लक्षणेति। अथ षड्भिन्नभावेऽपि स प्रतीतस्तदा तद्व्यवच्छेदोऽशक्य इत्याह—अतिरिक्तेति। ननु चाऽविवक्षितविशेषं भावत्वाक्रान्ते षड्लक्षणपरित्यागनिषेधो विवक्षित इति नोक्तदोष इत्यत आह—सामान्याकार इति। सामान्यज्ञानस्य विशेषभाननियतत्वेन यदि द्रव्यादिष्वेव विशेषेषु तन्निषेधः, तदा सिद्धसाधनम्, अथाऽतिरिक्ते

न्यायलीलावतीप्रकाशविवृतिः

शब्दस्य सम्बन्धार्थतायां व्यक्तिष्वसम्भवः तद्वृत्तिधर्मपरत्वे च व्यक्तिपदस्य तदवच्छेदकभावत्वेत्याद्यग्रिमग्रन्थविरोधः। ननु व्याप्यत्वं मूले न श्रूयत इत्यत आह—सर्वशब्दस्येति। विधेयविरुद्धानधिकरणत्ववाचित्वादित्यर्थः। 'सामान्याकारे सिद्धत्वा'दिति शङ्कां(१) नञनन्तर्भावान्तर्भावाभ्यां सिद्धसाधनाधिकरणाप्रतीतिपरतया व्याचष्टे—सामान्यज्ञानस्येत्यादि। नञन्तर्भावेणेत्यस्य इत्यर्थ इत्यत्र हेतुता समुदितत्व-

(१) फक्किकामिति पाठान्तरम्।

प्रायेण परित्यागस्य सत्त्वात् । समुदितानामप्येकत्रासत्त्वेऽयोग-

न्यायलीलावतीकण्ठाभरणम्

यदि प्रत्येकमयोगो व्यवच्छेद्यस्तदा द्रव्ये गुणलक्षणायोगस्य सत्त्वेन व्यवच्छेदो न शक्यः सत्त्वे वा सर्वेषां सर्वलक्षणसत्त्वं स्यादित्याह— अपि चेति । समुदितानां द्रव्यादिलक्षणानामयोगो यदि व्यवच्छेद्यस्तदा एकत्र समुदितलक्षणसत्त्वं स्यात् तदा सर्वं सर्वजातीयं भवेदिति समुदितायोगनिषेधानुपपत्तिरित्याह—समुदितानामिति । समुदिततावल्लक्षणाप्रतीत्यैव तदयोगव्यवच्छेदानुपपत्तिरित्यर्थः । न च गुणादिलक्षणसहितं द्रव्यलक्षणं द्रव्ये नास्तीति व्यासज्यवृत्तिप्रतियोगिकाभावरूप एव समुदितनिषेध इति वाच्यम्, तादृशाभावानभ्युपगमात्, अभ्युपगमे वा तस्य केवलान्वयित्वेन निषेधानुपपत्तेरित्यर्थः। ननु न प्रत्येकलक्षणायोगः समुदितायोगो वा व्यवच्छेद्यः किन्तु अन्यतमलक्षणपर्य्यवसाने सप्तमपदार्थनिषेधः स्यादित्याशङ्क्याह—

न्यायलीलावतीप्रकाशः

विशेषे तदा नञन्तर्भावेनाऽप्रसिद्धत्वादधिकरणस्य न निषेधनिरूपणमित्यर्थः । किञ्चाऽधिकरणवत्प्रतियोग्यप्ययोगव्यवच्छेदस्य न विचारसह इत्याह—अपि चेति । प्रत्येकं षड्लक्षणपरित्यागनिषेधेऽभ्युपगम्यमाने सर्वेषां सर्वजातीयत्वं स्यादिति द्रव्यत्वपरित्यागस्य गुणादौ सत्त्वाद् द्रव्यत्वाद्येकैकपरित्यागो निषेद्धुमशक्य इत्यर्थः । समुदितानामिति । द्रव्यादिलक्षणानामिति शेषः । समुदितत्वस्यैकत्वसत्त्वादेकस्य प्रतियोगिनोऽप्रसिद्ध्या तन्निषेद्धुं न शक्यत इत्यर्थः । न च व्यासज्यप्रतियोगिकतैव समुदितत्वम् । व्यासज्यप्रतियोगिकस्याभावस्या-

न्यायलीलावतीप्रकाशविवृतिः

स्येति षड्लक्षणायोगानां समुदाय ऐकाधिकरण्यं तच्च न प्रसिद्धमित्यर्थः। एवं च समुदितानामयोगानामिति मूलार्थ इति भावः। ननु नैकाधिकरण्यमयोगानां समुदितत्वम् अपि तु मिलितषड्लक्षणप्रतियोगिकत्वं लक्षणे च मेलनं व्यासज्यवृत्तिर्द्धर्म इत्यत आह—न च व्यासज्येति । केचित्तु लक्षणानामेवैकाधिकरण्यं समुदितत्वमिति पूर्वफक्किकार्थमभिप्रेत्य व्यासज्यप्रतियोगिकतैवेत्यत्र स्वार्थिकः प्रत्ययः समुदितनिषेधत्वमेव वा समुदितत्वमित्यर्थ इत्याहुः । अतिरिक्तस्येति स्वरूपनिर्वचनम् । ननु घटपटौ न स्त इत्यत्र प्रतीतिबलादेव सोऽङ्गीकर्त्तव्य

निषेधानुपपत्तेः । अन्यतमाभिधाने तु सर्वेषामेव विपक्षेऽभावदर्शनेन व्याघातात् ।

अभावश्च वक्तव्यो निःश्रेयसोपयोगित्वात् भावप्रपञ्चवत् ।

न्यायलीलावतीकण्ठाभरणम्

अन्यतमेति । अन्यतमत्वं षट्सु यद्येकमनुगतं तदा द्रव्यलक्षणायोग एव गुणेष्विति तद्व्यवच्छेदोऽशक्यः । यदि च षड्लक्षणान्यान्यत्वं तदा षड्लक्षणापेक्षया यावदन्यल्लक्षणं तत् सप्तमपदार्थे वाच्यं तथा च सर्वेषां षण्णामपि लक्षणानां विपक्षे सप्तमपदार्थेऽभावदर्शनेनायोगदर्शनेन तद्व्यवच्छेदो व्याहत इत्यर्थः ।

पदार्थविभागे न्यूनत्वं दोषमाह—अभावश्चेति । ननु निःश्रेयसोप-

न्यायलीलावतीप्रकाशः

तिरिक्तस्यानभ्युपगमात्, अभ्युपगमे वा तस्य केवलान्वयित्वान्निषेधोऽशक्य इति भावः । ननु नैकैकस्य समुदितस्य वा द्रव्यादिलक्षणस्यायोगनिषेधः किं त्वन्यतमस्येति नोक्तदोष इत्यत आह—अन्यतमेति । द्रव्यत्वादीनां गुणादौ परित्यागस्य प्रामाणिकत्वात्तन्निषेधव्याघातः । अथान्यतमलक्षणासहवृत्तितत्परित्यागनिषेधस्तदा सर्वेषां लक्षणानां विपक्षे सप्तमपदार्थेऽभावदर्शनेनान्यतमलक्षणासहवृत्तिपरित्यागदर्शनेन व्याघातः तज्ज्ञानं विना तत्र तस्याज्ञानात् ज्ञाने वा तत्सिद्ध्यापत्तेरित्यर्थः । अन्यतमत्वं यद्येकव्युदासेनान्यदभिधीयते तदा तस्यायोग एकस्मिन्न वर्त्तत इति तन्निषेधोऽशक्यः । विपक्षत्वं चैकदेशापेक्षया बोद्धव्यमित्यर्थ इत्यन्ये । किं चाभावस्य षड्भिन्नस्य पदार्थस्य प्रामाणिकत्वाद्विभागव्याघात इत्याह—अभावश्चेति । वक्तव्यः

न्यायलीलावतीप्रकाशविवृतिः

इत्यत आह—अभ्युपगमे वेति । तस्येति । द्रव्यत्वादिषट्कप्रतियोगिकतथाविधाभावस्येत्यर्थः । कथं व्याघात इत्यत आह—तज्ज्ञानमिति । सप्तमपदार्थज्ञानं विनेत्यर्थः । तथा च कारणं विनापि कार्यमिति व्याघात इति भावः । तद्भिया तज्ज्ञानाभ्युपगमे तत्सिद्ध्यापत्तौ विभागव्याघात इत्याह—ज्ञाने वेति । षडेव पदार्था इति वदतोऽभावोस्त्येवेत्यभिमानेन सर्वमिदं दूषणं तदभिमानखण्डनं च सिद्धान्ते करिष्यत्येवेति रहस्यम् । अभावाभ्युपगमे त्वाह—किं चेति । गुणादेरित्युपलक्षणं अभा-

कारणाभावेन कार्याभावस्य सर्वमतसिद्धत्वादुपयोगित्वसिद्धेः। न चेदेवं भावोऽपि कश्चिन्नाभिधातव्य इति पञ्चैवाभिधातव्याः पारतन्त्र्यादिति चेन्न, समवायादेरप्यनभिधानप्रसङ्गात्।

न्यायलीलावतीकण्ठाभरणम्

योगिपदार्थविभागोऽयं तथा चाभावस्य तदनुपयोगिनोऽनभिधानं न दोषायेत्यत आह—निःश्रेयसोपयोगित्वादिति। ननु अभावो नोक्तो निःश्रेयसाऽनुपयोगित्वादिति हेतुरेवासिद्ध इत्यत आह—कारणेति। दुःखकारणशरीराद्यभावेन दुःखाभावः स एव निःश्रेयसमिति कथं नाभावस्य निःश्रेयसोपयोगित्वमित्यर्थः। किं च मोक्षोऽपि अभावरूप एवेत्यभावविभाग आवश्यक इति भावः। निःश्रेयसहेतुत्वेऽपि अभावस्यानभिधाने दोषमाह—न चेदिति। पञ्चैवेति। षड्भिधाननियममात्रं व्यवच्छिनत्ति। ननु स्वतन्त्रपदार्थमात्रविभागोऽयं परतन्त्राभावानभिधानेऽपि न दुष्ट एवेत्याह—पारतन्त्र्यादिति। पारतन्त्र्यमितरनिरूपणाधीननिरूपणत्वं यदि तदा समवायोऽपि न विभक्तव्यः। अथ विशेषणत्वं तदा न कोऽपि पदार्थो विभज्यः सर्वेषां यथायथं विशेषणत्वादित्याह—समवायेति। समवेतत्वमिह विकल्पनीयमपक्षवृत्तित्वात्।

न्यायलीलावतीप्रकाशः

पृथक् विभक्तव्यः। ननु निःश्रेयसोपयोगिपदार्थविभागोऽत्रेति न तदनुपयोग्यभावो विभक्त इत्यत आह—निःश्रेयसेति। मिथ्याज्ञानाद्यभावानां मोक्षोपायतया तत्रोपयोगादित्यर्थः। वस्तुतो मोक्षस्याभावरूपतया सोऽभ्यर्हित इति विभागार्ह इति भावः। पञ्चैवेति। एवकारः षड्भिधाननिषेधपरः। ननु चापरतन्त्रः पदार्थोऽत्र विभक्तव्यः, अभावश्च न तथेत्याह—पारतन्त्र्यादितीति। पारतन्त्र्यं न विशेषणत्वं सर्वानभिधानापत्तेः, नापि समवेतत्वं गुणादेरप्यनभिधानप्रसङ्गात्, नापि परज्ञानाधीनज्ञानविषयत्वं संयोगसमवायादेरनभिधानापत्तेरित्याह—समवायादेरिति। नन्वत्र पदार्थो द्विविधो भावोऽभावश्चेति पदार्थविभाग आर्थः शाब्दश्च, भावरूपाः द्रव्यादयः षडिति विशेषविभाग इति नोक्तदोष

न्यायलीलावतीप्रकाशविवृतिः

वाभिधानप्रसङ्गाच्चेत्यपि द्रष्टव्यम्। ननु नञर्थोल्लेखोऽस्त्येव नञर्थघ-

तमस्तु(१) भावान्तरं(२) निषेधत्वेनानवभासमानत्वात् । बाधकाभावेन(३) चारोपानुपपत्तेः । आलोकाभावे(४) चाक्षुष-

---

न्यायलीलावतीकण्ठाभरणम्

ननु नायं पदार्थमात्रविभागो येनाभावानभिधानं दोषः स्यात्, किन्तु भावमात्रविभाग इत्यत आह—तमश्चेति । मेयान्तरं भावान्तरम् । नन्वालोकाभाव एव तम इत्यत आह—निषेधत्वेनेति । नञर्थोपरागेणेत्यर्थः । नन्वारोपितं पृथिवीरूपमेव तमो, न मेयान्तरम्, अत आह—बाधकाभाव इति । ननु तमसो भावान्तरत्वे आलोकाभावदशायां चाक्षुषत्वमेव बाधकम्, न हि भावस्तदानीं चक्षुषा गृह्यत इत्यत आह—आलोके चेति । विलक्षणमेव भावान्तरं तमो यद्ग्रहे चक्षुरालोकं नापेक्षते

न्यायलीलावतीप्रकाशः

इत्यत आह—तमश्चेति । ननु तमो न भावः किन्त्वालोकाभावः, तमःकाले तस्यावश्योपेयत्वादित्यत आह—निषेधत्वनेति । नञर्थोल्लेखेनेत्यर्थः । वस्तुतो नीलरूपचलनाद्याश्रयतया तस्यानुभवाद् भावत्वमेव तस्योचितमिति भावः । ननु नीलादि तत्रालोकाभाव एवारोप्यत इत्यत आह—बाधकाभावे चेति । आलोकाभाव इति । तमो यदि रूपवत्स्यात् आलोकानपेक्षचक्षुर्ग्राह्यं न स्यात् घटवत्, नीलरूपवद्वा, भावग्रहे आलो-

न्यायलीलावतीप्रकाशविवृतिः

टित एव प्रलयपदादिवत् तमःपदादिशक्तेरित्यरुचेराह—वस्तुत इति । तमःप्रतीतिगोचरनीलरूप एव यथाश्रुते व्यभिचारात्, अन्यथा तर्कमाह—तमो यदीति । आलोकसापेक्षचक्षुर्ग्राह्यत्वे परमाण्वादावनैकान्त इत्यतो नञ्द्वयगर्भमापाद्यं मानुषेति चक्षुर्विशेषणमतो न विडालादिनयनग्राह्यघटादिना व्यभिचारः । नीलेति । न च नीलरूपवदिति दृष्टान्तानुपपत्तिः आपादकस्य तत्राभावादिति वाच्यम्, तमस्यारोपितस्य नीलरूपस्य व्यतिरेकदृष्टान्तत्वात् । न च ग्राह्यत्वं ग्रहणविशेष्यत्वमेव वाच्यमन्यथाऽभेदेन तमस्यारोपिते नीलरूपवति व्यभिचारादिति कथमापाद्यव्यतिरेकस्तत्रेति वाच्यम्, संसर्गस्यैव सर्वत्रारोप्यत्वमितिमतेनैतदभिधानादिति मिश्राः । तत्रेदं चिन्त्यम् ।

---

(१) तमश्चेति प्रकाशकृदादिसम्मतः पाठः । (२) मेयान्तरमिति कण्ठाभरणधृतः पाठः । (३) बाधकाभावे चेति प्रकाशादावुद्धृतः पाठः । (४) आलोके चेति पाठः कण्ठाभरणे ।

त्वं नास्तीति बाधकमिति चेन्न, तस्यालोकाभावव्यञ्जनीयत्वात्। अन्यथारोपानुपपत्तेः। भावत्वे यदि द्रव्यान्तरं नवैवेति

न्यायलीलावतीकण्ठाभरणम्

इत्याह—तस्येति। प्रत्युत आलोकाभाव एवास्य व्यञ्जक इत्यर्थः। वास्तवनीलरूपवत्त्वे तमस आलोकाभावे चाक्षुषत्वं बाधकमित्यपि शङ्कार्थमाहुः। आलोकाभाववादिमतेऽपि तत्र नीलरूपारोपानुपपत्तिरेव, न हि रूपारोपे चक्षुरालोकं नापेक्षत इत्याह—अन्यथेति। ननु दशमद्रव्यमेव तमोऽस्तु, तथा च न विभागव्याघात इत्याह—भावत्व-

न्यायलीलावतीप्रकाशः

कापेक्षस्यैव चक्षुषः सामर्थ्यात्। तथा च तमो न रूपवत् तेजोऽनपेक्षचक्षुर्ग्राह्यत्वात् आलोकाभाववदिति नीलरूपवत्त्वे बाधकमित्यर्थः। अत्रालोकाभावाव्यञ्जनीयत्वमुपाधिरित्याह—तस्येति। तमस्तु तद्व्यङ्ग्यमित्यर्थः। अन्यथेति। यदि नैव तर्ह्यभावत्वे तमस आलोकं विना नी-

न्यायलीलावतीप्रकाशविवृतिः

यदि न विशेष्यत्वपर्यन्तं ग्राह्यत्वं तदा प्रतियोग्यधिकरणादौ व्यभिचार इति तथाविवक्षावश्यकत्वे कथमापाद्यव्यतिरेकस्तत्रेति। तस्मान्नीलरूपवदिति न दृष्टान्तान्तराभिधानं किं त्वापादकान्तराभिधानम्। अत एव नीलरूपवत्त्वे बाधकमित्यग्रिमग्रन्थोऽपि सङ्गच्छत इति ध्येयम्। बाधकं विपरीतबाधक(१)मिति तदनुग्राह्यं मानमाह—तथा चेति। न चात्राभावपक्षत्वे सिद्धसाधनमतिरिक्तपक्षत्वे चाश्रयासिद्धिर्बाधो वेति वाच्यम, आलोकानपेक्षचक्षुर्ग्राह्यत्वस्य पक्षतावच्छेदकस्योभयसिद्ध्या पक्षव्यक्तिविकल्पस्यादोषत्वात्। न च तन्मते अंशतः सिद्धसाधनं तदवच्छिन्नयावद्व्यक्तेः पक्षीकरणात्। अत एव हेतुपक्षतावच्छेदकाभेदनिबन्धनसिद्धसाधनाप्रसङ्गोऽपि यावत्त्वाघटितस्यैव हेतुत्वात्। वस्तुत आलोकाजन्यनीलविशिष्टचाक्षुषसाक्षात्कारविषयत्वमेव पक्षतावच्छेदकमिति नांशतः सिद्धसाधनम्, न वा हेतुपक्षतावच्छेदकयोरभेद इति तमसस्तन्मते तामसेन्द्रियवेद्यत्वपक्षे च चक्षुःपदं रूपप्रतीत्यसाधारणकारणेन्द्रियपरं गोलकपरं वा। रूपभेदेन च पक्षस्यापि दृष्टान्तत्वमभेदानुमान इवाविरुद्धमिति दिक्। अत्रेति। न च तन्मते तमोवृत्तिनीलरूपकर्मादिषु साध्याव्यापकत्व-

(१) प्रमापकमिति द्वितीयपुस्तके पाठः।

व्याघातः । अद्रव्यान्तरत्वं सर्ववादिनिषिद्धम् । अथ गुणान्तरं चतुर्विंशतित्वव्याघात इति मेयान्तरमेव तमः । अत्रैव सङ्ग्रह श्लोकः—

नाभावोऽभाववैधर्म्यान्नारोपो बाधहानितः ।
द्रव्यादिषट्कवैधर्म्याज्ज्ञेयं मेयान्तरं तमः ॥

न्यायलीलावतीकण्ठाभरणम्

इति । नवैव द्रव्याणि उद्दिष्टानि लक्षितानि परीक्षितानि च, तद्व्याघात इत्यर्थः । तर्हि नवस्वेवान्तर्भवतु तथा च रूपवत्त्वक्रियावत्त्वादिकमप्युपपद्यत इत्यत आह—अद्रव्यान्तरत्वमिति । नवान्तर्भूतत्वमित्यर्थः । निःस्पर्शत्वान्न वायुपर्य्यन्तान्तर्भावः, अनित्यत्वाच्च नाकाशादिष्वन्तर्भावः इत्यर्थः । अभाववैधर्म्यादिति । निषेधार्थतयाऽभासमानत्वं वैधर्म्यं न तु नीलरूपवत्त्वं तथा सति द्रव्यत्वे मेयान्तरत्वभङ्गः। नन्वारोपितनीलरूपमेव तमः स्यादत उक्तं––नारोप इति । ननु द्रव्यादिषु षट्सु तदन्त-

न्यायलीलावतीप्रकाशः

लाद्यारोपो न स्यात् नीलतद्विशिष्टसाक्षात्कारे चक्षुष आलोकापेक्षस्यैव सामर्थ्यादित्यर्थः। 'अद्रव्यान्तरत्वं' न द्रव्यान्तर्भूतत्वमित्यर्थः। सर्वेति । गन्धस्पर्शशून्यत्वान्न पृथिवी नीलत्वान्न जलादीति त्वयाप्यनुमतमित्यर्थः। अत्र न कर्मान्तरमित्यपि द्रष्टव्यम्। मेयान्तरत्वं षडतिरिक्तभावत्वं तेन अभावेन मेयान्तरेण न सिद्धसाधनम् । अभाववैधर्म्यं भावत्वसाधकः पूर्व्वोक्तो हेतुः ।

न्यायलीलावतीप्रकाशविवृतिः

मिति वाच्यम्, द्रव्याभावान्यतरत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् । व्यञ्जकत्वे च विषयत्वातिरिक्तरूपेण । अतो विषयीभूयस्त्वव्यङ्ग आलोकाभावे न साध्याव्यापकत्वम् । साधनाव्यापकत्वमाह––तमस्त्विति । न कर्मान्तरमिति । उत्क्षेपणादेरन्यदिदं न कर्मेत्यर्थः । तेन नाप्रसिद्धिः। षडतिरिक्तेति । अत्रापि षडतिरिक्तमिदं भावत्वाश्रय इति साध्यमतो नाप्रसिद्धिः । अभाववैधर्म्यं भावत्वमपि तस्य च हेतुत्वे साध्याविशेष इति विशेषपरतामाह––अभाववैधर्म्यमिति। ['पूर्वोक्तो हेतुः' निषेधेनाप्रतीयमानत्वम् । (१)]

---

(१) एतन्मध्यस्थपाठो द्वितीयादर्शपुस्तके नास्ति ।

क्षणावच्छेदकश्चोपाधिः क्षणिक इति षट् पदार्थाः। विधर्मेत्यतोऽपि नियमासिद्धिः।

शक्तिश्च मीमांसकानाम्। अत्रैव संग्रहश्लोकः—

न्यायलीलावतीकण्ठाभरणम्

भावः स्यादत आह—द्रव्यादीति। आलोकनिरपेक्षचक्षुर्ग्राह्यत्वं द्रव्यादिषट्कवैधर्म्यम्।

क्षणेति। स्वाधेयो यः कादाचित्कोऽभावः प्रागभावः प्रध्वंसो वा तत्प्रतियोग्यनाधारः पलकलाक्षण इत्युच्यते कालोपाध्यव्यापकः कालोपाधिर्वा तदवच्छेदकः क्षणमात्रस्थायी पदार्थो वाच्यो न चैतादृशो द्रव्यादिषु मध्ये कोऽपीति तस्यावश्यकाभ्युपगन्तव्यस्यासंग्रहाद्विभागव्याघात इत्यर्थः।

शक्तिश्चेति। मीमांसकानामिवास्माकमपि सेति तदसङ्ग्रहात् विभा-

न्यायलीलावतीप्रकाशः

क्षणेति। कालोपाध्यव्यापकः कालोपाधिः क्षणः स्वाधेयकादाचित्काभावप्रतियोग्यनाधारो वा तदवच्छेदकत्वं नानेकक्षणावस्थायिन इत्यर्थात् तावन्मात्रकालवृत्तित्वलाभः, इदमेव षट्पदार्थवैधर्म्यमित्यर्थः। मीमांसकानां यथा तथास्माकमपीति शेषः।

न्यायलीलावतीप्रकाशविवृतिः

कालोपाधीति। कालोपाधिरव्यापकोऽघटको यस्येत्यर्थः। अन्येषां द्विक्षणाद्यात्मकोपाधीनां क्षणघटितत्वान्नातिव्याप्तिशङ्का। व्योमाद्यतिव्याप्तिवारणाय चरमकालोपाधिपदम्। यद्वा कालोपाधिरव्यापको यस्येत्यर्थः। व्यापकत्वं तु तदधिकरणपर्याप्त्यधिकरणताकत्वम्। न च क्षणाधिकरणे अन्यस्याधिकरणता पर्याप्यते। यद्वा कालोपाधेरव्यापक इत्यर्थः। द्विक्षणात्मकोपाधिः क्षणस्यैव व्यापकः क्षणस्तु न कस्यापि, विद्यमान एव दण्डादौ क्षणस्यानियमात्। अत्र च कल्पद्वये व्यापकत्वं भेदगर्भमतो नासम्भवः। स्वाधेयेति। स्वं लक्ष्यत्वाभिमतो धर्मी तदाश्रयौ यौ कादाचित्काभावौ प्रागभावप्रध्वंसौ तत्प्रतियोग्यनाधारत्वमित्यर्थः। द्विक्षणात्मके कालोपाधौ तु नैवं प्रतिक्षणं कस्यचिदुत्पत्तिः कस्यचिच्च विनाश इत्यभ्युपगमात्। ध्वंसादिप्रतियोगिघटादिनाऽसम्भववारणाय स्वाधेयेत्यभावविशेषणम्। अत्यन्ता-

न द्रव्यं (१)गुणवृत्तित्वाद् गुणकर्मबहिष्कृता ।
सामान्यादिषु सत्त्वेन सिद्धा भावान्तरं हि सा ॥

अत एव ज्ञाततापि वैशिष्ट्यं च । कथमन्यथा भावाभाव-

न्यायलीलावतीकण्ठाभरणम्

गव्याघात इत्यर्थः । द्रव्याद्यनन्तर्भावं शक्तेराह—न द्रव्यमिति । सामान्यादिवृत्तित्वे सकलपदार्थवैधर्म्ये सत्येव द्रव्यगुणकर्म्मवैधर्म्यं गुणवृत्तित्वमप्युक्तम् । सूचितमीमांसकयुक्तीनामेव सङ्ग्रहाय श्लोकोऽपि। ज्ञातता वैशिष्ट्यं च यथा भट्टानां तथास्माकमपि, तथा च तदसङ्ग्रहेऽपि विभागव्याघात इत्याह—अतएवेति । भावान्तरमित्यनुषज्यते। ज्ञाततायां च ज्ञातो घट इत्यादिप्रतीतिर्मानं स्फुटमिति तदुक्त-

न्यायलीलावतीप्रकाशः

तेन तदुक्तयुक्तिः सूचितेति न सङ्ग्रहश्लोकत्वविरोधः । अत एवेति ।

न्यायलीलावतीप्रकाशविवृतिः

भावमादायासम्भव इति कादाचित्कपदम् । न च प्रागभावगर्भमेव सम्यक्, तदपेक्षयास्य लघुत्वात् । न च महाप्रलये लक्षणद्वयमतिप्रसक्तमिति वाच्यम्, लीलावतीकारेण तदनभ्युपगमात् । मतान्तरे तु कालोपाधिपदस्यैव तदन्यपरत्वमिति न प्रथमलक्षणातिप्रसक्तिः । कादाचित्काभावपदं च प्रागभावपरमिति न द्वितीयलक्षणातिव्याप्तिः । न च द्वितीयलक्षणे तथा सति महाप्रलयाव्यवहितपूर्वक्षणेऽव्याप्तिः स्वाधेयभावप्रतियोगिकप्रागभावानधिकरणत्वस्य विवक्षितत्वात् । न चैवं कादाचित्काभावगर्भतयैव सम्यक् प्रागभावगर्भत्वेऽप्यदोषात् । प्रागभावत्वस्य गन्धानाधारसमयवृत्त्यभावत्वरूपतया कादाचित्कत्वाघटितत्वादिति दिक् । ननु भवतः शक्त्यनभ्युपगमात् तामादाय विभागव्याघातदेशनानुपपन्नेत्यत आह—यथेति । यया युक्त्येत्यर्थः । संग्रहेति । सङ्ग्रहत्वं पूर्वोक्तोपनिबन्धनत्वं पूर्वयुक्त्यन-

(१) अत्र च पक्षतावच्छेदकसामानाधिकरण्यमात्रेण साध्यसिद्धेरुद्देश्यत्वात् प्रत्याश्रयं शक्तेर्भिन्नतया हेतोर्भागासिद्धत्वेऽपि न क्षतिः । शक्तित्वं न द्रव्यत्वादिव्याप्यं गुणादिवृत्तिवृत्तित्वादित्यत्र तात्पर्य्यमित्यप्याहुः ।

न्यायलीलावतीकण्ठाभरणम्

द्वय वैशिष्ट्ये प्रमाणमाह—कथमन्यथेति । भावाभावयोरिति । संयोगसमवायाभ्यां वैशिष्ट्यं तेषु न हि तौ भावाभाववृत्ती, तथा च घटाभाववद्भूतलमिति प्रतीतिरेव वैशिष्ट्ये प्रमाणमित्यर्थः । ननु वैशिष्ट्येऽप्यभाववैशिष्ट्यं प्रतीयते तत्र च वैशिष्ट्यान्तराभ्युपगमेऽनवस्था स्यादिति तत्र स्वरूपसम्बन्धेनैव वैशिष्ट्यव्यवहार इति प्राथमिको-

न्यायलीलावतीप्रकाशः

पूर्व्वोक्तयुक्तेरित्यर्थः । ज्ञातताऽपि भावान्तरमित्यनुषज्यते, ज्ञातो घट इति विशिष्टप्रतीतेर्विशेषणविशेष्यसम्बन्धं(१) विनानुपपत्तेरिति भावः । कथमन्यथेति । घटाभाववद्भूतलमिति विशिष्टधीर्विशेषणविशेष्यसम्बन्धनिमित्ता यथार्थविशिष्टज्ञानत्वात् दण्डीतिज्ञानवदिति संयोगसमवायबाधे तदतिरिक्तसम्बन्धो वैशिष्ट्यमित्यर्थः । ननु वैशिष्ट्ये वैशिष्ट्याभ्युपगमेऽनवस्थानाद्यथा प्रमेयत्वादिवैशिष्ट्यधीः स्व-

न्यायलीलावतीप्रकाशविवृतिः

भिधानाद्विरुद्धमिति युक्तिसूचनेनापास्तमित्यर्थः । भावान्तरमिति । षड्तिरिक्तेऽयं भावत्वाश्रय इत्यर्थः । आश्रयासिद्धिनिरासायाह—ज्ञातो घट इति । यथार्थेति प्रमेत्यर्थः । तेन नेश्वरज्ञाने मन्मते व्यभिचारः, तस्य प्रमाऽप्रमाऽ(३)न्यत्वात् । यत्तु जन्यपदेन तद्वारणमिति तन्न, परमते व्यावृत्त्यप्रसिद्ध्या व्यर्थविशेषणत्वात् । न च विशिष्टज्ञानत्वं वैशिष्ट्यविषयकज्ञानत्वमिति साध्याविशेष इति वाच्यम् स्वरूपसम्बधात्मकवैशिष्ट्यमादाय हेतोरुभयासिद्धत्वात् । नचैवं तेनैवार्थान्तरं विशेषणविशेष्यान्यसम्बन्धस्य साध्यत्वात् । न चैवं बहुत्र व्यभिचार इति वाच्यम्, तेन तत्र सर्वत्र वैशिष्ट्यस्वीकारात् । विशेषणज्ञानजन्यत्वमेव वा विशिष्टज्ञानत्वमिति दिक् ।

[प्रमेयत्वादीति । प्रमाविषयत्वरूपस्य प्रमेयत्वस्य प्रमावैशिष्ट्यरूपत्वादिति भावः ।](४)

---

(१) विशेषणं विनेति वक्तव्ये विशेष्यसम्बन्धयोरभिधानं दृष्टान्तार्थतया । तथा च यथा विशेष्यसम्बन्धयोरभावे न विशिष्टधीस्तथा विशेषणाभावेऽपीत्यर्थः । विशेषणाभावे विशेषणविशेष्ययोः सम्बन्धस्याप्यभावात् तदधीनाया विशिष्टप्रतीतेरप्यनुपपत्तेरिति वार्थः । इति दीधितिः ।

(३) प्रमान्यत्वादिति पाठान्तरम् ।

(४) [ ] एतन्मध्यस्थ पाठो द्वितीयादर्शपुस्तके नास्ति ।

र्योर्वैशिष्ट्यस्यावगमः । यथा वैशिष्ट्ये तथा स्वरूपेणैवेति, चेन्न समवायापलापप्रसङ्गात् । अधिकस्तत्र प्रवाहो हीयते न प्रतीयमान इति चेन्न, अभावेऽपि तुल्यत्वात् । बाधोऽत्रास्तीति चे-

---

न्यायलीलावतीकण्ठाभरणम्

ऽपि तद्व्यवहारस्तत एवास्तु किं वैशिष्ट्येनेत्याह—यथेति । समवायेति । इह रूपसमवाय इति प्रतीतिर्यथा स्वरूपसम्बन्धेन तथा तन्तुषु पट इत्यपि तेनैव स्यादिति समवायोऽपि न सिद्ध्येदित्यर्थः । ननु प्रतीयमानः समवायोऽपह्नोतुमशक्यः न हि तन्मात्राभ्युपगमेऽपि अनवस्थेत्याह—अधिक इति । तर्ह्यभावेऽपि तद्वैशिष्ट्यं तन्मात्रमस्तु प्रतीयमानत्वात् तदधिकः प्रवाहस्तत्रापि हीयतामित्याह—अभावेऽपीति । ननु प्रामाणिकैर्वैशिष्ट्यानभ्युपगमो बाधाधीन एवेति कश्चिदत्र बाधो भविष्यतीत्याह—बाध इति । यदि बाधोऽत्र तदा प्रामाणिकैरभिधीयेतैव

न्यायलीलावतीप्रकाशः

रूपेणैव तथाऽत्रापि स्यादित्याह—यथेति । तर्हि यथेह गोत्वमितीहधीनिमित्तं समवायस्तथेह गोत्वसमवाय इत्यनुभवात्तत्रापि समवायान्तरं स्यात् । अथ तत्र स्वरूपमेव निमित्तं तदेह गोत्वमित्यत्रापि तथा स्यादिति समवायोऽपि न सिद्ध्येदित्याह—समवायेति । ननु समवाये समवायान्तरं नोपेयतेऽनवस्थानात्, गोत्वसमवायस्तु प्रतीतत्वादभ्युपेयोऽनवस्थाया मानाभावस्य मूलत्वादित्याह—अधिक इति । तर्हि घटाभाववद्भूतलमित्यत्र वैशिष्ट्यानुभवाद्वैशिष्ट्यमस्तु वैशिष्ट्येऽनुमानाभावात्तदभाव इत्याह—अभावेऽपीति । तुल्यत्वाद्वैशिष्ट्यस्वीकारस्य वैशिष्ट्ये वैशिष्ट्यास्वीकारस्य चेत्यर्थः । अत्रेति । वैशिष्ट्यस्वीकारे तदनभिधानादिति वैशिष्ट्याभावसाधकमानस्याभिधातुमशक्यत्वादि-

न्यायलीलावतीप्रकाशविवृतिः

'प्रतीतत्वात्' प्रमितत्वात्, न तु प्रत्यक्षत्वात् । एतद्दर्शने समवायस्याप्रत्यक्षत्वादिति (१)ध्येयम् । अतएवाग्रे मानाभाव इति सामान्यत एवोक्तम् । वैशिष्ट्येति । वैशिष्ट्याभावसाधकस्य मानत्वेन व्यवस्थापयितुमश

---

(१) अस्वीकारादिति पाठान्तरम् ।

न्न। तदनभिधानात्। ततो भावाभावयोरपि तत्स्वीकारो दुर्वार एव। दण्डी पुरुष इति प्रतीतेश्च। शब्दमात्रमिदमिति चेन्न, इहायमित्यादावपि(१) तथात्वप्रसङ्गात्।

न्यायलीलावतीकण्ठाभरणम्

तदनभिधानात्तद्विरह एवात्रेत्याह--नेति। बाधाभावाद्वैशिष्ट्यं प्रामाणिकमेवेत्युपसंहरति—तत इति। न केवलमभावे वैशिष्ट्यप्रत्ययानुरोधात् वैशिष्ट्यं स्वीकुर्मः, किन्तु भावविशिष्टप्रत्ययोऽपि तत्र प्रमाणम्। न च संयोगेनान्यथासिद्धिः तमादायापि समूहालम्बनस्य दुष्टत्वादित्याह—दण्डीति। ननु दण्डी पुरुषो दण्डविशिष्टः पुरुष इत्यर्थाननुरोधी शब्दो न वैशिष्ट्ये प्रमाणमित्याह—शब्देति। तर्हि इहायमित्यपि शब्दमात्रं न समवाये प्रमाणमित्याह—इहायमिति। कुण्डे दधी-

न्यायलीलावतीप्रकाशः

त्यर्थः। तत इति। प्रमाणबलाद्भावयोः समवाय इव भावाभावयोरपि सम्बन्धान्तरं वैशिष्ट्याख्यमभ्युपेयं समवायाभावादित्यर्थः। न च भावाभावयोः सम्बन्ध एव नास्ति अभावस्यापक्षधर्मत्वेन हेतुत्वानापत्तेः भूतले घटसंसर्गो नास्तीति देशविशेषनियताभावव्यवहारानुपपत्तेश्च। न च प्रतियोगिदेशानियमात्तन्नियमः, तदन्यदेशताव्यवहाराभावापत्तेरिति भावः। यत्रापि संयोगस्तत्रापि वैशिष्ट्यमभ्युपेयं विशेषणविशेष्यवत्तयोर्वैशिष्ट्यस्यानुभवादित्याह—दण्डीति। न च दण्डपुरुषसंयोगा एव तद्विषयः दण्डपुरुषसंयोगा इतिप्रतीत्या सह विशेषाभावापत्तेरिति भावः। शब्दमात्रमिति। मात्रपदेनार्थनैरपेक्ष्यमुक्तम्। इहायमिति। इह गोत्वमित्यतोपीहेतिधीनिमित्तं समवायो न सि-

न्यायलीलावतीप्रकाशविवृतिः

कयत्वादित्यर्थः। अभावस्येति। पक्षसम्बन्ध एव हि पक्षधर्मतेत्यर्थः। न तु तद्वृत्तिभावाप्रतियोगिकत्वमेवाभावस्य पक्षधर्मतेत्यरुचेराह—भूतल इति। तदन्येति। प्रतियोगिदेशान्यदेशताव्यवहारस्या(२)त्यन्ताभावे एवमप्यसमर्थनादित्यर्थः। न च प्रतियोग्यारोप एव नियामकः अभावसम्बन्धमन्तरेण प्रतियोग्यारोपस्यैवाभावादिति भावः। प्रतिज्ञामात्रान्न साध्यसिद्धि-

---

(१) 'त्यादेरपि'। (२) प्रतियोगिदेशतान्यव्यवहारस्येति द्वितीयपुस्तके पाठः।

आधाराधेयभावश्च मेयान्तरम् । संयोगसमवायावेव सप्तमीप्रथमाभ्यामभिलप्यमानसम्बन्धिनौ तद्व्यहारहेतू इति चेन्न,

न्यायलीलावतीकण्ठाभरणम्

ति प्रतीतिबलादाधाराधेयभावोऽपि सम्बन्धोऽधिकस्तदनभिधानात् विभागव्याघात इत्याह--आधारेति । न च संयोगवैशिष्ट्याभ्यामन्यथासिद्धिस्ताभ्यामुभयत्राधारत्वमाधेयत्वं वा प्रतीयेत न तु नियतप्रतीतिः स्यादिति भावः । सिद्धान्तान्तरेणान्यथासिद्धिं विवक्षन्नियताधारत्वाधेयत्वप्रतीतौ नियामकं शङ्कते--संयोगेति । सप्तम्यन्ते सम्बन्धिनि आधारत्वप्रतीतिः प्रथमान्ते त्वाधेयत्वप्रतीतिरित्यर्थः । सप्तमीप्रथमाभ्यां सम्बन्धिनौ नाभिलप्येते, किन्तु तयोराधाराधेयत्वे प्रत्याय्येते सेयं विचित्रा प्रतीतिराधाराधेयभावसम्बन्धमन्तरेणानुपपन्ना न हि विषयवैचित्र्यमन्तरेण प्रतीतिवैचित्र्यमित्याह—नेति । यद्वा इहायमिति प्रतीत्या सप्तमीप्रथमयोरभिलापः क्रियते

न्यायलीलावतिप्रकाशः

द्धेत्, तत्रापि शब्दमात्रत्वाभिधानसम्भवात् । अथाबाधितप्रतीतिबलात्तत्सिद्धिः तदा वैशिष्ट्यमपि तथेत्यर्थः । आधारेति । न द्रव्यं गुणवृत्तित्वादित्याद्युक्तयुक्त्या तस्य पदार्थान्तरेऽनन्तर्भावादित्यर्थः । न च वैशिष्ट्यं तत्र आधाराधेययोरन्योन्यवैशिष्ट्यस्योभयवृत्तित्वादाधारत्वाधेयत्वयोश्चैकैकवृत्तित्वात् नापि सम्बन्धेनान्यथासिद्धिः तस्याप्युभयवृत्तित्वादिति भावः । ननु सम्बन्धस्योभयाश्रितत्वेऽपि यतः सम्बधिनः सप्तमी तत्राधारव्यवहारो यतस्तु प्रथमा तत्राधेयव्यवहारः स्यादित्याह—संयोगेति । सप्तम्यर्थस्य संयोगित्वस्योभयवृत्तित्वेऽपि कुण्डे बदरमित्यत्र बदरशब्दान्न सप्तमी अनभिधानादित्यर्थः । एवमिह गोत्वमित्यत्रापि समवायो न सिद्ध्येदुक्तरीत्यान्यथासिद्धेः । अथ श-

न्यायलीलावतीप्रकाशविवृतिः

रतो हेतुं पूरयति--न द्रव्यमिति । पदार्थान्तरे क्लृप्तपदार्थे(१) । सम्बन्धेन संयोगादिना । ननु सप्तम्यर्थस्य संयोगादेरुभयाश्रितत्वे सप्तमीप्रयोग एव किं नियामकमत आह—सप्तम्यर्थस्येति । परम्परासम्बन्धेन द्रव्या-

(१) क्लृप्तपदार्थान्तरे इत्यर्थ इति पाठान्तरम् ।

इहायमितिप्रतीतिवैचित्र्यात् । शब्दमात्रत्वे तु सम्बन्धापलापप्रसङ्गात् ।

साद्दश्यं च(१) गुणवृत्तित्वान्न द्रव्यगुणकर्मात्मकम् । नापि सामान्यम् । तद्धि व्यक्तिदर्शनमात्रवेद्यं वा प्रतियोगिग्रहणवेद्यं वा ।

न्यायलीलावतीकण्ठाभरणम्

सैव वः प्रतीतिः कथं स्याद् यद्याधाराधेयभावो न भवेदित्यर्थः । उच्चारणमपि नार्थप्रतीत्यधीनं न वा उच्चारणात् प्रतिपाद्यस्य काचिदभिमतार्थप्रतीतिरिति यदि तदेह तन्तुषु पट इत्याद्यपिप्रतीतिबलात् त्वदुपगतोऽपि सम्बन्धो न सिद्ध्येदित्याह—शब्दमात्रत्व इति । साद्दश्यं च पदार्थान्तरं न विभक्तमिति पुनर्विभागव्याघातमाह—साद्दश्यं चेति । साद्दश्यस्य पदार्थान्तरवैधर्म्यमाह--गुणवृत्तित्वादिति । भवति हि यथा शङ्खस्य रूपं तथा पटस्येतिप्रतीतिबलाद्गुणवृत्तित्वमस्येत्यर्थः । ननु सामान्यमेव साद्दश्यमित्यत आह—नापीति । व्यक्तिः

न्यायलीलावतीप्रकाशः

ब्दाननुसन्धानेऽपि तत्प्रतीतेर्न सा शब्देनोपपाद्यते तर्ह्याधारत्वादावपि तथेत्याह--इहायमिति । प्रतीतिवैचित्र्येऽपि यदि विषयशून्यशब्दमात्रस्वीकारस्तदा गोत्वसमवेतमित्यादिप्रयोगोऽप्येवं समर्थयितुं शक्यत इति समवायादिरपि न सिद्ध्येदित्याह--शब्दमात्रत्वे त्विति ।

अस्ति तावदबाधितसद्दशबुद्धेः साद्दश्यं तन्न द्रव्यादित्रयात्मकं(२) गुणसमवेतत्वादित्याह--साद्दश्यमिति । अतएव न विशेषसमवायात्मकमित्यपि द्रष्टव्यम् । व्यक्तिः साद्दश्याश्रयः प्रतियोगिन इति प्रतियोगिज्ञानस्य साद्दश्यधीहेतुत्वादित्यर्थः । न साद्दश्यज्ञाने प्रतियोगिज्ञानं हेतुः सामान्यरूपतया तस्य निष्प्रतियोगिकत्वात् शब्दप्रयोगात्मकत-

न्यायलीलावतीप्रकाशविवृतिः

देरपि गुणवृत्तित्वाद्यभिचार इत्यत आह—गुणसमवेतत्वादिति । अत एवेत्यनेनापि गुणसमवेतत्वमेवानुकर्षणीयम् । यथाश्रुतमौलहेतुपरामर्शे समवायेन व्यभिचारात् । प्रतियोगिनोऽपि व्यक्तित्वेन विकल्पास-

---

(१) 'श्यं तु गु'।

(२) विषयित्वादिना द्रव्यादेरपि गुणवृत्तित्वादाह—गुणसमवेतत्वादिति । इति दीधितिः ।

नाद्यः। प्रतियोगिनोऽनवभासे सादृश्यबुद्धेरभावात्। अस्त्येव च बुद्धिर्न व्यपदेशभागिनीति चेन्न, ब्राह्मणत्वा(१)देरपि निर्वि-

न्यायलीलावतीकण्ठाभरणम्

सादृश्याश्रयो गवयादिः प्रतियोगी सादृश्यनिरूपको गवादिः। प्रतियोगिन इति। सादृश्यस्यान्वयव्यतिरेकाभ्यां प्रतियोगिनिरूपणाधीननिरूपणत्वसिद्धेरित्यर्थः। अस्त्येवेति। प्रतियोगिग्रहणमन्तरेणापि सादृश्यं ज्ञायते न तु व्यवह्रियत इत्यर्थः। एवं सति ब्राह्मणत्वजातेरपि विशुद्धमातापितृजयोनित्वव्यङ्गत्वात् सविकल्पकमात्रवेद्यत्वं सिद्धान्तो

न्यायलीलावतीप्रकाशः

व्यवहारे तु तत् हेतुरित्याह--अस्त्येवेति। इदमनेन सदृशमिति सादृश्यानुभवात्प्रतियोगिज्ञानं विना तदज्ञानात् तस्य तद्धीहेतुत्वान्न निष्प्रतियोगिकसामान्यं सादृश्यम्, अन्यथा ब्राह्मण्यं (२)विशुद्धयोनिजत्वव्यङ्ग्यमतस्तज्ज्ञानं विना निर्विकल्पके तन्न भासते तज्ज्ञाने च सविकल्पकसामग्र्येवेत्यपि सिद्धान्तो व्याहन्येत। विशुद्धयोनिजत्वज्ञानस्य ब्राह्मण्यव्यवहारमात्रहेतुतया तज्ज्ञानाहेतुत्वे निर्विकल्पकेऽपि तद्भासत इत्यस्यापि वक्तुं शक्यत्वादित्याह—ब्राह्मण्यादेरिति।

न्यायलीलावतीप्रकाशविवृतिः

ङ्गतिरत आह—व्यक्तिरिति। अन्यथा ब्राह्मण्यमिति। अत्र जातिर्व्यञ्जकवित्तिवेद्या न तु तद्धीजन्यवित्तिवेद्या, युगपदेव शिरःपुरुषत्वयोर्ग्रहादितिमते तज्ज्ञानं विनेत्यस्य तद्विषयतां विनेत्यर्थः। तज्ज्ञाने चेत्यस्य तद्विषयत्व इत्यर्थः। सविकल्पकसामग्र्येवेत्यत्र पूर्वमिति शेषः। तथा च विशुद्धमातापितृजन्यत्वस्य ब्राह्मण्यधीविषयत्वे शुद्धनिर्विकल्पके ब्राह्मण्यं न भासत इति सिद्धान्तः, स चैवं भज्येतेति प्रकरणार्थः। यदि च तद्ग्रहसामग्रीत्वेन त्वया कारणत्वं वाच्यमिति लाघवेन तद्ग्रहस्यैव कारणत्वं प्रत्यक्षविशेषे विशेषदर्शनस्येवेति मतम्, तदा यथाश्रुत एव ग्रन्थः। शिरःपुरुषत्वप्रतीतियौगपद्यधीस्तु भ्रम इति

(१) ब्राह्मण्यादेरिति प्रकाशसम्मतः पाठः।

(२) अविदितचरे पुंसि प्रहरावधि निरीक्ष्यमाणेऽपि ब्राह्मण्यादिसन्देहात्, अन्वयव्यतिरेकाभ्यां विशुद्धमातापितृजत्वज्ञानं हेतुः। न चैवं ब्राह्मण्यादिविशिष्टज्ञानार्थं तन्निर्विकल्पकमावश्यकमिति वाच्यम्, व्यक्तिसविकल्पकस्यैव तदंशे निर्विकल्पकरूपत्वात्, तावतापि सविकल्पकमात्रवेद्यत्वाक्षतेः। इति दीधितिः।

कल्पकबुद्धिवेद्यत्वापत्तेः । नान्त्यः । अवयवसामान्यानां प्रागेव ज्ञानात्सामान्यस्य च सामान्यान्तरेऽभावात् । सादृश्यव्यवहाराभावापत्तौ मेयान्तरत्वादिति । मैवम् ।

भावत्वाधिष्ठिताः सर्वाः प्रत्येकं व्यक्तयो मताः ।

न्यायलीलावतीकण्ठाभरणम्

ऽपि भज्येत तद्व्यवहारमात्रे तदपेक्षेत्यपि वक्तुं सुकरत्वादित्यर्थः। अवयवेति। सामान्यान्येव भूयांसि गुणावयवकर्म्मणाम्। भिन्नप्रधानसामान्यव्यक्तं सादृश्यमित्यभ्युपगमात् सादृश्यं सामान्यं भवदवयवगतमेव भविष्यति।तद्ग्रहे च न प्रतियोगिग्रहापेक्षा व्यक्तिग्रहमात्रव्यङ्ग्यत्वात्तस्येत्यर्थः। सादृश्यस्य सामान्यत्वे बाधकान्तरमाह—सामान्यस्येति । यथा गोत्वं नित्यं तथाऽश्वत्वमपीतिप्रतीतेः सामान्येऽपि सादृश्याभ्युपगमात् । न च सामान्यं सामान्यवृत्तीति पदार्थान्तरमेव सादृश्यमित्यर्थः । भावत्वेति ।

न्यायलीलावतीप्रकाशः

व्यवहर्त्तव्यज्ञाने व्यवजिहीर्षायां च सत्यां व्यवहारेऽन्यापेक्षा न दृष्टचरी, न च द्रव्यग्रहणसमकालं तत्परिमाणग्रहेऽपि तत्र दीर्घत्वह्रस्वत्वव्यवहारे तथा दृष्टं तयोः परिमाणान्तरतया प्रतियोगिज्ञानव्यङ्ग्यत्वात् तत्काले तदग्रहादिति भावः । अवयवेति । प्रागेव प्रतियोगिज्ञानादिति· शेषः । अवयवेत्युपलक्षणं गुणकर्मसामान्यानामपि प्रतियोगिज्ञानात्प्रागेव ज्ञानात् न तदात्मकमित्यपि द्रष्टव्यम् । ननु सादृश्यरूपतया तस्य ज्ञाने प्रतियोगिज्ञानं हेतुः स्यादित्यत आह—सामान्यस्येति । यथा गोत्वं नित्यं तथाऽश्वत्वमिति जातावपि सादृश्यानुभवान्न जात्यात्मकं सादृश्यमिति भावः । भावत्वेति । अनेन भावमात्रस्यायं विभक्तविभागो न

न्यायलीलावतीप्रकाशविवृतिः

भावः। निर्युक्तिकसिद्धान्तव्याकोपमात्रं न दूषणमत आह—व्यवहर्त्तव्येति। तयोः परिमाणान्तरतयेति। जातिविशेषविशिष्टपरिमाणात्मकतयेत्यर्थः ।तथा च व्यवहर्त्तव्यतावच्छेद(क)विशिष्टव्यवहर्त्तव्यज्ञानस्य व्यवहारकारणतया व्यवहर्त्तव्यज्ञान एव तदपेक्षणमिति भावः । केचित्तु अणुमहदादिभावेन परिमाणस्य चतुर्विधतया यथाश्रुत एव ग्रन्थार्थ इत्याहुः । तारत्वादेरुत्कर्षरूपतया जातित्वेन व्यक्तिग्रहणकाले ग्रहणेऽपि तारश·

द्रव्यादिषट्कविच्छेदमेलकेन विवर्जिताः ॥

भावत्वाधिष्ठानैकैकव्यक्तिमात्रे षड्लक्षणानां मिलितोऽयोगो व्यवच्छिद्यते न तु मिलितानामयोगः । अयोगश्चान्यत्राव-

---

न्यायलीलावतीकण्ठाभरणम्

द्रव्यादीति भावप्रधानो निर्देशस्तेन भावव्यक्तयः षण्णां द्रव्यत्वगुणत्वादीनां ये विच्छेदा अत्यन्ताभावास्तेषां यो मेलकस्तेन विवर्जिता इत्यर्थः । ननु भावसमुदाये षड्लक्षणाभावमेलकसत्त्वात् तन्निषेधे बाध इत्यत उक्तं प्रत्येकं व्यक्तय इति समुदायस्य समुदायिभ्योऽन्यत्वपक्षेऽनन्यत्वे तु प्रत्येकमिति व्यर्थम् । कारिकार्थमाह—भावत्वेति । अभावे मिलितो योऽयोगः प्रसिद्धो भावव्यक्तिषु निषिध्यते न तु मिलितानामिति षण्णां लक्षणानामेकत्रासत्त्वेन मिलनासम्भवादित्यर्थः । अन्यत्रेति । अभाव इत्यर्थः । अत्र भावव्यक्तिषु ।

न्यायलीलावतीप्रकाशः

तु पदार्थमात्रस्येत्युक्तम् । द्रव्यादीति । भावव्यक्तयः प्रत्येकं द्रव्यादिषड्लक्षणात्यन्ताभावमेलकशून्या इत्यर्थः । मिलितोऽयोग इति । अभावे तत्प्रसिद्धिः । न त्विति । मिलितलक्षणात्मकप्रतियोग्यप्रसिद्धेरित्यर्थः । ननु भावत्वेन षडेव द्रव्यादिव्यक्तयो विवक्षितास्तदन्या वा ? आद्ये सिद्धसाधनम्, न च सप्तमभावनिषेधः, अन्त्ये चाप्रसिद्धिः मेलकश्चात्र षडभावमात्रवृत्तिधर्मः कश्चित् षडेव वा अभावाः । आद्ये सिद्धसाधनं न हि षडभवामात्रवृत्तिधर्मो भाववृत्तिः तादृशधर्माप्रसिद्धिश्च । प्रसिद्धावपि(१) तस्याभावः सिद्ध्यतु न तु मेलकिनां तावतामभावानामभावः । अथ(२) मेलकाभावो न मेलकिनामभावं विनेति मेलकि-

न्यायलीलावतीप्रकाशविवृतिः

ब्दप्रयोगरूपव्यवहारेऽवधिज्ञानापक्षेत्यपि न वाच्यं तत्रापि व्यवहर्त्तव्यतावच्छेदकस्य प्रवृत्तिनिमित्तीभूतस्य सजातीयसाक्षात्कारत्वादेरवधिज्ञानज्ञेयत्वात् व्यवहर्त्तव्यतावच्छेदकस्यापि व्यवहर्त्तव्यत्वादिति भावः । षट्त्वावच्छिन्नेऽत्यन्ताभावमेलकसत्त्वाद्बाध इत्यत आह—प्रत्येकमिति । अन्त्य इति । षडेवाभावा इति पक्ष इत्यर्थः ।

---

(१) बुद्धिविशेषविषयत्वं न दुर्लभमित्यत आह—प्रसिद्धावपीति ।

(२) अथेति । परम्परासम्बन्धेन धर्म्मस्याभावः परम्पराघटकधर्म्यभावं विना नेत्यर्थः ।

न्यायलीलावतीप्रकाशः

नामप्यभावः सिद्ध्यति तर्हि मेलकिनामभावानामेकैकानामभावे विधीयमाने क्वचिद्बाधः क्वचित्सिद्धसाधनं द्रव्यत्वाभावाभावस्य गुणादौ बाधितत्वात् द्रव्ये तु सिद्धसाधनात् । अन्त्ये च मेलकोपादानवैयर्थ्यं प्रत्येकमिति च व्यर्थं न हि मिलितासु व्यक्तिषु षट्कविच्छेदमेलकः पदार्थान्तरस्वीकारापातात् । अथ व्यासज्यप्रतियोगिकोऽयमन्य एवाभावो घटवत्यपि घटपटौ न स्त इत्यनुभवात्, यत्र च स्वाभावमात्रप्रतियोगिकोऽभावस्तत्रैवाभावाभावस्य भावरूपत्वम्, तत्र व्यासज्यवृत्तिधर्मसमानाधिकरणप्रत्येकपर्यवसितप्रत्येकप्रतियोगिताका-

न्यायलीलावतीप्रकाशविवृतिः

वैयर्थ्यमिति। षट्त्वावच्छिन्नमपि द्रव्याद्येव तत्र च मिलितायोगात्सत्त्वादिति भावः। पदार्थान्तरेति। मिलितव्यक्तीनां पदार्थान्तरत्वापातादित्यर्थः।यथा घटवत्यपि घटपटोभयाभावस्तथा द्रव्यत्वाद्यत्यन्ताभावादिमत्यपि षण्णामभावानां निषेध इति न बाधसिद्धसाधने इत्याशङ्कते—अथेति । ननु षडभावाभावसत्त्वे प्रत्येकं षड्लक्षणापत्तिरभावाभावस्य भावत्वादत आह—यत्र चेति(१)। अव्यासज्यवृत्तिप्रतियोगिताकस्यैवाभावाभावस्य भावात्मकत्वमिति भावः । प्रतियोगितावच्छेदकावच्छिन्नेनैव च सममभावस्य विरोधो न प्रतियोगिमात्रेणान्यथा विशिष्टाभावोऽपि न स्यादिति पूर्वपक्षितुराशयः । प्रतियोगिता स्वरूपसम्बन्धात्मिका प्रत्येकपर्यवसितेति प्रत्येकस्यैव विरोधित्वं प्रतियोगिताया विरोधित्वरूपत्वादित्यभिप्रेत्याह—व्यासज्यवृत्तीति ।

एतावता तादृशधर्म्माश्रयाणां द्रव्यत्वाद्यभावानामभावः साध्य इति पर्य्यवसितम् । तत् किं द्रव्यत्वाद्यभावत्वेन साध्यता किं वा तादृशधर्म्मावच्छिन्नप्रतियोगिताकाभावत्वेन तत्र तादृशो धर्म्मः प्रत्येकपर्य्यवसितवृत्तिर्व्यासज्यवृत्तिर्वा विवक्षितः ? तत्राद्यं निराकरोति तर्हीति । पक्षतावच्छेदकावच्छेदेन साध्यसाधनेऽंशतो बाधः, सामानाधिकरण्येन तथात्वेऽंशतः सिद्धसाधनं, द्वितीये त्वप्रसिद्धिः, तृतीयं पुनरवलम्ब्य वक्ष्यति—"भावत्वं वा षड्लक्षणाभावषट्काभावव्याप्यमिति ।"षट्काभावः षट्त्वावच्छिन्नप्रतियोगिकाभावः । स पुनरतिरिच्यतां न वेत्यन्यदेतत् । व्युत्पादितं च व्यासज्यवृत्तिधर्म्मस्य प्रतियोगितावच्छेदकत्वमनुमानदीधितौ । यद्वा यत्किञ्चिदेकधर्म्मिघटितसम्बन्धेन तदभावो विवक्षितः, धर्म्मिसामान्यघटितसम्बन्धेन वा ? आद्यं निराकरोति—तर्हीति । द्वितीये त्वप्रसिद्धिरिति ।–इति दीधितिः ।

(१) ननु षट्त्वावच्छिन्नप्रतियोगिताकस्य द्रव्यत्वाद्यभावस्यातिरिक्तत्वेऽत्यन्ताभावाभावस्य भावत्वनियमो व्याहत इत्यत आह—यत्र चेति । इत्यपि कश्चित् ।

गतोऽत्र समारोप्य निषिध्यते भूतले चैत्रवत्। ततश्च षड्लक्ष-

न्यायलीलावतीकण्ठाभरणम्

ननु भावव्यक्तिषु प्रसक्तिरेव नास्ति कुतो निषेध इत्यत आह— समारोप्येति। आरोपरूपैव प्रसक्तिरित्यर्थः। भूतल इति। यथागृहवर्त्ति-नश्चैत्रस्य भूतले प्राङ्गनादौ समारोपपूर्वको निषेधप्रत्यय इत्यर्थः। शुक्तौ रजतत्वमारोप्य नेदं रजतमिति बाधावतारादनेन दृष्टान्तेन सर्वाभावप्रत्ययानामारोपपूर्वकत्वमुन्नेयमिति भावः। ननु कीदृशेन एवकारसमभिव्याहारेणायमर्थो लभ्यत इत्यत आह—ततश्चेति। षड्-

न्यायलीलावतीप्रकाशः

भावादेव तादृशबुद्ध्युपपत्तौ तदनभ्युपगमात्। अथ गुणादिषट्पदार्थ-भिन्ने द्रव्यत्वायोगो नास्ति कर्मादिभिन्ने गुणत्वायोगो नास्तीत्य-योगव्यवच्छेदार्थः गुणादिषट्कभिन्ने द्रव्यभेदो नास्तीत्यन्ययोगव्य-वच्छेदार्थः। तन्न गुणादिषट्कपदार्थभिन्नत्वेन यदि द्रव्यमेव विवक्षितं तदा सिद्धसाधनम्, अन्यस्य चाप्रसिद्धिरित्याधिकरणविकल्पग्रासात् गुणाद्यभावपञ्चकसाहित्यं द्रव्यादन्यत्र नास्ति तस्य द्रव्य एव प्र-सिद्धेः। यद्वा गुणाद्यभावपञ्चकं द्रव्यत्वव्याप्यमित्यपि न, तत्रापि हि द्रव्यादन्यद्यदि गुणाद्येव विवक्षितं तदा सिद्धसाधनं अन्यच्चेत्तदा सिद्ध्यसिद्धिव्याघातः। अत्राहुः। भाववृत्त्यत्यन्ताभावप्रतियोगित्वं न षड्लक्षणावच्छिन्नम्, यद्वा भाववृत्तिगुणाद्यभावपञ्चकसाहित्यं न द्रव्यत्वाभावस्य, द्रव्यत्वं वा भाववृत्त्यभावपञ्चकव्यापकम्, भाव-वत्वं वा षड्लक्षणाभावव्याप्यमित्यवधारणार्थः। समारोप्येति। न चा-

न्यायलीलावतीप्रकाशविवृतिः

मूलोक्तायोगान्ययोगव्यवच्छेदौ संसर्गाभावान्योन्याभावरूपव्य-वच्छेद्यभेदेन कथंचिदुपपादयति—अथेति। अभावमादाय षट्त्वं बो-ध्यम्। गुणाद्यभावेति। गुणाद्यन्योन्याभावेत्यर्थः(१)। अन्यथा समवाये तदत्यन्ताभावपञ्चकसत्त्वाद्बाधापत्तेरित्यवधेयम्। अन्यत्रेत्यभाव इति शेषः। यद्वेति। भावत्वसामानाधिकरण्यावच्छिन्नं गुणाद्यन्योन्याभाव-पञ्चकमित्यर्थः। द्रव्यत्वव्याप्यत्वं द्रव्यान्यावृत्तित्वमित्यग्रिमदोषोऽत्र-पि लगतीति ध्येयम्। भाववृत्तीति। धर्मिपक्षतायां पक्षाविकल्पभयेनानु-

(१) गुणादिपदं वा गुणत्वादिपरम्।

न्यायलीलावतीप्रकाशविवृतिः

गतधर्म्मपक्षता। षड्लक्षणावच्छेद्यं च षड्लक्षणत्वावच्छेद्यत्वमन्यथा षड्लक्षणानामेव प्रतियोगितयाऽसङ्गत्यापत्तेः। अभावे षड्लक्षणाभाव इत्यनुभवाद्बाध इत्यत उक्तं भाववृत्तीति। तच्चाभावविशेषणम्। न च षट्त्वावच्छिन्नात्यन्ताभावो द्रव्येऽपि वर्त्तत एव एकसत्त्वेऽपि द्वयमिह नास्तीतिप्रतीतेस्तथा च बाध इति वाच्यम्, तस्य पूर्वमेव दूषितत्वात्। न चैवं भाववृत्तीति व्यर्थं सप्तमभावानिषेधश्च षट्त्वस्य प्रतियोगितानवच्छेदकत्वादिति वाच्यम् प्रतियोगितापरं न व्यासज्यवृत्तिरिति घटशून्ये द्वित्वावच्छिन्नविरहवत् षट्शून्ये षट्त्वावच्छिन्नाभावाविरोधात्। अत एवाधिकरणभेदेनाभावभेदाभावात्। स एवाभावोऽभावेऽपीति भाववृत्तिपदोपादानेऽपि दोषतादवस्थ्यमित्यपास्तम्। भावेऽन्यतरप्रतियोगिसत्त्वेन तदनभ्युपगमात्। ननूक्तानुगतधर्मस्यापि भावघटितत्वाद्विकल्पस्तदवस्थः, न च भावत्वसमाधिकरणाभावप्रतियोगित्वं धर्मीति वाच्यम्, भावत्वसामानाधिकरण्यं हि भावत्वाधिकरणाधिकरणत्वमिति विकल्पग्रासतादवस्थ्यात्। मैवम्। व्यक्तिघटितत्वेऽपि सामान्येन रूपेण तत्प्रवेशे दोषाभावात्। अन्यथा कर्त्तृजन्यत्वानुमानेऽपि प्रसिद्धाप्रसिद्धकर्त्तृघटितत्वाविकल्पेन साध्यस्य(१) बाधाप्रसिद्ध्यन्यतरापत्तेः। एवं च मूलमपि सम्यगेव पक्षतावच्छेदकोभयसिद्धत्वे पक्षविकल्पस्यादोषत्वात् अन्यथा साध्यतदभाववत् पक्षविकल्पस्यापत्तेरिति। व्यासज्यवृत्तिधर्मः क्वापि प्रतियोगितावच्छेदको न भवतीतिमते लक्षणान्तरमाह—यद्वेति। अभावपदमन्योन्याभावपरम्। यद्यपि भाववृत्त्यभावपञ्चकस्यैवाभाववृत्तितया तत्सामानाधिकरण्यं द्रव्यत्वाभावे अस्त्येवाधिकरणभेदेनाभावभेदाभावात् तथापि भावरूपाधिकरणावच्छेदेनाभावपञ्चकसाहित्यं द्रव्यत्वाभावे निषेध्यमिति भावः। द्रव्यत्वं वेति। भाववृत्तित्वावच्छिन्नगुणाद्यन्योन्याभावपञ्चकव्यापकमित्यर्थः(२)। भावत्वं वेति। ननु षण्णामभावानां षडेव वाऽभावा व्यापकतया विवक्षिताः षट्त्वावच्छिन्नप्रतियोगिक एक एव वाऽभावस्तथा। नाद्यः। द्रव्यादौ गुणाद्यभावाभावा(३)

(१) साध्ये तस्येति पाठान्तरम्।

(२) द्रव्यत्वत्वं न तादृशाभावप्रतियोगितावच्छेदकमिति वार्थः।

(३) गुणत्वाद्यभावाभावेति पाठान्तरम्।

णवदेव भावजातीयं मेयं(१) वाच्यमेवेतिवत् अयोगव्यवच्छेदस्य

न्यायलीलावतीकण्ठाभरणम्

लक्षणवत्त्वं षोढा लक्षणवत्त्वमेको धर्म्मः स च प्रत्येकलक्षणवत्त्वेनैव षण्णां भावानां नवानां गुणवत्त्वमिव प्रत्येकगुणवत्तया तदयोगश्चाभावे प्रसिद्ध इह भावजातीये व्यवच्छिद्यत इत्यर्थः। ननु विशेषस्य भावजातीयस्याव्यभिचारे षड्लक्षणवत्त्वस्य कथं विशेषणत्वम्? न चेद्विशेषणत्वं तदा तत्सङ्गततया एवकारस्य कथमयोगव्यवच्छेदकत्वम्? विशेष्यं व्यभिचारि चेत् तदा सन्त्येव भावा इत्यतोऽनुरूपं दृष्टान्तमाह—प्रमेयं वाच्यमेवेतिवदिति। उपरञ्जकत्वेऽपि न दोष इत्यर्थः। तथापि दृष्टान्ते कथं अयोगस्याप्रसिद्धस्य व्यवच्छेद इति चेन्न विशेष्यतावच्छेदकधर्म्मस्य विशेषणतावच्छेदकधर्म्मव्याप्यत्वस्यैवात्र एवकारार्थत्वात् दार्ष्टान्तिकेऽपि तथात्वात् अयोगव्यवच्छेदार्थक-

न्यायलीलावतीप्रकाशः

रोपस्य हेतुत्वे मानाभावः, इदमिदं न नेदमिहेत्यनुभवस्यैव मानत्वात्। यद्वा आरोपितरजतत्वायामेव शुक्तौ नेदं रजतमिति रजतत्वाभावः प्रतीयते नान्यत्रेत्यन्वयव्यतिरेकयोस्तत्त्वात्। ततश्चेति। भावाभावभेदात् पदार्थविभाग आर्थः भावविभागः शाब्दः। तथा चाभावे षड्लक्षणाभावः प्रसिद्धो भावेषु निषिध्यते इति नाप्रसिद्धिः। प्रमेयमिति।

न्यायलीलावतीप्रकाशविवृतिः

सत्त्वेन व्यभिचारात। नान्त्यः। व्यासज्यवृत्तिप्रतियोगिताकाभावानभ्युपगमादिति चेत्, न। षड्लक्षणाभावषट्कनिष्ठाधेयत्वनिरूपिताधारत्वाभावव्याप्यं भावत्वमित्यर्थात्। द्रव्येऽभावपञ्चकसत्त्वेऽपि तदाधेयता न षट्त्वेनावच्छिद्यते अतिरिक्तवृत्तित्वात् षट्त्वस्य। अभावे तु तदाधेयता षट्त्वेनैव व्यासज्यवृत्तिधर्म्मस्य अभावप्रतियोगितानवच्छेदकत्वेऽपि आधेयतावच्छेदकत्वाविरोधात्। व्यासज्या(२)वृत्तिप्रतियोगिताकाभाववादिमतेनैवेदमित्येके। इदमिदं नेति। इतरसामग्रीतौल्येऽपि कदाचिद्घटान्योन्याभावस्य कदाचिद्घटत्वात्यन्ताभावस्य प्रतीतेरभेदेन घटारोपस्य संसर्गेण घटत्वारोपस्य च कारणत्वमित्यर्थः। यद्वेति। यद्यपीदं न सर्वत्रानुभवसिद्धं तथापि क-

(१) प्रमेयमिति प्रकाशादिधृतः पाठः। (२) व्यासज्यवृत्तीति द्वितीयपुस्तके पाठः।

पदार्थान्तरे भावत्वं नास्तीत्यन्ययोगव्यवच्छेदस्य वा विभागार्थत्वात् ।

अभावस्य च समानतन्त्रसिद्धस्याप्रतिषिद्धस्य न्यायदर्शने

न्यायलीलावतीकण्ठाभरणम्

त्वं च समभिव्याहारबलप्रतीयमानमादायेति विवक्षितत्वात् । पदार्थान्तर इति । षड्लक्षणवदेव भावजातीयं नान्यदित्यन्ययोगव्यवच्छेदोऽपि सम्भवतीत्यर्थः । ननु भावजातीयत्वेन षण्णामेवाभिधाने सिद्धसाधनमन्यथा चाप्रसिद्धिरेवेति चेन्न गुणवदेव द्रव्यमित्याद्ययोगव्यवच्छेदस्यापि एवमप्यनुपपन्नत्वप्रसङ्गात् । द्रव्यत्वनियतसामानाधिकरण्यबोधनमेवायोगव्यवच्छेद इति चेत् तुल्यं प्रकृतेऽपि । इदमत्राकूतम्--पदार्थो द्विविधो भावोऽभावश्च । षोढा द्रव्यादिरिति विभक्तविभागे भावत्वं षड्लक्षणवत्त्वानधिकरणानधिकरणत्वम् । भावत्वं च सत्तासम्बन्धित्वं सत्तासंम्बन्धश्च समवायेन त्रयाणामेकार्थसमवायेन सामान्यविशेषयोः स्वरूपसम्बन्धेन सत्तासमवाययोरविशिष्टः । ननु विभक्तविभागश्चेदयं तदाऽभावविभागो न श्रूयते इति तं समर्थयति--अभावस्येति । 'तेषु न लक्षितलक्षणात्वा' दित्यादिसूत्रे न्यायदर्शने समानतन्त्रेऽभावस्य व्युत्पादितत्वादत्र च तदप्रतिषेधात् परमतमप्रतिषिद्धमनुमतमितिन्यायेन सूत्रकृतस्तत्राभ्युपगमोन्नयनात् । न्यायेति । यथा गोतमेन मनस इन्द्रियत्वं नोक्तमप्रतिषेधादभ्युगतं चेत्यर्थः। तर्हि अप्रतिषेधादन्यत्राभ्युपगमोऽस्तु किं पदार्थान्तरव्युत्पादनेनेति न शङ्कनीयम्, द्रव्यादिपदार्थानामुद्देशलक्षणपरीक्षारूपं शाब्द(स्त्र?)मेवेदं पृथक् न स्यात, तथा च तत्त्वज्ञानार्थताभङ्गो निःश्रेयसहेतुताप्यस्य

न्यायलीलावतीप्रकाशः

प्रमेयत्वसमानाधिकरणात्यन्ताभावप्रतियोगि न वाच्यत्वमित्यर्थः । वाच्यत्वायोगस्याप्रसिद्धेः । पदार्थान्तरे अभाव इत्यर्थः । ननु चाभावस्य सूत्रकारेणाविभजनादप्रामाणिकत्वमेव तस्यानुमीयते (१)तत्कथं तत्रायोगप्रसिद्धिरित्यत आह--अभावस्य चेति । न त्वेवं द्रव्यादीनामप्यनभिधानं प्राप्तम्, तेषामपि समानतन्त्रेऽभिधानादित्यत आह--

---

(१) तदनुमतामित्युन्नीयते इति पाठान्तरम् ।

मानसेन्द्रियतासिद्धिवदत्राप्यविरोधात् अभ्युपगमसिद्धान्तसिद्धत्वात् ।

नीलं रूपमिति प्रतीतिश्च तमोविषयिणी यद्यपि अपसारितबाधा तदा (१)रूपमेव तमो, न द्रव्यादिवैधर्म्यम् । अथ

न्यायलीलावतीकण्ठाभरणम्

भज्येत, न हि परमताभ्युपगममात्रेणैव तन्निर्वहेत् । अभ्युपगमेति । सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तानां मध्येऽभ्युपगमसिद्धान्तस्यापि समानतन्त्रोक्तत्वादित्यर्थः ।

तमसः पदार्थान्तरत्वं निरस्यति—नीलं रूपमिति । नीलं रूपं तम इतिप्रतीतिर्नीलरूपं तम इति वा । आद्यमाह—नीलमिति । द्वितीयमाह—

न्यायलीलावतीप्रकाशः

अभ्युपगमेति । द्रव्यादिविभागाकरणे पृथक्शास्त्रत्वानुपपत्तिः । न च तत्तदनभ्युपगतपदार्थनिषेधप्रणयनेन तदुपपत्तिः कल्पनागौरवापत्तेः । विनिगमकं च भावनिरूपणाधीननिरूपणत्वमवसेयमित्यर्थः ।

तमसो भावान्तरत्वं दूषयति—नीलमिति । तदारोप एवेति । तथा च न ततो विषयसिद्धिरबाधितबुद्धेरेव तत्सिद्धेरित्यर्थः । स्वप्नावभा-

न्यायलीलावतीप्रकाशविवृतिः

चिदन्वयव्यतिरेकाभ्यां बाधकं विना सामान्यतः कारणत्वकल्पनेऽन्यत्राप्याहार्यारोपकल्पनमिति भावः । वस्तुतः प्रतियोग्यारोपस्यानुगतस्याभावप्रमां प्रति गुणत्वेन हेतुत्वेन यद्विशेषयोरितिन्यायात्सामान्यहेतुतेति कल्पनेति विशेषनिषेधो लघुः विशेषनिषेधेन च शेषविधिर्गुरुर्निषेधप्रतिपादनस्योभयगर्भत्वादित्यर्थः । तद्यभाव एवाभिधीयतां शास्त्रे भावस्यैव चाभ्युपगमसिद्धान्तत्वमस्त्वित्यत आह—विनिमगकं चेति । तत्रापि लाघवमेव विनिगमकमिति भावः । मूलोक्तयुक्त्या तमस आलोकाभावत्वासिद्धावपि भावान्तरत्वनिषेधः सिद्ध्यत्येवेत्याशयेनाह—तमसो भावान्तरत्वमिति । ननु चलतीतिबुद्धिरेव भावत्वसाधि-

---

(१) नीलमित्यधिकः पाठः कण्ठाभरणसम्मतः प्रतीयते ।

सम्भवद्बाधा तदा आरोप एव, स्वभावभातनीलिमवत् । अथ रू-पाश्रयत्वबुद्धिस्तमसि तदा बाधाबाधाभ्यां न पदार्थान्तरत्वम् ।

क्षणावच्छेदकश्चोपाधिरन्त्यशब्द एव । स चोपान्त्यशब्दना-

न्यायलीलावतीकण्ठाभरणम्

अथ इति । बाधाबाधाभ्यां प्रकारान्तराभावादित्यर्थः । न चाबाधितनीलरूपवत्त्वप्रतीत्या जलाद्यष्टकभेदसिद्धौ निर्गन्धत्वेन पृथिवीभेदाद् दशमं द्रव्यमिदमिति वाच्यम्, इदानीं पदार्थान्तरत्वमात्रस्यैव निरसनीयत्वेनाभिमतत्वात् द्रव्यत्वेऽपि प्रकृतविभागव्याघाताभावात् साधयिष्यते चाभावत्वमस्येति भावः ।

क्षणावच्छेदकोपाधिना प्रसक्तं पदार्थातिरेकं परिहर्त्तुमेकदेशिमतमुपन्यस्यति—क्षणेति । शब्दाजनकत्वं शब्दस्यान्त्यत्वम् । ननु कथमस्य क्षणावच्छेदकत्वमत आह––स चेति । चो हेतौ नाशसामग्रीसमवहितस्यैव तस्योत्पादात् क्षणमात्रस्थायित्वं तस्येत्यर्थः । उत्पादकसामग्र्येव यदि विनाशिका तदाऽन्त्यशब्दोत्पादनाशयोर्यौगपद्यमापन्नमित्या-

न्यायलीलावतीप्रकाशः

तेति नीलभ्रममात्रोपलक्षणम् । तदा बाधेति । नीलरूपवत्प्रतीतिर्यद्यबाधिता तदा पृथिव्येव तमः, अथ बाधिता तदा न ततो विषयसिद्धिः । न च ततोऽन्यत्तस्य भावत्वसाधकमस्तीत्यर्थः । वस्तुतस्तत्र बाधकमेव वक्ष्यत इति भावः ।

अन्त्य इति । शब्दाजनक इत्यर्थः । स चेति । चो हेतौ ।

न्यायलीलावतीप्रकाशविवृतिः

केत्यत आह––वस्तुत इति । तथा चालोकाभाव एव तम (१)इति भावः ।

महाप्रलयानङ्गीकर्त्तृमते अन्त्यशब्दाप्रसिद्धेराह––शब्दाजनक इति ।

---

(१) "न चैवमस्माभिरभ्युपगम्यते तमःशब्द निर्विषय इति । तमःशब्दस्य सविषयत्वे सूत्रव्याघातः । द्रव्यगुणकर्म्मनिष्पत्तिवैधर्म्याद् भाभावस्तम इति । न सूत्रार्थापरिज्ञानात् निराकृततेजःसम्बन्धीनि द्रव्यगुणकर्म्माणि तमःशब्देनाभिधीयन्ते तस्मान्न सूत्रव्याघातः ।"—इति न्यायवार्त्तिककाराः ।

"तस्माद् रूपविशेषोऽयमत्यन्तं तेजोऽभावे सर्वतः समारोपितस्तम इति प्रतीयते ।" —इति न्यायकन्दलीकृतः ।

"अन्धकारस्तु तेजोविशेषसामान्याभावः ।"—इति सामान्यलक्षणायां दीधितिकाराः । अत्र जगदीशः—"तेजोविशेषेति । महाप्रभात्वावच्छिन्नाभाव इत्यर्थः । उद्भूतानभिभूतरूपवन्महातेजःसामान्याभावस्तु नार्थः, अनुद्भूतत्वाभावाद्यात्मकस्योद्भूतत्वादेरतीन्द्रियतया तद्घटितधर्म्मावच्छिन्नाभावस्यायोग्यत्वेन प्रत्यक्षायोगात् ।"

श्यः। न च तस्यैवोत्पादनाशहेतुत्वे युगपद्विनाशोत्पादप्रसङ्गः, अन्त्य
शब्दसहकृतस्यैव तस्य नाशहेतुत्वात् । एतेन प्रध्वंसाहेतुकत्वमपा
स्तम् । अत्र च टीका—'यथान्त्य उपान्त्येन' इति कार्यकारण
विरोधिव्याख्यानावसरे इत्येके । तन्न । एवं सति ज्ञानादिषु द्वि

न्यायलीलावतीकण्ठाभरणम्

शङ्कयाह—न चेति । विनाशसामग्र्यां प्रतियोगिनोऽन्त्यशब्दस्यापि
प्रवेशात् तद्विलम्बात् क्षणमात्रं विलम्ब इति न यौगपद्यमित्याह—
अन्त्येति । ननु क्षणिकस्यैव भावी विनाश इति किन्तस्य कारणान्तरा
पेक्षया तथा चाहेतुक एव तद्विनाशोऽस्त्वित्यत आह—एतेनेति । प्रध्वं
सस्याहेतुकत्वमपास्तमित्यर्थः । नाशहेतोरुपान्त्यशब्दस्य प्रतियोगि
नश्च प्रामाणिकत्वादिति भावः । एकदेशी स्वोक्ते "गुणाकिरणावली"
कारसम्मतिं दर्शयति--अत्र चेति । 'टीका' किरणावली । ननु तत्र नैतदु
क्तमित्यत आह—कार्येति । कार्यस्य कारणं विरोधीति पाकजप्रक्रियाया
मेक एवाग्निसंयोगो रूपादिकमुत्पादयिष्यति नाशयिष्यति चेति द
र्शयता यथा अन्त्य उपान्त्येनेति दर्शितमित्यर्थः । एवमिति । अन्त्यशब्द
आकाशवृत्तिर्ज्ञानादिकं नावच्छिन्द्यादित्यर्थः । ननु व्यधिकरणोऽपि

न्यायलीलावतीप्रकाशः

तथा च नाशकसमवहितस्यैव तस्योत्पादादुत्पत्त्यव्यवहितो
त्तरक्षण एव नाशान्नानेकक्षणावस्थयित्वमित्यर्थः । अन्त्यशब्देति । प्र
ध्वंसे प्रतियोगिनो हेतुत्वादिति भावः । एतेनान्त्यशब्दसहितोपान्त्य·
शब्दनाशकत्वेन । [प्रध्वंसाहेतुकत्वमिति । प्रध्वंसस्य अहेतुकत्वं प्रति·
योग्यतिरिक्तकारणानपेक्षत्वमर्थः । अपास्तमिति । उपान्त्यापेक्षणा·
दिति] 'टीका' गुणकिरणावली । तत्र पाकजप्रक्रियायामेकस्योत्पादक·
त्वनाशकत्वे यथोपान्त्यस्यान्त्ये इत्युक्तम् । क्वचित्कार्यकारणाविरोधीति
पाठः । तत्राविरोधिनं दर्शयित्वा तद्विरुद्धत्वेन कार्यकारणविरोधोऽपि
दर्शित इत्यवसरार्थः । एवं सतीति । अन्त्यशब्दाप्रतिसन्धानेऽपि(१) क्षण·
व्यवहारादन्य एवायमुपाधिर्वाच्य इत्यर्थः । ननु तत्रापि नोपाधेर·

न्यायलीलावतीप्रकाशविवृतिः

एतेनेति । हेतुद्वयसूचनायोभयोपादानम्, दार्ष्टान्तिकाभावे दृष्टान्तानुप·

---

(१) तदप्रतिसन्धानेऽपीति दीधित्यनुसारी पाठः ।

त्रिक्षणावस्थायित्वव्यवहारो न स्यात् । देशान्तरोदीरितान्त्यशब्दोपाधिकोऽसाविति चेन्न, उपाधेरनिश्चयेनान्यत्र निश्चयेन व्यवहारानुपपत्तेः । अवष्टब्धदेशविभागाभावोपहितः सूर्यपरिस्पन्द इत्यन्ये । स्पन्दस्य स्वरूपाभेदेऽपि विभागाभावविभागतत्पूर्वसंयोगनाशोत्तरसंयोगात्मकोपाधिचतुष्कान्यतमः क्षणव्यवहारहेतुरित्यपरे । तथा च टीका—'निमेषस्य चतुर्थो भागः क्षण' इति । तन्न ।

न्यायलीलावतीकण्ठाभरणम्

शब्दः कालद्वाराऽवच्छेत्स्यतीत्याह—देशान्तरेति । उपाधिनिश्चयाधीन उपहितप्रत्ययस्तदनिश्चयेन कथं तत् स्यात् तन्निश्चयश्च न प्रत्यक्षादिनेत्याह—उपाधेरिति । मतान्तरमाह—अवष्टब्धेति । विभागाभावोऽत्र विभागप्रागभाव उक्त इति स्फोरणार्थमवष्टब्धेति । अवष्टब्धः संयुक्त इत्यर्थः । स्वजन्यविभागप्रागभावावच्छिन्नः सूर्य्यपरिष्पन्दः कालमवच्छिद्य ज्ञानादौ क्षणिकत्वव्यवहारं करोतीत्यर्थः । अवान्तरप्रलये क्षणगणनास्ति न तु सूर्य्यपरिष्पन्द इत्यनुशयेन मतान्तरमाह—स्पन्दस्येति । स्वजन्यविभागप्रागभावाच्छिन्नः स्पन्दः स्वनाश्यसंयोगसमवहितो विभाग उत्तरसंयोगप्रागभावसहितः पूर्व्वसंयोगनाशः स्वनाश्यकर्म्मसहित उत्तरसंयोग इति चत्वार उपाधय इत्यर्थः । प्रलये

न्यायलीलावतीप्रकाशः

भाव इत्याह--देशान्तरेति । स्वरूपसन्नेवोपाधिर्न क्षणव्यवहारहेतुः किन्तु तन्निश्चयः स नास्त्येवेत्याह—उपाधेरिति । अवष्टब्धेति । अवष्टब्धः संयुक्तो देशस्तस्य विभागाभावः । अवष्टब्धग्रहणात् न प्रागभावरूपस्तदुपहितः । तथा च स्वजन्यविभागप्रागभावविशिष्टः (१) स्पन्दः क्षणोपाधिस्तस्यैकक्षणमात्रस्थायित्वादित्यर्थः । न चैवं विभागोत्पत्तौ तन्नाशात् क्षणव्यवहारो न स्यात् प्रलयकाले च रवेरभावादतो मतान्तरमाह—स्पन्दस्येति । संयोगनाश इत्यत्रोत्तरदेशसंयोगप्रागभावसहित

न्यायलीलावतीप्रकाशविवृतिः

पत्तौ यथेत्ययुक्तमतस्तदुपदर्शयति—तत्र पाकजेति । अवष्टब्धेति । अनेन

---

(१) स्वजन्येति । विभागस्याव्याप्यवृत्तित्वात् । आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकस्य कर्म्मणोऽवयवान्तरनाशाद् विभागनाशेऽप्यनुवृत्तेश्चोक्तं प्रागभावेति । इति दीधितिः ।

त(अ?)त्राभावस्वरूपं वोपाधिः, कर्मस्वरूपं वा, तयोः संबन्धो वा। नाद्यौ। तयोरनेककालव्यापित्वात्। नान्त्यः (न तृतीयः ?)। तस्या-

---

न्यायलीलावतीकण्ठाभरणम्

चाणुकर्म्मण एव उपाधित्वादिति भावः।

[स्पन्दस्येति। संयोगनाश इत्यत्र उत्तरदेशसंयोगप्रागभावसहित इति शेषः। कर्म्मणः स्वजन्यविभागप्रागभावसहितस्य, विभागस्य स्वनाश्यसंयोगसहितस्य, संयोगनाशस्य च उत्तरदेशसंयोगप्रागभाववत कर्म्मणश्च स्वजन्योत्तरसंयोगसहितस्य क्षणावच्छेदकोपाधित्वम्, न ह्युक्तयोर्द्वयोः पूर्व्वापरकालताधीसम्बन्ध इत्यर्थः, प्रलये चाणुकर्म्मणस्तथाभाव इति भावः।] निमेषोऽक्षिपक्ष्मस्पन्द एकः। अभावस्वरूपमिति। विभागप्रागभावस्वरूपम्। उपलक्षणं चैतत् पूर्व्वसंयोगनाशादयोऽपि त्रयो द्रष्टव्याः। न तृतीय इति। तृतीयपक्षस्यापि पूर्व्वदोषेणैव दुष्टत्वे पृथक् दोषाभिधानं तदुभयस्वरूपस्थैर्य्याधीनमेव तदुभयसम्बन्धस्यापि स्थैर्य्यमिति कृत्वा। ननु तदुभयस्वरूपादन्य एव तदुभयसम्बन्धः क्षणमात्रस्थायी कश्चित्

न्यायलीलावतीप्रकाशः

इति शेषः। कर्मणः स्वजन्यविभागप्रागभावसहितस्य विभागस्य स्वनाश्यसंयोगसहितस्य संयोगनाशस्य चोत्तरसंयोगप्रागभाववतः, कर्मणः स्वजन्योत्तरसंयोगसहितस्य क्षणावच्छेदकोपाधित्वं न ह्युक्तयोर्द्वयोर्द्वयोः पूर्वापरकालभावी सम्बन्ध इत्यर्थः। प्रलये चाणुकर्मणस्तथाभाव इति भावः। दूषयति—अत्रेति। तस्येति। स्वरूपमेव तयोः सम्बन्धस्तच्चानेकक्षणवृत्त्येवेत्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

दि स्वनाश्यसंयोगसमानकालत्वं विभागाभावस्य सूचितमिति स प्रागभाव एव पर्य्यवस्यतीति भावः। अन्यविभागप्रागभावोपधानमन्यदापीति विशेषयति—स्वजन्येति। संयोगनाश इत्युपलक्षणम्, विभागः स्वनाश्यसंयोगसहित इत्यपि द्रष्टव्यम्।

नेककालव्यापित्वे क्षणव्यवहारविरोधात् । एकक्षणावस्थायित्वे च क्षणिकत्वापत्तेः । समानाधिकरणौ सूर्यसंयोगविभागावित्यन्ये । तन्न, एतद्रूपद्वयं वा क्षणोपाधिरनयोः सम्बन्धो(१) वा एतेषां मेलको वा । नाद्यौ । तयोरनेककालव्यापित्वात् । न तृतीयः ।

न्यायलीलावतीकण्ठाभरणम्

स्यादित्यत आह—एकक्षणस्थायित्व इति । न चापाद्याविशेषः स्वाधिकरणक्षणोत्तरानुत्तरत्वविशिष्टस्वाधिकरणक्षणाव्यवहितोत्तरक्षण-वृत्तिध्वंसप्रतियोगित्वेन स्वसमानकालीनकादाचित्काभावप्रतियोग्यसमानकालीनत्वस्यापादनात् । समानाधिकरणाविति । स्वनाशकसंयोगसमानकालीनो विभागः स्वनाशकविभागसमानकालीनसंयोगो वेत्यर्थः । एवं च नातिप्रसंगः । एतद्रूपद्वयमिति । उक्तसंयोगविभागद्वयमित्यर्थः । एतेषामिति । संयोगविभागसम्बन्धानामित्यर्थः । तयोरिति । स्वरूप-

न्यायलीलावतीप्रकाशः

एकेति । न चात्र साध्याविशेषः स्वसमानकालीनकादाचित्काभावप्रतियोग्यसमानकालीनत्वमेककालावस्थायित्वम्, क्षणिकत्वं च स्वाधिकरणक्षणोत्तरानुत्तरत्वविशिष्टस्वाधिकरणक्षणोत्तरक्षणवृत्तिध्वंसप्रतियोगित्वमित्यर्थात् । समानाधिकरणाविति । स्वनाशकसंयोगसमानकालीनो विभागः स्वनाशकविभागकालीनश्च संयोग इत्यर्थः । तेन नातिप्रसङ्गः । सिद्धान्ती स्वपक्षे दोषमभ्युपेत्य पूर्वपक्षिणं क्षणिकपदार्थसिद्धौ

न्यायलीलावतीप्रकाशविवृतिः

स्वसमानेति । अत्रात्यन्ताभावमादायासम्भववारणाय कादाचित्केत्यभावविशेषणम् । प्रतिक्षणं कस्यचिदुत्पत्तिरित्यादिसिद्धान्ताच्चेदं नेयम् । चरमध्वंसस्तु महाप्रलयानङ्गीकारान्नास्त्येवेति न तत्रातिव्याप्तिशङ्का, तत्स्वीकारे तु भावत्वमपि विशेषणम् । केचित्तु तदतिव्याप्तिवारणाय(२)कादाचित्काभावपदं प्रागभावपरमित्याहुः । तच्चिन्त्यम् । चरमक्षणिकाव्याप्तेः । स्वाधिकरणेति । स्वं लक्ष्यम् । अग्रिमप्रतीकमात्रं घटादावतिव्याप्तमिति विशिष्टपर्यन्तं चरमक्षणविशेषणम् ।(३)

---

(१) 'योः समवायो' वा । (२) 'व्याप्तेर्निरासाय' ।

(३) 'न तु प्रथमक्षणविशेषणमित्याधिकः पाठो द्वितीयपुस्तके ।

तस्यैव क्षणिकत्वस्वीकारात् । सत्यं, किं पुनः क्षण(१) सिद्धौ

न्यायलीलावतीकण्ठाभरणम्

द्वयसम्बन्धयोरित्यर्थः । तस्यैवेति । मेलकस्यातिरिक्तस्य क्षणिकत्व स्वीकारप्रसङ्गादित्यर्थः । एकदेशिनां मते तु पूर्वपक्षिणोक्तानि दूषणानि अङ्गीकृत्य सिद्धान्ती पृच्छति--सत्यं किं पुनरिति । क्षणसाधकेनैव

न्यायलीलावतीप्रकाशविवृतिः

क्षणद्वयावस्थायिज्ञानादावतिव्याप्तिः स्वाधिकरणक्षणानुत्तरत्वमात्रे चासम्भव इत्युत्तरानुत्तरत्वपर्यन्तम् । न चाग्रिमस्वाधिकरणक्षणोत्तर पदवैयर्थ्यं ध्वंसस्य प्राक्कालावृत्त्याऽर्थगत्यैव तल्लाभादिति वाच्यम्, ध्वंसपदस्य कादाचित्काभावपरतया प्रागभावमादाय कार्यमात्राति व्याप्तेरिति मिश्राः । केचित्तु ध्वंसपदं न स्वध्वंसपरं किन्तु सामान्यपर मिति(२)प्रागभावध्वंसात्मकघटादिप्रतियोगितया ध्वंसेऽतिव्याप्तिवार णाय तदिति वदन्ति । अत्र मिश्राः । घटध्वंसे पटो नेतिप्रतीत्याऽ भावाधिकरणकाभावान्तरानभ्युपगमेन घटध्वंस एव पटाभाव इत्या गतम् । एवं च पटोत्पत्त्यव्यवहितोत्पन्नघटध्वंसप्रतियोगिनि पटेऽ तिव्याप्तिरिति ध्वंसपदस्य स्वध्वंसपरत्वावश्यकत्वे कथमुक्तातिव्या प्तिसम्भवो येन विशेषणमर्थवदिति दूषणं प्रयच्छन्ति । तच्चि न्त्यम् । अधिकरणान्तरस्वीकृतस्यैव पटात्यन्ताभावस्य घटध्वंसे पटो नेतिप्रतीत्या विषयीकरणे कुतो घटध्वंसस्य पटात्यन्ताभावात्मक त्वम्, येन स्वध्वंसपरं ध्वंसपदमिति तस्य सामान्यपरत्वात् । यत्तु वृत्तिपदस्य व्यापकत्वमर्थ इति स्वकाले प्राक्काले च तद भावादसम्भववारणाय स्वाधिकरणक्षणोत्तरेति(३) । तन्न, तथा सति विशिष्टपर्यन्तव्यर्थतापत्तेः । चरमक्षणिकाव्याप्तिश्चैतन्मते तदनभ्युपग मादेव निरस्या । यत्तु चरमक्षण(पद?)स्य कालोपाधिमात्रवाचकतया महाप्रलयेऽपि चरमध्वंसात्मककालोपाधिसत्त्वान्न तत्रातिव्याप्तिरिति मतम्, तदबोधात् । एवमपि स्वाधिकरणक्षणोत्तरत्वाप्रसिद्धेरिति

(१) 'क्षणिकासि' ।

(२) अत्र ध्वसंपदेन स्वपरसाधारणो भावाभावसाधारणो ध्वंसो विवक्षित इत्यर्थः ।

(३) विशेषण मित्यधिकं द्वितीयादर्शपुस्तके ।

मानं, क्षणवेदनम् । किं क्षणवेदनम् । अस्तमितपूर्वापरभाववस्तु-वेदनं वा क्रियावेदनं वा(१) तदुभयसंसर्गवेदनं वा । नाद्यान्त्यौ । असिद्धेः । नापरौ । तयोः स्थिरत्वात् । नानाक्षणवर्तिनो घटादय

न्यायलीलावतीकण्ठाभरणम्

प्रमाणेन तदवच्छेदक उपाधिरपि कश्चित् विषयीकर्त्तव्यः, स च परिगणितपदार्थ एवान्तर्भविष्यतीति न तदनुरोधेन पदार्थान्तरस्वीकार इति भावः । पूर्व्वपक्ष्याह—क्षणवेदनमिति । प्रत्यक्षमेव तत्र प्रमाणमिति भावः । प्रत्यक्षस्यालम्बनं पृच्छति—किमिति । अस्तमितेति । पूर्व्वापरभावः कार्य्यकारणभावः । तथा च तस्य न किञ्चित् कारणं न वा किञ्चित् कार्य्यं तादृशस्य जगद्विलक्षणस्य वस्तुनो वेदनमित्यर्थः । यद्वा स्वसमानकालीनकादाचित्काभावप्रतियोग्यसमानकालीवस्तुवेदनमित्यर्थः । क्रियावेदनमिति । सूर्य्यादिस्पन्दवेदनमित्यर्थः । तत्कार्येति । क्रियाकार्य्यो विभागस्तस्य प्रागभाववेदनमित्यर्थः । तत्संसर्गेति (२)क्रियाविभागप्रागभावयोर्यः संसर्गस्तद्वेदनमित्यर्थः । नाद्यान्त्याविति । न जगद्विलक्षणं वस्तु न वा क्रियया सह विभागप्रागभावस्य संसर्गः केनचिन्मानेन विषयीक्रियते इत्यर्थः । तयोरिति । क्रियातज्जन्यविभागप्रागभावयोरित्यर्थः । ननु यदि क्षणवेदनं नास्ति तदा नानाक्षणवर्त्तिनो घटादय इतिविशि-

न्यायलीलावतीप्रकाशः

मानं पृच्छति—सत्यं किं पुनरिति । अस्तमितेति । स्वसमानकालीनप्रागभावप्रतियोग्यसमानकालीनवस्तुवेदनमित्यर्थः । क्रिया स्पन्दः तत्कार्यो विभागः । असिद्धेरिति । तादृशे वस्तुनि मानाभावात्प्रत्यक्षस्येन्द्रियसम्बन्धाधीनत्वात् उत्तरकाले विषयस्यासत्त्वात् तस्य च वर्त्तमानार्थग्राहित्वात् नाप्यनुमानं व्याप्तेरसिद्धेरित्यर्थः । ननु क्षणवेदनस्य न

न्यायलीलावतीप्रकाशविवृतिः

यथाश्रुते व्योमादावतिप्रसङ्गोऽत आह—स्वसमानेति । तदुभयसंसर्गस्य तदुभयरूपत्वे तयोः स्थिरत्वादित्येव दूषणमतिरिक्तत्वे च तुल्य एवाद्यन्तयोर्दोष इत्यभिप्रेत्यासिद्धिं विवृणोति—तादृश इति ।

(१) तत्कार्य्यप्रागभाववेदनं वा तत्संसर्गवेदनं वेत्येवं पाठः कण्ठाभरणादिसम्मतः ।

(२) तदुभयसंसर्गेति पाठ आदर्शमूलसम्मतः ।

इति प्रत्यक्षादेव क्षणनिरीक्षणमस्तीति चेन्न, क्रमिकसंयोगविभा-
गाद्युपाधित एव तत्प्रतीतेः। अनुमानादस्तीति चेन्न, लिङ्गा-
भावात्। क्षणप्रयोगात्तदनुमानमस्तीति चेन्न, निरूपिते वस्तु-

न्यायलीलावतीकण्ठाभरणम्

ष्टानुभवाधीनोऽभिलाप एव न स्यात्, तथा च प्रत्यक्षादेव क्षणवेदः कार्य्येण कारणमपीन्द्रियसन्निकर्षाद्युन्नेष्यत इत्याह—नानेति। अ- विशिष्टानुभवः क्रमवत्संयोगविभागव्यवच्छेदं घटस्य विषयीकरोति न तु त्वदभिमतं क्षणं तत्काले सन्निकर्षाभावात्, तदनन्तरं च विष- यस्यैवाभावात् सम्बद्धवर्त्तमानस्यैव प्रत्यक्षविषयत्वात् प्रतीतेरन्यथो- पपत्त्या प्रत्यक्षसामग्र्यन्तरकल्पनस्याप्यनवकाशादित्यभिप्रायेणाह- क्रमिकेति। ननु आनुमानिकं क्षणवेदनं स्यादित्यत आह—अनुमानेति क्षणमात्रस्थायिना व्याप्तिग्रहाभावात् पक्षधर्म्मताग्रहाभावात् व्याप्त पक्षधर्मो लिङ्गं प्रकृते न सम्भवतीत्याह—नेति। ननु क्षणपदं कस्य- चित् वाचकं पदत्वात् गवादिपदवदित्यनुमानं स्यादित्याह—क्षणेति यदि पदं प्रयुज्येत तदा लिङ्गं भवेत् प्रयोगश्च सङ्केतग्रहाधीनो न क्ष- णपदार्थोपस्थितिं विनात्यन्योऽन्याश्रय इत्याह—नेति। ननु शब्दोऽर्थ

न्यायलीलावतीप्रकाशः

लिङ्गभावेन क्षणे मानत्वं येन विषयाज्ञाने तदज्ञानात् क्षणानुमिति स्यात् किं तु घटज्ञानवत् स्वरूपसदेव मानमित्याह--नानेति। उक्त- युक्त्या न क्षणिकस्य प्रत्यक्षत्वमिति क्रमिकाविशिष्टसंयोगादिरुपाधि- रेव तद्विषय इत्याह—क्रमिकेति। लिङ्गाभावादिति। व्यापकानिरू- पणे व्याप्त्यज्ञानादित्यर्थः। अतिरिक्तं च वैशिष्ट्यं त्वया नाभ्युपेय इति भावः। क्षणप्रयोगादिति। नयनाद्यात्मकव्यवहारस्य क्षणेऽसम्भ- वात् क्षणशब्दप्रयोगस्तत्र मानमित्यर्थः। निरूपित इति। विषये निरू-

न्यायलीलावतीप्रकाशविवृतिः

तथा च विषयाज्ञाने क्षणवेदनस्याज्ञानात् न लिङ्गत्वमिति भावः स्वरूपासिद्धिदेशनाभ्रमं वारयति—व्यापकेति। व्यापकस्य क्षणस्य ज्ञाने व्याप्त्यज्ञानादित्यर्थः। ननु कर्माणि विभागप्रागभावस्य यद्वैशि- ष्ट्यं तत्प्रतीतमेव व्यापकं भविष्यतीत्यत आह--अतिरिक्तं चेति। भा-

नि क्षणशब्दप्रयोगः, तस्माच्च तदनुमानमितीतरेतराश्रयात् । न च प्रत्यक्षानुमानयोरभावे मानान्तरावकाशः । ततो मानाभावान्नास्त्येव क्षणिकः क्षणः इति । किं तदा तद्व्यपदेशबीजम् । ज्ञानविशेषः । कस्तस्य विषयः । कर्मरूपं(१) तज्जनित(२)विभागप्राग-

न्यायलीलावतीकण्ठाभरणम्

पत्तिर्वा क्षणवेदकोऽस्तु इत्यत आह—न चेति । तन्निरासप्रमाणावष्टम्भोऽत्र मूलम् । सिद्धान्ती स्वपक्षमुपसंहरति—तत इति । क्षणिकपदार्थान्तरावच्छेद्यः क्षणः कालोपाधिविशेषो नास्तीत्यर्थः । पूर्वपक्षी पृच्छति—किमिति । न हि व्यपदेशोऽप्यपह्नोतुं शक्य इति भावः । उत्तरं ज्ञानविशेष इति । कस्तस्येति । ज्ञाने विषय एव विशेषो न च तादृशो विषयस्त्वयाऽभ्युपगम्यत इति भावः । उत्तरं कर्मस्वरूपमिति ।

न्यायलीलावतीप्रकाशः

ते शब्दप्रयोगरूपव्यवहारनिरूपणं ततश्च विषयसिद्धिरित्यन्योन्याश्रय इत्यर्थः । नास्त्येवेति । क्षणव्यवहारहेतुः क्षणिकार्थो नास्त्येवेत्यर्थः । कारणमात्रप्रश्नस्यातितुच्छतयाऽसाधारणकारणं पृच्छति—किं तदेति । अन्यासाधारणकारणाभावात् क्षणशब्द एव तदनुमापक इति भावः । उत्तरं—ज्ञानविशेष इति । क्षणव्यवहारे व्यवहर्त्तव्यज्ञानविशेषः कारणमित्यर्थः । विषयविशेषनियतस्य ज्ञानस्य व्यवहारविशेषजनकत्वमिति विषयविशेषं पृच्छति—कस्तस्येति । उत्तरं कर्मेति । आक्षिपति—

न्यायलीलावतीप्रकाशविवृतिः

परमतिरिक्तं वैशिष्ट्यं तत्राङ्गीक्रियते न तु क्षणरूपातिरिक्तपदार्थवादिना त्वयाऽपीत्यर्थः । यैरप्यङ्गीक्रियते तैरपि नित्यमिति न तस्य क्षणिकत्वमिति भावः । केचित्तु न व्यापकनिरूप्यं व्याप्तिवैशिष्ट्यं ब्रूमः किं त्वतिरिक्तमेव व्यापकानिरूप्यं तदित्यत आह—अतिरिक्तं चेति । अर्थो भावश्च पूर्वोक्त एवेति वदन्ति । एवं चेयं फक्किका किमितीत्यनन्तरमत्र तु तल्लिखनं प्रमादा(३)दिति मिश्राणां लिखनं चिन्त्यम् ।

अन्त्यशब्दस्य क्षणिकस्य स्वीकारात् सामान्यनिषेधोऽयुक्त इत्यत आह—क्षणव्यवहारहेतुरिति । पूर्वोक्ते(४)रिति शेषः ।

---

(१) 'कर्म्मस्वरूपम्' । (२) तज्जन्येति कण्ठाभरणधृतः पाठः ।
(३) प्रामादिकं तल्लिखनमिति पाठान्तरम् । (४) पूर्वोक्तयुक्तेरिति पाठान्तरम् ।

भावादिरूपश्चोपाधिः। केवलेऽपि तद्धुपाधावुपाधिमति च तद्व्यवहारप्रसङ्गः। विशिष्टमिति चेन्न। किं वैशिष्टयं, ज्ञानविशेपस्तस्य

न्यायलीलावतीकण्ठाभरणम्

अतिप्रसङ्गवारणाय तस्यावच्छेदकमाह—तज्जन्येति। मिलितौ द्वौ विषयौ न च तयोरन्यदा सत्त्वमिति नातिप्रसङ्ग इति भावः। ननु विशकलिताभ्यां कर्म्मविभागप्रागभावाभ्यां यदि क्षणव्यवहारः स्यात् तदा तदवस्थ एवातिप्रसङ्ग इति विशिष्टे तदुभयविषयत्वं वाच्यं वैशिष्टयं चातिरिक्तं त्वया नाभ्युपगम्यत इति एकग्रन्थेन पूर्व्वपक्षवाद्याह—केवल इति। किं वैशिष्ट्यमित्यन्तेन। सिद्धान्त्याह—ज्ञानविशेष इति। विलक्षणज्ञानमेव वैशिष्टयं न तु पदार्थान्तरं क्लृप्तस्य ज्ञानस्यैव विशिष्टव्यवहारार्पकत्वे सम्भवति पदार्थान्तरकल्पनाया गौरवपराहतत्वादिति भावः। एवं च ज्ञानविशेषं स्पन्दविभागप्रागभावौ च विषयीकुर्व्वत्तज्ज्ञानं विशिष्टव्यपदेशं करोति। स च ज्ञानविशेषो विशिष्टव्यवहारान्यथानुपपत्त्या सिद्धो जीवनयोनियत्न इव

न्यायलीलावतीप्रकाशः

केवलेऽपीत्यादि किं वैशिष्ट्यमित्यन्तेन। केवल उपाधौ विभागप्रागभावादिमात्रज्ञाने उपाधिमति च केवलकर्ममात्रज्ञाने च सति क्षणव्यवहारप्रसङ्ग इत्यर्थः, अक्षादिपदवत् क्षणशब्दस्य नानार्थत्वापत्तिश्चेति भावः। ननु विभागप्रागभावादिविशिष्टं कर्म तद्विषय इति नोक्तो दोष इत्याह—विशिष्टमिति। वैशिष्टयमन्यत्र विशेषणविशेष्यसम्बन्धः, स चात्र नास्तीत्यभिप्रेत्याह—किमिति। ज्ञानविशेष इति। विजातीयज्ञानमि-

न्यायलीलावतीप्रकाशविवृतिः

[उत्तरमित्यनन्तरं ददातीति शेषः। एवमग्रेऽपि।(१)] अक्षादिपदवदिति। स्वजन्यविभाग (प्राग?) भावादिलक्षणार्थभेदादिति भावः। विजातीयं ज्ञानमिति। क्षणमात्रस्थायिपदार्थाभावाद्विजातीयं ज्ञानमेव सार्वलौकिकक्षणव्यवहारहेतुरिति भावः। एतेन ज्ञानस्यापि व्यवहारविशेषजनकतानियामको विषयविशेष एवेति विषयविकल्पस्तदवस्थ इति परास्तम्। वैजात्यस्यैव व्यवहारविशेषौपयि(क?)त्वात्। ननु व्यवहर्त्तव्यज्ञाने विषयात्मक एव विशेषो व्यवहारौपयिक इत्यत आह—

(१) [ ] एतन्मध्यस्थपाठो द्वितीयपुस्तके नास्ति।

न्यायलीलावतीप्रकाशः

त्यर्थः। तच्च स्वसामग्र्यधीनं कदाचिदेव तथा च विजातीयज्ञानविशेषविषयौ कर्मतज्जन्यविभागप्रागभावौ क्षणशब्दप्रयोगविषयः, क्षणशब्दप्रयोगरूपश्च व्यवहारो ज्ञानविशेषविषयताप्रतिसन्धायकज्ञानविशेषादित्युक्तं भवति। यत्तु ज्ञानं विशिष्यतेऽनेनेति ज्ञानविशेषो विषयविशेष एव तथा हि यदि विशिष्टमतिरिक्तं न स्यात् तदा समूहालम्बनाविशेषो विशिष्टबुद्धेः स्यात् स च विषयविशेषोऽन्योन्याभावविशेष एव, अभावत्वेनैवाभावज्ञाने प्रतियोगिधीः कारणमिति तदभावेऽप्यभावो भासत एवेत्युक्तम्। तन्न, वैशिष्ट्यमात्रस्यात्राप्रस्तुतत्वेनानिर्वचनात् क्षणव्यवहारहेतुज्ञानविषयस्य तद्विशेषस्यैव स्वरूपकथनात् समूहालम्बनाच्च विशिष्टज्ञानस्य विशेषः कारणकृतः कार्यकृतः प्रकारकृतो वेति वैशिष्ट्याख्ये विशिष्टज्ञानविषयविशेषे माना-

न्यायलीलावतीप्रकाशविवृतिः

क्षणशब्दप्रयोजकरूपश्चेति। विजातीयज्ञानविषयतापन्नकर्मविभाग(प्राग?)भावयोर्व्यवहर्त्तव्यतया ज्ञानस्यापि व्यवहर्त्तव्यकोटिप्रवेशात्तद्विषयकज्ञानादेव व्यवहार इति व्यवहर्त्तव्यज्ञाने विशेषो विषयकृतोऽस्त्येवेत्यर्थः। यद्यपि सम्बन्धस्थानीयं ज्ञानं नाना(१)क्षणवृत्ति तथापि सामग्रीविशेषप्रसूततया व्यवहारविशेषार्थकमिति भावः। यदि विशिष्टमिति। वैशिष्ट्यमित्यर्थः। स चेति। अतद्व्यावृत्तिरूप इत्यर्थः। नन्वेवमदण्डिज्ञाने दण्डिज्ञानं दण्डिज्ञाने चादण्डिज्ञानमित्यन्योन्याश्रय इत्यत आह—अभावत्वेनैवेति। वैशिष्ट्येति। तथा चार्थान्तरमिति भावः। यद्यपि सामान्यनिर्वचनमपि विशेषपरमेवेति नार्थान्तरं तथाप्यभावप्रत्यक्षमात्रं प्रत्येव प्रतियोगिधीः कारणमिति तदभावे तन्न भासेत(२)किं च तदादायापि समूहालम्बनसम्भवान्न तद्भेदकतया तत्सिद्धिः। सिद्धौ वा तस्यान्योन्याभावात्मकस्य नित्यतया न क्षणव्यवहारहेतुत्वम्, अन्यथा कोऽपराधः कर्मविभागप्रागभावादीनामित्यत्र तात्पर्यम्। कथं तर्हि समूहालम्बनविशिष्टज्ञानयोर्भेद इत्यत आह—समूहालम्बनाच्चेति। कारणं विशेषज्ञानं कार्यमतद्व्यावृत्तिबोधः। एतदुभयमपि कार्यतावच्छेद(३)काधीनमित्यरुचेराह—प्रकारकृत इति। विशिष्टज्ञाने दण्डः प्रकारः समूहा-

---

(१) 'नान्त्य' (२) 'भासते'।

(३) 'ककारणतावच्छेदके'ति द्वितीयादर्शपुस्तकेऽधिकः पाठः।

चान्यदाभावान्न व्यवहारः । तदभावश्च तत्सामग्रीविरहात् ।

रवेः स्पन्दः क्षणस्तस्य नानाक्षणविशिष्टता ।
क्रमिनानाविधोपाधिसम्बन्धः परिकीर्त्यते ॥

न्यायलीलावतीकण्ठाभरणम्

श्वासप्रश्वासान्यथानुपपत्त्येत्युक्तं भवति । तस्य चेति । वैशिष्ट्याख्यज्ञानविशेषस्येत्यर्थः । ननु कथमन्यदा तदभाव इत्यत आह—तदभावश्चेति । आत्ममनोयोगविशेषोपहिता तत्सामग्र्यपि भिन्नैवेत्यर्थः । यत्तु वैशिष्ट्यमतद्व्यावृत्तिरेव ज्ञानविशेषपदेनोक्ता तदनङ्गीकारे च विशिष्टज्ञानात् समूहालम्बने विशेषो न भवेदिति केषांचिद्व्याख्याने कैश्चिद्वैशिष्ट्यमात्रस्याप्रस्तुतत्वात् समूहालम्बनाच्च विशिष्टज्ञानस्य कारणकृतः कार्य्यकृतः प्रकारकृतो वा विशेष इत्यादिदूषणमुक्तम् । तन्न, वैशिष्ट्यस्य क्षणव्यवहारोपपादकत्वेनैव प्रस्तुतत्वात् समूहालम्बनात् प्रकारादिकृतो विशेषो न स्यादित्यापादने प्रकारादिकृतो विशेषस्तत्रेत्ययुक्तत्वात् दण्डपुरुषसंयोगा इत्यत्र दण्डत्वादिकं दण्डी पुरुष इत्यत्र दण्डित्वमिति वैशिष्ट्यविषयतामन्तरेण न स्याद्वैचित्र्यमित्येवापादितं तत्र च प्रकारकृतो भेद इत्ययुक्तमभिधानम् । न च वैशिष्ट्याख्ये मानाभावः, अन्योऽन्याभावस्य सर्व्वाभ्युपगतत्वात् स एव तद्व्यावृत्तिस्तदुक्तमाचार्य्येण—तद्व्यावृत्तिर्वैशिष्ट्यमिति । विकीर्णमर्थं कारिकाभिः सङ्गमयति—रवि(वे ?) रिति । क्षण इति । क्षणावच्छेदक उपाधिरित्यर्थः । विभागप्रागभावादिविशिष्ट इति शेषः । ननु तत्रैव कथं क्षणचतुष्टयावस्थायित्वव्यवहार इत्यत आह—तस्येति । क्रमवत्संयोगादिसम्बन्ध एव स्पन्दस्य नानाक्षणवैशिष्ट्यमित्यर्थः । असम्बद्धेषु तत्त्वेषु स्पन्दविभागप्रागभावादिषु ज्ञानमेव सम्बन्धफलार्पकं विशिष्टव्यवहारजनकमित्यर्थः । ननु ज्ञानं सम्बन्धफलं

न्यायलीलावतीप्रकाशः

भावाच्च । अन्यदेति । केवलोपाधिज्ञानकाले केवलोपाधिमज्ज्ञानकाले चेत्यर्थः । रवेः स्पन्द इति । विभागप्रागभावाद्युपाधिविशिष्ट इति शेषः । केवलस्पन्दस्यानेककालवृत्तित्वात् । नन्वेवं रविस्पन्दे कथं क्षणचतुष्टयस्थायित्वव्यवहारस्तत्रैव तदवृत्तेरित्यत आह—तस्येति । क्रमवद्धि-

असम्बद्धेषु तत्त्वेषु ज्ञानं सम्बन्धवत्पुनः ।
स्वभावनियमेनैव तत्सम्बन्धफलार्पकम् ॥
अतिप्रसङ्गदोषस्य निराकरणकारणम् ।
वैशिष्ट्यमिति निर्व्यूढं तदेवात्र व्यवस्थितम् ॥

न्यायलीलावतीकण्ठाभरणम्

विशिष्टव्यवहारं कथमर्पयेदत आह—स्वभावेति । सम्बन्धवदिति । यथा सम्बन्धस्य विशिष्टव्यवहारार्पकत्वे स्वभावो नियामकस्तथा ज्ञानविशेषस्यापीत्यर्थः । सम्बन्धफलार्पकं ज्ञानमेव वैशिष्ट्यं निर्व्यूढमित्यग्रिमकांशेनान्वयः । ननु ज्ञानमेव वैशिष्ट्यमित्यश्रुतकल्पनमत आह—तदेवात्रेति । अतिप्रसङ्गदोषनिराकरणे प्रकारान्तरानुपपत्त्याऽत्र सिद्धान्ते तदेव व्यवस्थितं तद्व्यवस्थापितमित्यर्थः । एकदेशिनः सूत्राविरुद्धं युक्तिसिद्धमभ्युपगच्छन्तो नापसिद्धान्तेन दूष्यन्त इति

न्यायलीलावतीप्रकाशः

भागप्रागभावाद्युपाधिचतुष्कसम्बन्धात्तत्र क्षणव्यवहार औपचारिक इत्यर्थः । अतिरिक्तक्षणाभ्युपगमेऽपि तत्र क्षणिकव्यवहार औपचारिक इत्यभ्युपेयं तत्रैव तदवृत्तेरिति भावः । ननु विशिष्टव्यवहारस्यान्यत्र सम्बन्धजन्यत्वाज्ज्ञानविशेषो न तद्धेतुरित्यत आह—असम्बन्धेष्विति । यथा विशेषणविशेष्ययोः सम्बन्धो वैशिष्ट्याख्यः फलं विशिष्टव्यवहारं जनयति,तद्वदसम्बद्धेष्वपि वस्तुषु स्पन्दविभागप्रागभावादिषु ज्ञानमेव विजातीयं सम्बन्धफलं विशिष्टव्यवहारं जनयतीत्यर्थः । अतिप्रसङ्गेति । यथा अतिरिक्तमपि वैशिष्ट्यं स्वविशिष्टव्यवहारं वैशिष्ट्यान्न जनयति तत्रैव तदवृत्तेः, किं तु स्वभावादेव, अत एव नातिप्रसङ्गः, तथा

न्यायलीलावतीप्रकाशविवृतिः

लम्बने सोऽपि विशेष्यीभूय(१)भासते । प्रकारत्वं च ज्ञाननिरूपितः स्वरूपसम्बन्धविशेषः । तत्र च नियामकं जनकीभूतज्ञानविषयत्वमिति दिक् । औपचारिक इति । इदमापाततो वस्तुतः सूर्यकर्मापि स्वस्मिन् वर्तत एवेति प्रतीतिबलादेवोपेयं प्रमेयत्वे प्रमेयत्ववत् । संयोगसमवायाभ्यामेव हि स्वाधारत्वं स्वस्य विरुध्यते(२), अत एव घटात्यन्ताभा-

(१) विशेषणीभूयेति द्वितीयपुस्तके पाठः (२) 'विरुध्येत' ।

स्वविषयेणोपाधिना तद्वता वा सहकृतं क्षणज्ञानं विशिष्ट-व्यवहारसमर्पकम्। यदा तु तदुभयसहकारिसम्पन्नं न भवति तदा केवलव्यवहारं करोति न विशिष्टव्यवहारमिति।

न्यायलीलावतीकण्ठाभरणम्

भावः। कारिकात्रयार्थं निष्कृष्य दर्शयति--स्वविषयेणेति। उपाधिना प्रागभावादिना। तद्वता स्पन्देन। वाकारः समुच्चये, उपाध्युपाधिम-तोर्गुणप्रधानभावं प्रत्यनास्थायां वा। तथा च स्पन्दविभागप्रागभा-मसमसमयोत्पन्नज्ञानाधीनः क्षणव्यवहार इत्यर्थः। तदुभयेति। यद स्पन्दमात्रं विभागप्रागभाववैशिष्टयाख्यज्ञानाभ्यां सहितं न भवती-त्यर्थः। एवं च सति एकस्मिन् क्षणे नानाकर्म्माण्यादाय नानाक्षण-व्यवहारः स्यात्, नानोपाधिघटितत्वे क्षणपदस्य नानार्थतापत्तिः, ज्ञा-नानुल्लेखे क्षणानुल्लेखापत्तिः, इदानीमिदानीमितिप्रतीत्यापत्तिश्च-इत्या-द्युक्तानदूषणमपास्तम्, स्वजन्यविभागप्रागभावसहकृतरविस्पन्दत्वे-नानुगमात् वैशेषिकमते समवायानुल्लेखेऽपि विशिष्टप्रतीत्यभ्युपगमात् ज्ञानविशेषस्य च सम्बन्धस्थानीयत्वात् इदानीमिदानीमित्यस्य प्र-सञ्जकाभावात् प्रलये च ब्रह्माण्डान्तरवर्त्तिरविस्पन्दस्य सत्त्वात् सर्व्वदा क्षणव्यवहारानुपपत्तिर्ज्ञानविशेषविरहादिति।

न्यायलीलावतीप्रकाशः

ज्ञानविशेषोऽपीत्यतोऽत्र दर्शने प्रकृते तदेव वैशिष्टयमिति निर्व्यूढ़म-वधारितम्, व्यवस्थितं स्थिरीभूतमित्यर्थः। एतेन सम्बन्धसादृश्यात् न कथं तत्फलजनकं ज्ञानं न ह्यन्यसादृश्यादन्यकार्य्यमन्यस्माद् भवती-त्यपास्तमिति भावः। तद्वता वेति। वा शब्दः समुच्चये अनास्थायां वा उपाधितद्वद्बुद्धेर्विशिष्टव्यवहारजनकत्वे किमुपाधिविषयत्वं तन्त्रं त

न्यायलीलावतीप्रकाशविवृतिः

वे घटो नास्तीति प्रतीतिः सार्वलौकिकीति रहस्यम्। एतेनेति। ज्ञान-स्यैव सम्बन्धत्वाभ्युपगमेनेत्यर्थः। अनास्थायां वेति। विश्वविलक्षणज्ञान-स्यैवातिप्रसङ्गभञ्जकत्वे (१)विषयावच्छेदमन्तरेण ज्ञानानिरूपणे वि-षयस्य निरूपकतायामनास्था द्रष्टव्या। ननु ज्ञानेऽपि कारणं शब्द

---

(१) 'कत्वेन'।

न्यायलीलावतीप्रकाशः

द्विषयत्वं वेत्यत्रानास्थेत्यर्थः। ननु क्षणव्यवहारोऽनुगतोऽननुगते- नोक्तनिमित्तेन निर्वाहयितुमशक्यः कर्मैवानुगतं तत्तदुपाधिविशिष्टं तन्निमित्तमित्यपि न युक्तम्, तथापि विशेषणांशाननुगमेन विशिष्ट- स्याननुगमात्। यच्च क्षणवेदनं न क्षणे मानं क्रियादेः स्थिरत्वेना- तद्विषयत्वात् अस्तमितपूर्वापरभावस्य च वस्तुनस्तद्विषयस्यासिद्धेः क्षणव्यवहारश्च तत्र न मानमन्योन्याश्रयादित्युक्तं तन्न क्रियादेरक्ष- णिकत्वेऽपि परस्परोपश्लेषेण व्यवहारगोचरत्वात् न ह्युक्तयोर्द्वयोः क्षणान्तरसम्बन्धः अन्यतरवैकल्पात्। नाप्यन्योन्याश्रयः। व्यवहारो हि ज्ञानं शब्दप्रयोगो वा। नाद्यः, न हि ज्ञाने निरूपिते विषयनिरूपणं कि- न्तु ज्ञानमेव तथा। नान्त्यः, शब्देन स्वकारणज्ञानाक्षेपात् ज्ञानमेव विषयसिद्धिरिति तवाप्यनुमतमन्यथा क्वापि किं चिन्न सिध्येत्। का- रणं च तत्र पूर्वपूर्वसंस्कारसहितं प्रत्यक्षमेवान्यद्वेत्यन्यदेतत् कार्यस्य सम्प्रतिपत्तेः। यदपि विषयस्याऽतथात्वेऽपि ज्ञानविशेषात् क्षणव्य- वहार इति तदसत्। ज्ञानोल्लिखितविषयानादरे बाह्यापलापापत्तेः। न च बाधाबाधाभ्यां व्यवस्था बाधस्यापि प्रमात्वेन तद्विषयेऽप्यना- श्वासात्। नापि ज्ञानविशेषो वैशिष्ट्यं ज्ञानानुल्लेखे क्षणोल्लेखानुप- पत्तेः। नापि स्वविषयेण सहकृतं ज्ञानं विशिष्टव्यवहारे हेतुर्ज्ञानेन व्यवहारजनने स्वविषयानपेक्षणात् अनागतादौ व्यभिचारात्।

न्यायलीलावतीप्रकाशविवृतिः

एवेत्यन्योन्याश्रय एवेत्यत आह—कारणं चेति। 'तत्र' शब्दकारणे ज्ञाने। कार्य्यस्येति। (१)ज्ञानोल्लिखितेति। विजातीयज्ञानविशेषेणैवापुरस्कृतविष- येन व्यवहारासिद्धौ बाह्यापलापापत्तेरित्यर्थः। बाधस्यापीति। तत्रा- प्यवास्तवेनैव(२) विशेषेण तदभावव्यवहारसम्भवादिति भावः। ननु संयोगादिवत् ज्ञानविशेषोऽपि सम्बन्धतया व्यवहर्त्तव्यकोटि- प्रविष्ट एवेति न विषयापलाप इत्यत आह—नापीति। विजातीय- ज्ञानस्वीकारे च चाक्षुषत्वादिना सङ्करः खण्डप्रलये च ज्ञानाभावात् क्षणिक(३)व्यवहारानापत्तिरित्यपि बाधकं द्रष्टव्यम्। स्वविषयेणेति।

(१) शब्दलक्षणकार्य्यस्येत्यर्थ इत्यधिकः पाठो द्वितीयादर्शपुस्तके।

(२) 'प्यवान्तरेणैव'। (३) 'क्षण'।

न्यायलीलावतीप्रकाशः

अत्राहुः । स्वजन्यविभागप्रागभावसहितं कर्मैव क्षणः प्रलयेऽप्यणुकर्म-
णः सत्त्वात् । यद्यपि कर्मविभागप्रागभावयोः स्थायित्वमेव तथाप्यु-
क्तद्वयावच्छेदो न क्षणान्तरेऽन्यतरवैकल्पादिति नातिप्रसङ्गः । न च
स्वरूपमेव तयोः सम्बन्धस्तच्च स्थिरमेवेति युक्तम्, सम्बन्धान्तरं वि-

न्यायलीलावतीप्रकाशविवृतिः

तथा च न बाह्यापलापापत्तिरिति भावः । स्वजन्येति । यद्यपि स्वना-
श्यसंयोगसहितविभागादेरिति(१)विनिगमकाभावेन क्षणव्यवहारहेतु-
त्वमित्यननुगम(२ स्तथापि स्वजन्यविभागपदं(३)चरमकारणमा-
त्रपरं तेन स्वकार्यप्रागभावोपहितं चरमकारणं क्षण इत्यर्थः । चर-
मकारणं विभागे कर्म पूर्वसंयोगनाशे विभागः । सति कर्मणि(४)
संयोगनाशः सति तन्नाशे उत्तरसंयोगे कर्म । प्रागभावश्च भावस्या-
भावो ध्वंसस्य(भाव) रूपः प्रतियोगीत्यन्यदेतत् । न च विभागप्रा-
गभावो(५)पहितकर्मत्वादिना भाने उक्तानुगतरूपाभावात्कथं क्ष-
णव्यवहार इति वाच्यम्, प्रातिस्विकरूपेणैव ज्ञानस्य व्यवहारका-
रणत्वात् उक्तस्य प्रकारस्य स्वरूपसत एव विषयत्वानुगमकत्वात् ।
न चैकस्य कर्मणो विभागतदभावोपधानं विरुद्धं समयभेदेन वाच्यम् ।
तथा चान्योन्याश्रयः सति तदुपधाने क्षणरूपसमयभेदात्सति च स-
मयभेदे तदुपधानादिति वाच्यम्, विभागाभावोपहितकर्मान्तराव-
च्छिन्नकालभेदेन विभागतदभावोपधानादेव तत्रापि कर्मान्तरमेवा-
वच्छेदकम्, अनवस्था च प्रामाणिकी न दोषाय। यद्वा विभागकालान्य-
कालस्यैव विभागप्रागभावावच्छेदकत्वं न तु क्षणस्य । न चोत्तरका-
लमपि विभागप्रागभावोपधानापत्तिस्तदा तत्कर्मण एवाभावात् । त-
त्कर्मत्वसमानाधिकरणस्यैवोक्तस्य नियामकत्वात् । अत एवावयवा-
भावेन संयोगान्तरावच्छेदेनाकाशे संयोगवृत्तावपि द्विष्ठतयाऽवच्छे-
दकसंयोगस्यान्यत्र वृत्तावपि नावच्छेद्यवृत्तिः, तत्समानाधिकरण-
स्यैव संयोगस्यावच्छेद्यसंयोगवृत्तिनियामकत्वादिति । सम्बन्धान्तर-
मिति । न च योग्यतावच्छेदकरूपालाभः विभागकालान्यकालीन-
त्वस्य कर्मणि तन्निष्ठविभागप्रतियोगित्वस्य प्रागभावे तथात्वात् । यो-

(१) 'देरपि'। (२) 'त्यनुगम'। (३) स्वकार्य्यमात्रपरं कर्म्मपदमित्यधिकः पाठं द्वितीयादर्शपुस्तके। (४) संयोगे पूर्वेत्यधिकः पाठः द्वितीयपुस्तके। (५) 'गाभावो'।

न्यायलीलावतीप्रकाशः

ना विशिष्टधीजननयोग्यत्वरूपस्य तस्य क्षणिकत्वात् । न वान्यतर-
वैयर्थ्यं नाप्यननुगमः । न चैवमेकक्षण एव नानाक्षणव्यवहारप्रसङ्गः
नानाकर्मणामेकदाप्युत्पत्तेरिति युक्तम्, एकस्मिन् क्षण इति ह्येकस्मि
न्नुक्तरूपे कर्मणि वा तदेकावच्छिन्ने काले वा। आद्ये आपादकाभावः।
नान्त्यः, विशेषणभेदेऽपि विशेष्यस्याभेदात । अन्यथानेकदण्डादिम-
तश्चैत्रस्यापि नानात्वापत्तेः। नानाक्षणवृत्तिर्व्यवहारः क्षणघटितकाष्ठा-
मुहूर्त्तादिव्यवहारश्च क्रमिकक्षणानेवादाय, इदानीं स्वजन्यविभागप्रा-
गभावसहितं कर्मेत्यादि तु कर्मान्तरावच्छिन्नं कालमादायेति नात्मा-
श्रयः। यद्वा रूपवति रूपमितिवत् तदुपलक्षित एव काले तद्वृत्तिः
न हि तद्रहिते। तन्न, विरोधात्। न चैवमिदानीमिदानीमिति स्यात्
विशिष्टस्येदानीमर्थस्यैकत्वादिति ।

न्यायलीलावतीप्रकाशविवृतिः

ग्यता च प्रत्ययोपहितैव सम्बन्धः स्वरूपयोग्यतामात्रस्यान्यदापि
सत्त्वेनातिप्रसङ्गादिति केचित्। तच्चिन्त्यम्। एवं सति प्रतीतेः प्र-
तीत्यविषयत्वेन तदन्यत्वेन(१)सम्बन्ध(२)विषयकत्वप्रसङ्गात् त-
दजन्यत्वप्रसङ्गाच्च। तस्माद् द्वित्वपर्याप्त्यधिकरणं सम्बन्धिद्वयमेव
सम्बन्धः। यच्च ज्ञानं वर्त्तमानत्वेन तदुभयमवगाहते, तत् क्षण-
व्यवहारे हेतुः। तदुभयजन्यं सत्ताद्विषयकमेव वा ज्ञानं तथा। तदुभया-
सहकृतमित्यत्रापि सहकारिपदार्थो निरुक्तान्यतरात्मक एव वाच्यः।
तथा चोपलक्षणीभूतज्ञानविषयतापर्याप्त्यधिकरणं काल एव क्षण
इति दिक्। क्षणिकत्वात्। ज्ञानोपधानीभूय क्षणव्यवहारे हेतुत्वादित्यर्थः।
आपादकाभाव इति। नानाकर्मात्मनो नानाक्षणस्यैकदा वृत्तावप्येक-
स्मिन् कर्मणि नानाक्षणव्यवहारे आपादकाभावः इत्यर्थः। विशेषणभेदे-
ऽपीति। विशेषणभेदस्याप्रयोजकत्वादुपाधिविशिष्टकर्म्मावच्छिन्नकाल-
त्वेनैव क्षणव्यवहारगोचरत्वात्। तथा चापादकाभावः प्रकृतेऽपीति भा-
वः। विशिष्टस्येति। विशिष्टाविशिष्टभेदेन भवत्येव इदानीं काल इति प्रती
तिरिति भावः। वस्तुतस्तु अस्मिन् काले अयं काल इति प्रत्ययो भव-
त्येव। इदानीमिदानीमिति शब्दप्रयोगस्तु न भवति द्वयोरप्यधिक-
करणत्वेनोपस्थित्या आधाराधेयभावाप्रतिपादकत्वादनभिधाननिर-

(१) 'तदजन्यत्वेन'। (२) 'सम्बन्धा'।

शक्तिरपि न (१)पदार्थान्तरम् । प्रमाणाभावात्(२) । अर्था-

न्यायलीलावतीकण्ठाभरणम्

न च शक्तिरपीति । शक्तिपदवाच्यं वस्तु न पदार्थान्तरमित्यर्थः । कारणत्वस्यैव सामान्यविशेषस्य शक्तिपदार्थत्वादिति भावः । प्रमाणाभावादिति । षट्पदार्थभिन्नत्वे प्रमाणाभावादित्यर्थः । ननु बुद्धेः स्वरूपशक्तिर्बुद्धित्वमेव तच्च दाहादाहदशायां तुल्यमिति यदभावाद् दाहाभावस्तद्वश्यमङ्गीकर्त्तव्यमिति सामग्र्यां सत्यामदाहोऽन्यथानुपपन्न इति पदार्थान्तरत्वेऽर्थापत्तिरेव प्रमाणमिति शङ्कते--अर्थापत्तिरत्रेति । अन्यथानुपपत्तिरर्थापत्तिरन्यथोपपत्त्या निवर्त्तत इति त्वदभिमतार्थापत्ति

न्यायलीलावतीप्रकाशः

शक्तिरपीति । यद्यपि मानाभावादिति हेतुराश्रयासिद्धो व्यधिकरणश्च तथापि कारणानि न स्वजन्यानुकूलाद्विष्ठातीन्द्रियभावभूतधर्मवन्ति तथात्वेनाप्रमीयमाणत्वादिति विवक्षितम्, आत्मनि तादृशादृष्टप्रसिद्धेः । अर्थापत्तिरिति । यादृशादेव करतलानलसंयोगादेकदा दाहो दृष्टस्तादृशादेव मण्यादिसमवधाने दाहाभावो दाहप्रयोजकाभावं विनाऽनुपपद्यमानस्तं कल्पयति तेन विना तदभावानुपपत्तेरित्यर्थः । न च प्रतिबन्धकाभावेनान्यथोपपत्तिः उत्तेजके सति प्रतिबन्धकसत्त्वेन तद्व्यभिचारात् । न चोत्तेजकाभावविशिष्टप्रतिबन्धकाभावः कारणं तस्य विशेषणविशेष्यतदु

न्यायलीलावतीप्रकाशविवृतिः

स्तत्वाच्चेति तत्त्वम् । ननूक्तहेतोरात्माधिकरणमत आह—व्यधिकरणश्चेति । एवमपि पक्षधर्मताज्ञानाभावादनुमानाभाव इति भावः । कारणानीति । वस्तुमात्रपक्षतायां पण्डापूर्वादौ परकर्त्तृकांशतः सिद्धसाधनोद्भावनापत्तिरिति कारणानीत्युक्तम् । उष्णस्पर्शादिकमादाय बाध इत्यत उक्तं—अतीन्द्रियेति । अदृष्टवदात्मसंयोगमादाय बहुत्र बाध इत्यद्विष्ठेति । अव्यासज्यवृत्तीत्यर्थस्तेन न भावभूतपदव्यर्थता । प्रतिबन्धकाभावमादाय बाध इति भावभूतेति । न चातीन्द्रियपदेनैव तद्वारणं भट्टमतेऽभावस्यानुपलब्धत्वेनातीन्द्रियत्वादस्मन्मतेऽपि दुरदृ

---

(१) न च शक्तिरपीति कण्ठाभरणसम्मतः पाठः। (२) मानाभावादिति प्रकाशोद्धृतः पाठः।

न्यायलीलावतीप्रकाशः

भयाभावेष्वनुगतत्वादिति वाच्यम्, विशिष्टस्यातिरिक्तस्यानभ्युपगमेनानुगमात्। न च विशिष्टविरोधित्वमनुगतम्, विरोधो हि न परस्पराभावव्याप्यत्वं तदाक्षेपकत्वं वा विशेषणाद्यभावस्य विशिष्टाभावत्वे तदव्याप्यत्वादतदाक्षेपकत्वाच्च अभेदे तयोरभावात्। न च व्यासज्यप्रतियोगिकोऽन्य एवाऽभावः, क्लृप्तेनैवोपपत्तेस्तादृशाभावानभ्युपगमादित्युक्तम्। अभ्युपगमे वा केवलप्रतिबन्धकसत्त्वेऽपि तदभावा-

न्यायलीलावतीप्रकाशविवृतिः

ष्टरूपप्रतिबन्धकाभावस्यातीन्द्रियत्वात्। वस्तुतस्तु(१) अतीन्द्रियत्वं न साक्षात्काराविषयत्वं स्वमतेऽप्रसिद्धेः। नापि लौकिकसाक्षात्काराविषयत्वं परमते प्रतियोग्यप्रसिद्धेः। किन्तु संयोगादिपञ्चकजन्यसाक्षात्काराविषयत्वं तच्च सर्वमते सर्वत्राभावे। तथा च मण्याद्यभावव्यावर्त्तनायैव भावभूतपदम्। तथापि गुरुत्वादिकमादायांशतो बाध इत्यत उक्तं—स्वजन्यानुकूलेति। तदर्थश्च स्वनिमित्तकानुकूलत्वमतो न पूर्वदोषतादवस्थ्यम्। न चैवमप्यदृष्टादिकमादायात्मादावंशतो बाध इति वाच्यम्, तदन्यस्यैव पक्षत्वात्। एवमन्यत्रापि यत्र बाधः प्रतिभाति तदन्यस्यैव पक्षत्वम्। यद्‌यदादाय बाधस्तदन्यत्वमेव साध्ये प्रतियोगिविशेषणं वा। न च दृष्टान्ताभाव आत्मनो व्यतिरेकदृष्टान्तस्यैव सम्भवात्। मन्मते घटादेस्तन्मते पण्डापूर्वादेरन्वयदृष्टान्तस्य च सम्भवाच्च। विशिष्टस्येति। प्रतियोगिभेदेनैवाभावभेद इत्यभिमानः। व्यापकत्वमनुमापकत्वमाक्षेपकत्वमर्थापादकत्वम् (२)। एतच्च मतभेदेन। प्रतियोगितावच्छेदकभेदादप्यभावभेद इत्याशयमाशङ्क्य निराकरोति—न चेति। उत्तेजकाभावप्रतिबन्धकमात्रप्रतियोगिकव्यासज्यवृत्तिप्रतियोगिकाभावत्वेन हेतुत्वम्, व्यासज्यवृत्ति(३) प्रतियोगिकमण्यभावत्वेन वा। आद्ये दोषमाह—क्लृप्तेनैवेति। प्रतियोगिताया व्यासज्यवृत्तित्वेमानाभाव इति भावः। अन्त्ये त्वाह—केवलेति। उत्तेजकाभावविशिष्टमणिसत्त्वेऽपि घटादिकमादाय तादृशाभावसत्त्वाद्दाहापत्तेरित्यर्थः। एत-

(१) 'वस्तुतोऽती'।

(२) व्याप्यत्वमनुमापकत्वम्। आक्षेपकत्वार्थो व्यापकत्वमिति पाठो द्वितीयपुस्तके।

(३) 'वृत्ती'ति नास्ति द्वितीयपुस्तके।

पत्तिस्तत्र(१) मानमिति चेन्न, अन्यथैवोपपत्तेः। मणिमन्त्रादि-
ना दाहप्रतिपक्षभूतस्य क्षेत्रज्ञसमवायिनोऽदृष्टभेदस्योत्पादनात्
अग्न्यन्तरेणापि तर्हि तस्य पुरुषस्य दाहो न स्यादिति चे
न्न, प्रतिनियताग्निसाध्यदाहप्रतिपक्षभूतस्यैवादृष्टस्य(२)जननात्।
औषधि(३)लिप्तकाष्ठादिषु कथमदाह इति चेन्न, तत्राप्यौषधले

न्यायलीलावतीकण्ठाभरणम्

राभासेत्याह—अन्यथैवेति। अन्यथोपपत्तिमाह—मणीति। प्रतिबन्धके
शक्तिविघाते सामाग्न्यन्तरेणाप्रतिहतशक्तिना दाहः सम्भवति दाह
प्रतिपक्षादृष्टोत्पादे तु तस्य नवस्याग्न्यन्तरेणापि दाहो न स्यादि
ति शङ्कते—अग्नीति। यथा मानवोऽग्निविशेषस्य शक्तिं प्रतिहन्ति त
थाऽदृष्टमपि वह्निविशेषसाध्यमेव दाहं प्रतिहन्तीति परिहरति—प्र
तिनियतेति। काष्ठस्याचेतनत्वात्तत्रादृष्टानुत्पत्तेः कथमदाह इति श
ङ्कते—औषधेति। न हि स्वनिष्ठमेवादृष्टं प्रतिबन्धकं किन्त्वन्यनिष्ठम
पि तदुद्देशेनोत्पादितमिति परिहरति—तत्रेति। यत्र काष्ठेऽयमौषध

न्यायलीलावतीप्रकाशः

दाहापत्तेः। न हि यत्रैकमेव तत्र त्रयमिह नास्तीति न प्रतीयते, तस्
समुदायविरोधिनो यावत्समुदायिसद्भाव एव विरहादिति भावः
अन्यथैवेति। न च शक्तावप्रतीतावेवकारव्यवच्छेद्याभावः, वक्ष्यमाणादृष्ट
विशेषाभावेनोपपत्तेरित्येवंपरत्वात्। मणिमन्त्रादिनेति। उत्तेजके च सति
दाहस्तज्जन्यादृष्टेन समानाधिकरणेन दाहप्रतिपक्षादृष्टनाशात् न तु
तदभावविशिष्टदाहप्रतिपक्षादृष्टाभावः कारणं विशिष्टाभावकारणत्वे
बाधस्योक्तत्वादिति भावः। तत्रापीति। स्वयमौषधलिप्तकाष्ठादावदा

न्यायलीलावतीप्रकाशविवृतिः

देव विशदयति—न हीति। मिश्रास्तु। एकमेवेत्यस्यैकेत्यर्थः(४) तथा
च मन्त्रसद्भावेऽपि उत्तेजकाभाव[मणिप्रतियोगिकतादृशाभाव(५)]
सत्त्वे दाहापत्ते(६)रित्यर्थः। न च मन्त्रप्रतियोगिकतादृशाभावस्यापि
कारणत्वात् कथमेवमिति वाच्यम्, तावत्प्रतिबन्धकप्रतियोगिक
स्यैवाभावस्य कारणत्वे पूर्वदोषानतिवृत्तेः मन्त्रसत्त्वेऽपि तादृश

(१) 'त्तिरत्र'। (२) 'स्योत्पादनात। औ०'। (३) 'औषधालि०'।
(४) केवलेत्यस्यैकेत्यर्थ इति द्वितीयपुस्तके। (५) [ ] एतन्मध्यस्थपाठो द्वितीयपुस्तके नास्ति
(६) दाहानुत्पत्तेरिति द्वितीयपुस्तके।

पकारिपुरुषसमवेतादृष्टस्य दाहप्रतिपक्षभूतस्योत्पादनात् । प्रतिपक्षसन्निधानोत्पादकादृष्टविशेषस्य वा दाहप्रातिकूल्यं, अदृष्टवि-

न्यायलीलावतीकण्ठाभरणम्

योगस्तत्रादाहः काष्ठप्रयोजनिनामदृष्टादौषधप्रयोगोत्पादितादिति भावः । ननु शौचाशौचदशायां नैकत्रादृष्टोत्पत्तिः सम्भवति उभयत्र व्यभिचारात् । न वा श्रुतिर्मण्यादिसमवधानस्यादाहजनकादृष्टोत्पत्तिप्रतिपादिकास्तीत्यनुशयेनाह—प्रतिपक्षेति । अदृष्टस्य सर्व्वोत्पत्तिनिमित्तकारणत्वेन प्रतिपक्षसमवधानं प्रत्यपि अदृष्टस्य कारणत्वादिति भावः । ननु तददृष्टं पूर्व्वमप्यासीदिति तदानीमदाहः स्यादित्यनुशयेनाह—अदृष्टविशेषेति । ननु करतलानलसंयोग स विशेषो

न्यायलीलावतीप्रकाशः

हश्चादाहप्रयोजनिनामदृष्टादिति भावः । ननु मण्यादिसंसर्गस्यादृष्टजनकत्वे मानाभावः, भावे वा तज्जनकशौचाचमनादेः साधारणकारणस्याप्यन्वयः स्यात् । न चाशुचेरेव तत् कर्त्तव्यं शौचे सति तदभावापत्तेः । शौचाशौचयोरन्यतरानन्वयश्चासम्भावित एव अधर्मरूपत्वे च तत्र प्रेक्षावतामप्रवृत्तिः स्यादत आह—प्रतिपक्षेति । सर्वोत्पत्तिमतामदृष्टजन्यत्वात् पूर्वशौचे सत्येव तस्योत्पादनाच्च नोक्तदोष इत्यर्थः । नन्वेवमपि तादृशाददृष्टान्मण्याद्यप्रयोगेऽपि दाहानापत्तिः न ह्यदृष्टे सत्यवश्यं प्रतिपक्षसन्निधिरिति नियमः, अग्रिमकाल एव प्रतिपक्षसन्निधिदर्शनात्तदसिद्धेरभावादित्यत आह—अदृष्टविशेषेति । सं-

न्यायलीलावतीप्रकाशविवृतिः

मन्त्राभावसत्त्वादत एवोक्तं न हीति(१) । तत्प्रतिबन्धकप्रतियोगिकतादृशतावदभावकारणत्वे च गौरवात् । तदपेक्षया लाघवेन एकस्याः शक्तेरनुगतविशिष्टाभावस्य वा प्रयोजकत्वकल्पनादिति वदन्ति । एवकारव्यवच्छेद्येत्युपलक्षणम्, अन्यत्वप्रतियोग्यलाभोऽपि द्रष्टव्यः । अधर्मेण शौचाशौचान्यतराङ्गकत्वमित्यधर्मरूपतायां बाधकान्तरमाह—अधर्मरूपत्वे चेति । सर्वोत्पत्तिमतामिति । तथा च प्रतिपक्षसन्निधापकमदृष्टमावश्यकमिति भावः । ननु मण्याद्यप्रयोगकाले तददृष्टसत्त्वेऽपि(२) न मानमित्यत आह—अग्रिमेति । (३)यद्यपि चिरकालीने एकस्मिन्नेव क

(१) 'नहीत्यादि' । (२) 'सत्त्वे' । (३) कार्य्यदर्शनेतीत्यधिकः पाठो द्वितीयपुस्तके ।

शेषार्जितकरतलानलसंयोगस्य वा दाहप्रतिपक्षत्वम् । स च वि
शेषो दाहादाहाभ्यामेव कल्पयिष्यते । विवादास्पदं स्वरूपमात्र

न्यायलीलावतीकण्ठाभरणम्

योग्यानुपलब्धिबाधित इत्यत आह--स चेति । दाहप्रतिकूलो विशे
इत्यर्थः । अदाहेनेतिवक्तव्ये दाहग्रहणं दाहानुवृत्तावाकस्मिकादाहात्
स्फुटतरो विशेषो गृह्यत इत्येतदर्थम् । न चैवं सति मण्याद्यन्वयानु
विधानं न स्यादिति वाच्यम् ,संयोगविशेषस्यापि मण्यादिसमवहित
स्यैव दाहप्रतिकूलत्वकल्पनादिति भावः । शक्तावनुमानमाशङ्कते—वि
वादेति । वह्निर्दाहानुकूलातीन्द्रियाद्विष्टधर्म्मसमवायी न वेति विप्रति
पत्त्यास्पदमित्यर्थः । अत्राद्येन स्थितिस्थापकेन द्वितीयेनोष्णस्पर्शेन तृ
तीयेनादृष्टवदात्मसंयोगेन चतुर्थेन विशेषणेनाभावेनान्यथासिद्धिर्निरा
क्रियते। एतदेव साध्यत्वेन प्रतिजानीते–स्वरूपमात्रेति । स्वरूपमात्रसम्ब

न्यायलीलावतीप्रकाशः

योगे योग्यानुपलम्भात्तदभावः योग्यव्यक्तिवृत्तित्वेन जातेर्योग्यत्वा
दित्यत आह—स चेति । सत्यपि योग्यत्वे व्यञ्जकाग्रहात्तदग्रह इत्यर्थः
न चैवमसत्यपि प्रतिबन्धके क्वचिद् दाहः सत्यपि चोत्तेजके दाहो न
स्यादिति वाच्यम् , कार्यदर्शनमानकत्वे तस्य सत्येव प्रतिबन्धके उ
त्तेजकाभावे च तत्कल्पनात् । 'प्रहरं मा दहे' त्यत्र च मन्त्रप्रयोक्त्र
भिमतः काल एव प्रतिबन्धकः । यद्वा संयोगभेद एव तत्रापि कल्प्यत
इत्यर्थः । स्वरूपमात्रेति । एकवृत्तीत्यर्थः । तेनादृष्टवदात्मसंयोगेन नार्था

न्यायलीलावतीप्रकाशविवृतिः

रतलानलसंयोगे विद्यमाने प्रतिबन्धकसत्त्वासत्त्वाभ्यामेवमदाहदाहा
नुपपत्तिस्तथापि वह्नेराशुविनाशितया संयोगस्यापि तत्र नानात्वमेव।
न च भेर्याकाशसंयोगे चिरकालीने शब्दोत्पत्त्यनुत्पत्ति(१)समर्थनं कथ
मिति वाच्यम् , तत्रापि विजातीयवायुसंयोगस्यैव तदुपपादकत्वादे
वमन्यत्रापि फलबलेन कल्पनीयमिति भावः । प्रहरमिति । न चाभिप्रा
यस्य विशेषणत्वे तन्नाशे दाहापत्तिरुपलक्षणत्वे वातिप्रसङ्ग इति
वाच्यम् , तस्य स्वविषयीभूतप्रहरोपलक्षकत्वात् । आसन्नसमयस्य
स्ववृत्तिसमाप्त्युपलक्षकतावदिति भावः । एकवृत्तीति । स्वाश्रयान्योन्या

(१) 'शब्दोत्पत्त्यनुपपत्तेः' ।

सम्बन्ध(१)सापेक्षं जनकत्वात् आत्मवदिति चेन्न, अत एव सं-
स्काराद्दृष्टसापेक्षत्वप्रसङ्गात्। तत्रात्मत्वमुपाधिरिति चेत्तुल्यं प्र-

न्यायलीलावतीकण्ठाभरणम्

द्धमेकवृत्तीत्यर्थः। * * * भिन्नकारणत्वेन पक्ष इति। तथा च नांशतः
सिद्धसाधनं न च पक्षतावच्छेदकनानात्वे तत् पक्षनानात्व एव तदौचि-
त्यात्। अत एवेति। जनकत्वादेवेत्यर्थः। तत्रेति। संस्काराद्दृष्टसापेक्षत्वे सा-
ध्ये इत्यर्थः। प्रकृतेऽपीति। त्वदनुमाने चात्मत्वस्य उपाधित्वात् अदृष्टसापे-
क्षत्वेन सिद्धसाधनमपि द्रष्टव्यम्। संयुक्तसमवायेनादृष्टस्यापि वह्न्यादि-
स्वरूपमात्रसम्बद्धत्वात्। यद्यपि वीजादीनामप्युक्तसाध्यवत्तायामात्मत्वं
साध्याव्यापकं तथापि स्वमात्रसमवेतातीन्द्रियसापेक्षमिति साध्ये स्व-
पदेन वह्न्यादिसमभिव्याहारात् तत्तदभिधाने सत्यात्मत्वस्योपाधि-
त्वं द्रष्टव्यम्। शक्तेर्जनकत्वं परेण यद्यभिधीयते तदा दोषान्तरमाह—

न्यायलीलावतीप्रकाशः

न्तरं कार्यानुकूलत्वेन साध्यविशेषणान्न स्यन्दानुकूलस्थितिस्थापके-
नार्थान्तरं अतीन्द्रियत्वेन विशेषणान्नोष्णस्पर्शेनार्थान्तरम्। अत्राद्दृष्टा-
पेक्षत्वेन सिद्धसाधनम्। अदृष्टं ह्यात्मनि स्वरूपमात्रसम्बद्धमपेक्षणीयं
च कारणैः पक्ष एव तथासम्बद्धोऽप्रसिद्ध एवेति दूषणे सत्येवाह—
अत एवेति। तुल्यं प्रकृतेऽपीति। नन्वात्मत्वं नोपाधिः बीजादौ सर्वत्राद्दृष्टापे-

न्यायलीलावतीप्रकाशविवृतिः

भावसामानाधिकरण्यमेकवृत्तित्वम्। कार्य्येति। स्वनिमित्तकारणके-
त्यर्थः। तेन नोक्तदोषतादवस्थ्यम्। कार्य्यपदेन दाहो वा विवक्षितः।
ननु स्थापनानुमाने स्वरूपमात्रसम्बन्धत्वं पक्षमात्रसम्बन्धत्वमुक्त-
मतो नोक्तदोष इत्यत आह—पक्ष एवेति। यद्यपि स्वमात्रसमवेतेति
करणे स्वपदस्य समभिव्याहृतपरतया नायं दोषः, तथाप्यननुग-
मभयेन स्वपदस्य पक्षदृष्टान्तान्यतरपरत्वेऽयं दोषः। अत्राहेत्यनन्तर-
मत एवेति पाठस्ततस्तुल्यमिति फक्किकालिखनम्। तत्र नन्वात्मत्व-
मित्याक्षेप इति द्रष्टव्यम्। क्वचिदाहेत्यनन्तरस्तत्रात्मत्वमिति पाठस्त-
त्रैव च नन्वात्मत्वमित्याक्षेप इति ब्रूमः। तथा सति ह्यत एवेति

(१) म्बन्धातीन्द्रियसा०।

न्यायलीलावतीप्रकाशः

क्षया साध्याव्यापकत्वात् । अत्राहुः । अत्र यदि द्रव्यं पक्षस्तदाऽवय-
विनि स्यन्दानुकूलस्थितिस्थापकेन नित्यद्रव्ये च योगिसाक्षात्कारा-
नुकूलविशेषपदार्थेन सिद्धसाधनं गुणपक्षत्वे च द्रव्यत्वमुपाधिः । यद्वा

न्यायलीलावतीप्रकाशविवृतिः

सिद्धान्त्यनुमाने सिद्धसाधने सत्येवात्मत्वमुपाधिमाहेति प्रकाशार्थः
स्यात्, स एवायुक्तः । तत्र स्वरूपसम्बन्धेतिपदाभावाद्दृष्टं हीत्या-
दितद्विवरणासङ्गतेः । तत्र संस्कारसापेक्षत्वस्यापि साधनेन निरुक्त-
सिद्धसाधनानवकाशाच्च । किञ्च पूर्वपक्षफक्किकायामाक्षेपे पूर्वपक्षिण
एव सिद्धान्तो युक्त इति कथं तदा स्वीय एव स्थापनानुमाने यदि
द्रव्यमित्यादिना दूषणोद्भावनं घटेत । न चात एवेत्यादिसिद्धान्त्य-
नुमान एव सिद्धसाधनोद्भावनं यदीत्यादिनेति वाच्यम्, तत्र सं-
स्कारादृष्टयोर्विशिष्यैव साध्यत्वात् । किञ्च यद्वेत्यादिना सिद्धान्ता-
न्तरावतारोऽप्यसङ्गतः स्यादिति । केचित्तु आहेत्यनन्तरं तुल्यमि-
त्येव पाठ इति वदन्ति । साध्याव्यापकत्वादिति । एतच्च यथाश्रुतसाध्या-
भिप्रायेण । विवक्षितसाध्यस्य वीजादावभावात् । यदि चैकवृत्तिप-
दस्याव्यासज्यवृत्तित्वमर्थस्तदा धर्म्मत्वादिमत्यदृष्टे यथा विवक्षित-
साध्याव्यापकत्वमपि द्रष्टव्यम् । अत्र यदीति । इदमपि कार्य्यानुकूलत्वं
यथाश्रुतमेव साध्यप्रविष्टमित्यभिसन्धाय । यदि च यथा विवक्षितं
कार्य्यानुकूलत्वं तथा, तदोक्तमदृष्टेन सिद्धसाधनमप्रयोजकत्वं च दू-
षणं द्रष्टव्यम् । योगीति । विशेषपदार्थविशिष्टनित्यद्रव्यसाक्षात्कारवि-
षयत्वेन(१)उभयोरपि हेतुत्वादिति भावः । एतच्च वर्त्तमानगोचरसाक्षा-
त्कारमात्रस्यैव विषयजन्यत्वमिति मतेन । गुणपक्षत्व इति । यद्यपि द्रव्य-
पक्षतायामप्ययमुपाधिः सम्भवत्येव, उपाधेर्नित्यानिर्दोषत्वात्, त-
थापि सत्प्रतिपक्षोत्थापकतयोपाधेर्दोषत्वम् । द्रव्यपक्षतायां च न
द्रव्यत्वमुपाधिस्तद्व्यतिरेकस्य पक्षावृत्तित्वादित्यभिप्रायेणेदम् ।
यद्यप्येवमपि मूलोक्त उपाधिरसमाहित एव, तथापि आत्मत्वमुपाधि-
रिति मूले द्रव्यत्व(२)मेवोपाधिरित्यर्थ इति भावः । ननु गुणोऽप्य-
दृष्टसापेक्षतया साध्यसत्त्वेनोपाधेः साध्याव्यापकत्वं पूर्वोक्तक्रमेण
वाऽदृष्टे साध्याव्यापकत्वमित्यरुचेरपरितोषनिबन्धनमेवाग्रिमग्रन्थ-

(१) रे विष'। (२) 'त्वमुपा'

कृतेऽपि । शक्तेरपि शक्त्यन्तरापेक्षायामनवस्थितेः । अनपेक्षत्वे तथैव(१) व्यभिचारात् । जननशक्तियोग्यत्वं जनकत्वमिति चे-

न्यायलीलावतीकण्ठाभरणम्

शक्तेरपीति । जनकतावच्छेदकत्वाभ्युपगमे नायं दोषो हेतोरेव तत्राभावात् । अनवस्थितिरित्यपसिद्धान्तमुपलक्षयति । तथैवेति । ननु शक्तिजन्यजनकत्वस्य शक्तिसापेक्षत्वस्य शक्तावपि सत्त्वान्न व्यभिचारो न वेयं व्यभिचारादेशना सम्भवत्युपजीव्यविरोधात् न हि व्यभिचारस्तन्नये तत्प्रमाणादन्येन सिद्धमिति चेन्न त्वदनुमानस्य स्वविरोध्यत्वोपस्थापकत्वेनाप्रमाणत्वमिति विवक्षितत्वात् । परो व्यभिचारमुद्धरति—जननेति । शक्तौ च न जननशक्तियोगित्वमात्माश्रयानव-

न्यायलीलावतीप्रकाशः

पूर्वापरितोषेणाह—शक्तेरपीति । अपसिद्धान्तश्चेति शेषः । तथैवेति । ननु सापेक्षत्वं तज्जन्यजनकत्वं तच्च शक्तावस्त्येव न हि शक्तिजन्यजनकत्वं न शक्तौ विरोधात् । किं च शक्तिस्वीकारोऽनेनैव प्रमाणेन । तथा च शक्त्या तद्दूषणे उपजीव्यविरोधः । मैवम् , प्रतिपक्षाद्दष्टाभावेनान्यथोपपत्तेरनुमानमप्रयोजकम् । यद्वा याऽनुमितिः स्वहेतुव्याप्तिविरोधिनमर्थं साधयति सा न प्रमेत्यनुमितेरेवाप्रमात्वमनेनोद्भाव्यत इति भावः । शक्तौ मानाभावेऽपि साधकबाधकमानाभावात् संशयः स्या-

न्यायलीलावतीप्रकाशविवृतिः

मवतारयति—यद्वेति । ननु सापेक्षत्वमिति । न च शक्तेर्जनकतावच्छेदकतया शक्तिजन्याप्रसिद्धेर्नैवमिति वाच्यम् , तथा सति जनकत्वहेत्वभावादेव तत्र व्यभिचाराभावादिति भावः । ननु तज्जन्यजनकत्वमात्रं न साध्यमतीन्द्रिये रूपादौ स्वेनैवान्यथासिद्ध्या शक्तिसिद्ध्यनापत्तेरपि तदाश्रयत्वे सतीति विशिष्टमित्यरुचेराह—किंचेति । नन्वेवं दोषान्तरसम्भवेऽपि मौलं व्यभिचारोद्भावनमसमर्थितमेवेत्यत आह—याऽनुमितिरिति । तथा च नेह प्रतिबन्धार्थं व्यभिचारोद्भावनं मौलमपि तु जातानुमितेरप्रामाण्यप्रतिपादनार्थमित्यर्थः । यद्यपि शक्तिमादाय व्यभिचार इति विषयाबाधादेव नानुमितेरप्रामाण्यम् , तथा-

(१) तथैव व्य०।

न, असिद्धेः । तस्माद्विवादाध्यासितं न निजरूपमात्रसम्बद्धाती-
न्द्रियसापेक्षं प्रमाणेन तथानुपलभ्यमानत्वात् । यत्प्रमाणेन य

न्यायलीलावतीकण्ठाभरणम्

स्थाभ्यामित्यर्थः । शक्तेरसिद्धेर्हेतोरसिद्धिरिति परिहरति-ने
ति । साधकबाधकप्रमाणाभावात् शक्तौ संशयप्रसङ्गबाधकमुपन्यस्य
पनयति—तस्मादिति । वह्निर्न दाहानुकूलाद्विष्टातीन्द्रियधर्मसमवायी
त्यर्थः । प्रमाणेनेति । सम्भावितयोरर्थापत्त्यनुमानयोरपास्तत्वादि

न्यायलीलावतीप्रकाशः

दिति बाधकमाह—तस्मादिति । ननु हेतुः स्वरूपासिद्धः न ह्यत्र न प्र
माणमिति परेणाभ्युपेयते त्वया वा साधयितुं शक्यते अन्यथैवं सर्वं
सर्व्वत्र बाध्येत। मैवम् । प्रतिबन्धकसत्त्वे सति यदभावात् कार्याभा
वः स न सप्तपदार्थवहिर्भूतः कार्यजनकत्वात् सम्प्रतिपन्नवदिति
विवक्षितत्वात् । अत्र वदन्ति । मण्यादिप्रयोगजन्यादृष्टं प्रतिबन्धक
मिति न युक्तं किं तु मण्यादिरेव तथा प्रथमोपस्थितत्वादुपजीव्यत्वा
ल्लाघवाच्च । न च प्रतिबद्धान्यस्य कारणस्य तत्त्वमिति कारणताव-
च्छेदकत्वादकारणमेव मण्याद्यभावः सामान्येनान्वयव्यतिरेकवत्तया
गृहीते सति कार्यानुत्पत्तौ सहकारिभेदस्य कल्पनात् तद्विशेषस्याक

न्यायलीलावतीप्रकाशविवृतिः

पि त्वया शक्तेः शक्त्यन्तरं विनैव यथा जनकत्वं स्वीक्रियते अन्य
थाऽनवस्थानात् तथा कारणान्तरेऽपि स्यादित्यप्रयोजकत्वे पूर्वमुक्तं
तात्पर्य्यम् । ननु प्रसाध्याङ्गक एव हेतुरत आह—त्वया वेति । सिद्ध्य
सिद्ध्या व्याघातादिति भावः । अन्यथेति । स्वयं प्रमाणानभ्युपगममा
त्रेणैव वस्तुविरहसाधन इत्यर्थः । स नेति । समस्तपदार्थान्तर्गत इत्य-
र्थो यथाश्रुते प्रतियोग्यप्रसिद्धेः । कार्य्येति सम्पातायातम् । जनक
त्वमप्यनुकूलत्वमात्रं कारणतदवच्छेदकसाधारणम्, अन्यथाऽन्य-
तरासिद्धेरिति स्मर्त्तव्यम् । मण्यादीति । इदमुपलक्षणम्, तज्जनका-
दृष्टमदृष्टविशेषार्जितकरतलानलसंयोगश्चेत्यपि द्वयं द्रष्टव्यम् । हेतो-
रपि दृष्टेनैवोपपत्तेरित्यपि द्रष्टव्यम् । न चेति । यद्यपि तथाकार-
णत्वेऽपि नादृष्टप्रतिबन्धकत्वसिद्धिरिति शङ्केयमनुपपन्ना, तथापि
तटस्थस्य मुरारिमिश्रस्य शङ्केयम् । सामान्येनेति । वह्नित्वादिनेत्यर्थः ।

न्यायलीलावतीप्रकाशः

ल्पनादुपजीव्यविरोधात् सहकारिप्रत्याख्यानापत्तेश्च व्यक्त्यैक्ये चास-

न्यायलीलावतीप्रकाशविवृतिः

'सति' विद्यमाने। उपजीव्येति। विशिष्टस्यापि कारणताग्रहे प्रथम कारणताग्रहो बीजम्। अन्यथा यस्मिन् सत्यपि कार्य्याभावे यत्सत्त्वे कार्य्यं तत्राद्यस्याहेतुत्वमुत्तरस्यैव हेतुत्वं कल्प्येत। तथा च प्राथमिकसामान्यावच्छिन्नकारणताग्रहविरोध इत्यर्थः। नन्विदसमङ्गतं धर्म्मिकारणताग्रहमात्रस्योपजीव्यत्वात् तदवच्छेदकत्वग्रहस्य दैवागतत्वात्। उपजीव्यत्वेऽपि तस्यापरित्यागात्, अधिकामितिन्यायादित्यरुचेराह—सहकारीति। एककारणपरिशेषापत्तेरित्यर्थः। विनिगमकाभावेनोभयहेतुत्वस्यान्यत्रेवात्रापि समानत्वादिति भावः। नन्वेवं दण्डत्वदृढत्वयोरुभयोरपि जनकत्वमस्तु दृढत्वस्य जनकत्वे तत्रावच्छेदकान्तरकल्पनागौरवमिति यदि तदा प्रकृतेऽपि समानम्। अत्र मिश्राः। स्वरूपयोग्यतायावदाश्रयभाविनी सा चावच्छेदकावच्छिन्नयावदाश्रयभाविनी सा चावच्छेदकावच्छिन्नकारणस्वरूपाऽवच्छेदकस्वरूपा वोभयथाप्यवच्छेदके सत्येव वर्त्तत इति। यावदाश्रयभाव्येवावच्छेदकमपीत्यच्छेदकान्तराकल्पनालाघवात् तत्र भ्रमिजनकत्वरूपं यावदाश्रयभाविदृढत्वमवच्छेदकम्, प्रतिबन्धकाभावसाहित्यं तु न तथा, कादाचित्कत्वात्। न चैवमपि दण्डस्यावच्छेदकत्वे वैपरीत्यमेवास्त्विति वाच्यम्, साक्षात्सहकारिसमवधानासमवधानाभ्यां विनिगमनासम्भवादिति वदन्ति। न चैवमालोक(१)स्याप्युक्तविनिगमनया हेतुत्वं तु न स्यादिति वाच्यम्, तदुत्कर्षेण प्रत्यक्षोत्कर्षात्तस्य हेतुत्वाद्विषयत्वेन कारणतावश्यम्भावाच्चेति। व्यक्त्यैक्ये चेति। एकव्यक्तिक आकाशादौ प्रतिबद्धेतरत्वाभावादित्यर्थः। अन्योन्याभावस्य व्याप्यवृत्तित्वा(२)दिति भावः। यद्यपि भेरीसंयोगादेरेव तथा जनकत्वस्वीकारे देशभेदेन शब्दोत्पत्त्यनुत्पत्ती तत्र समर्थयितुं शक्येत, तथाप्याकाशकारणतायां स्वरूपमात्रानिबन्धनायामन्यत्रापि दृष्टान्तेन तथा कारणता कल्प्यत इत्यत्र तात्पर्य्यम्। अत्यन्ताभावावच्छेदकत्वपक्षे यद्यपि नेदं दूषणं तस्याप्यव्याप्यवृत्तित्वात्, तथापि तत्र पूर्वकमेव

(१) 'के रूपस्याप्यु'। (२) 'त्वाभ्युपगमादि'।

था नोपलभ्यते न तत्तथाभूतं, यथा नीलं न पीतं रूपम् ।

न्यायलीलावतीकण्ठाभरणम्

भावः । ननु अर्थापत्तावुक्तान्यथोपपत्तिर्न सम्भवति न हि मणिज-न्यमदृष्टं दाहविरोधि अनुपस्थितत्वात् किन्तु मणिरेवान्वयव्यतिरे-कशालित्वात् । अत एव करतलानलसंयोगविशेषोऽप्यव्याप्तः । न च मण्यादेरेव दाहप्रतिबन्धकत्वे तदभावस्यैव दाहकत्वमिति शक्तिसिद्धि-

न्यायलीलावतीप्रकाशः

म्भवात् । अथ मण्यादिसंसर्गाभावो न हेतुः, न हि करादौ मण्याद्य-त्यन्ताभावो नास्ति संयोगात्यन्ताभावो वा मणेः स्वावयववृत्तित्वात्, संयोगस्य चाव्याप्यवृत्तित्वादिति चेन्न, इह भूतले घटो नास्तीतिवत् संसर्गावच्छिन्नप्रतियोगिकस्याभावविशेषस्य सति प्रतिबन्धके तत्रा-भावात् स च समयविशेषावच्छेदेन संसर्गितयाऽत्यन्ताभाव एव अ-तिरिक्त एव(१)वेत्यन्यदेतत् । न चैवं प्रतिबन्धके सति तज्जातीयव्य-क्त्यन्तराभावमादाय कार्योत्पत्तिप्रसङ्गः सामान्याभावस्य कारणत्वात् तस्य च यत्किञ्चित्प्रतियोगिसत्त्वे विरहात् तावतामभावानां कूटस्यैव वा कारणत्वात् । अत एव न प्रतिबन्धकाभावत्वेन कारणत्वमन्योन्या-श्रयात् कारणीभूताभावप्रतियोगिन एव प्रतिबन्धकत्वादित्यपास्तम्, मण्याद्यभावकूटत्वेन कारणत्वात् । न च विशिष्टाभावनिरुक्तिः विशे-

न्यायलीलावतीप्रकाशविवृतिः

दूषणमिति मन्तव्यम् । अथेति । अन्योन्याभावस्तु हेतुत्वेन शङ्कितोऽपि न, मणिसत्त्वे तदन्योन्याभावमादाय हेतुतापत्तेरिति हृदयम् । अ-त्यन्ताभावस्यापि समयविशेषणाश्रयसम्बन्धे प्रागभावादिविलोप इत्यरुचेराह—अतिरिक्तो वेति । जन्याभावत्वेनैव च ध्वंसविभजनान्न विभागव्याघात इति भावः । सामान्येति । प्रतिबन्धकत्वावच्छिन्नप्रति-योगिकसामान्याभावस्येत्यर्थः । ननु प्रतिबन्धकत्वं कारणीभूता-भावप्रतियोगित्वमित्यन्योन्याश्रयः न च कार्यानुत्पादप्रयोजकत्वं प्रति-न्धकत्वमिति वाच्यम्, अनुत्पादस्य प्रागभावात्मकतयाऽ(२)साध्य-त्वादित्यरुचेराह—कूटस्यैवेति । मण्याद्यभावकूटस्य मण्यभावत्वादि-ना जनकत्वादित्यर्थः । विशेषणेति । न चैवं क्षणरूपोपाध्यवच्छिन्नघट-

(१) 'अतिरिक्तो वे'ति विवृतिधृतः पाठः । (२) 'भावरूपतया' ।

रिति वाच्यम्, एवं सत्युत्तेजककालेऽपि दाहो न स्यात् प्रतिबन्धकाभावस्य सहकारिणोऽभावात्। न च प्रतिबद्धेतरवह्नित्वेनैव कारणत्वे किं शक्त्येति वाच्यम्, एवं सति सहकारिणामुच्छेदप्रसङ्गात्, दण्डादिसमवहितचक्रत्वेनैव कारणत्वसम्भवात्। न च न केवलः प्रतिबन्धकाभावः कारणं किन्तूत्तेजकाभावविशिष्टो, न चोत्तेजककाले तदभाववैशिष्ट्यमिति वाच्यम्, एवं हि विशिष्टाभावः कारणं स च विशेषणविशेष्यतदुभयाभावेषु नानुगत इत्यननुगमापत्तिरेकशक्तिमत्तयाऽनुगमे सिद्धं नः समीहितम्। विशेषणाद्यभावेषु विशिष्टविरोधित्वमनुगमकमिति चेन्न, विशिष्टस्यानभ्युपगमात्। अभ्युपगमे वा विशिष्टविशेषणाद्यभावयोर्न परस्परविरहात्मत्वं विरोधः, तथा सति विशेषणादेरेव विशिष्टत्वं स्यात्। नापि परस्परविरहव्याप्यत्वं नीलपीतादिवत् परस्परविरहस्य परस्पराक्षेपकत्वं वा नित्यत्वानित्यत्ववद्, विशेषणाद्यभावस्यैव विशिष्टाभावरूपत्वेनाभेदे व्याप्यव्यापकभावाभावात्। मण्यादिकाले च न मणिप्रागभावप्रध्वंसौ तदत्यन्ताभावश्च करादौ सार्व्वत्रिक इति मणिसमवधानदशायामपि दाहापत्तिस्तदन्योऽन्याभावेऽप्येवम्। किं च मणेः सत्त्वेऽपि मन्त्राभावाद् दाहापत्तिः, न हि एकजातीययावतकारणसमवधानं तन्त्रम्। तथा च सकलदण्डोपस्थितौ परं घटोत्पत्तिः स्यात्। मन्त्रादेश्चाशुविनाशिनोऽभावादनुपदमेव दाहः स्यात्, न तु प्रहरादिपर्य्यन्तमदाहः। प्रतिबन्धकाभावस्य कारणत्वेऽन्योऽन्याश्रयः कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबन्धकत्वात्। मण्याद्यभावकूटत्वेनापि कारणता मण्यादीनां प्रतिबन्धकत्वमगृहीत्वा ग्रहीतुं न शक्यते, अप्रतिबन्धकरासभाद्यभावस्यापि तत्कूटप्रवेशसम्भवात्। रासभादीनामप्रतिबन्धकत्वान्नैवमिति चेत् तर्हि प्रतिबन्धकत्वं मण्यादीनां गृहीत्वैव तदभावकूटस्य कारणत्वग्रह इति कथं नान्योऽन्याश्रयः। अत एवोत्तेजकाभावादिविशेषणावच्छिन्नप्रतिबन्धकाभावत्वेनैव न कारणता अन्योऽन्याश्रयात्। अत एव उत्तेजकाभावप्रतिबन्धकयोर्विशेषणविशेष्ययोः सम्बन्धाभावोऽनुगतो न दाहकारणं तयोः सम्बन्धान्तराभावात् स्वरूपसम्बन्धस्य च स्वरूपद्वयात्मकस्याभावयोरननुगमात्। मैवम्। प्रतिबन्धकत्वं हि कार्य्यानुत्पत्तिव्याप्यसमवधानत्वम्। उत्तेजकाभावविशिष्टप्रतिबन्ध-

न्यायलीलावतीकण्ठाभरणम्

काभावस्य कारणत्वमुत्तेजकाभावावच्छिन्नप्रतियोगिकप्रतिबन्धका-
भावस्येति यावत् । प्रतियोगितावच्छेदकभेदेनाभावभेदाभ्युपगमात्।
एवं च नान्योऽन्याश्रयाननुगमौ । स चाभावोऽत्यन्ताभाव एव संस-
र्गावच्छिन्नप्रतियोगिकोऽन्यो वा उत्पादविनाशशीलः सामान्याव-
च्छिन्नप्रतियोगिकश्चासौ कारणमिति नैकसत्त्वे दाहापत्तिः । एवं चा-
र्थापत्तावन्यथोपपत्तावनुमानमपि द्रष्टव्यं तत्रापि साध्ये भावभूतादि-
पदप्रक्षेपात् प्रतिबन्धकाभावेनान्यथासिद्धिर्निरसनीया । तथा च
व्यर्थविशेषणत्वमवैयर्थ्ये वा शक्तिभिन्नतद्भिन्नानन्तपदार्थशक्तिसि-
द्धिप्रसङ्ग इति ।

नन्तु विषये ज्ञाते न ज्ञातताधीयते यन्निबन्धनो ज्ञातो घट इति

न्यायलीलावतीप्रकाशः

षणावच्छिन्नप्रातियोगिकस्य विशेष्याभावस्य तदुभयसम्बन्धाभाव-
स्य वा विशिष्टाभावत्वात्। प्रतीतिवैलक्षण्यात् तस्य केवलविशेषणवि-

न्यायलीलावतीप्रकाशविवृतिः

नाशस्वीकारे क्षणभङ्गापत्तिस्तादृशक्षणभङ्गस्येष्टत्वात् , तद्विशेष्य-
तावच्छेदकावच्छिन्ननाशस्य प्रतिक्षणभाविनोऽस्वीकारात् ।

नव्यास्तु(१)लाघवात्प्रतियोगिमात्रेणैव सममभावस्य विरोध इति
तत्र क्षणस्यैव नाशो न घटस्य प्रतिबन्धकाभावस्थलेऽप्युत्तेजकाभाव-
विशिष्टस्य मण्यन्तरस्यैवाभाव इति । तदयुक्तम् । तथा सति तत्र
विद्यमानस्य मणेरभावात् (२) सत्यप्युत्तेजके दाहानापत्तेः । न च
स मणि (३) रप्रतिबन्धक एवमुत्तेजकोपनयपूर्वमपि तत्र दाहापत्तेः।
न च विशेषणावच्छिन्नविशेष्यविरहवत् विशेष्यावच्छिन्नविशेषणवि-
रहोऽपि हेतुरित्यविनिगमम उभयहेतुत्वस्वीकारात् शक्त्यपेक्षया ल-
घुत्वादिति। पक्षान्तरमाह–तदुभयेति। नन्वेवमपि विशिष्टाभाव एवेति
क्वचिद्विशेष्यसम्बन्धाभावात्मा क्वचिद्विशेषणतदुभयप्रतियोगिकत्वा-
भावात्मेत्यननुगमः । तत्रापि सम्बन्धाभावस्वीकारेऽनवस्थेति । अत्र
मिश्राः। विशेष्यविशेषणसम्बन्धाभाव एव विशिष्टाभावः। न चायमपि
विशिष्टाभावात्मेति तद्दोषतादवस्थ्यं सम्बन्धस्य विशेष्याभावाप्रसिद्ध-
विशेषणप्रतियोगित्वरूपविशेषणमात्राभावस्याननुगतत्वात्। न च वि-

(१) 'नवीनास्तु' । (२) 'णेरभावाभावात्' । (३) 'णिः प्रतिबन्धक एव न उत्तेजको०'

न्यायलीलावतीप्रकाशः

शेष्याभावे तदुभयाभावे च साधारणत्वात्। एतेन कारणानि स्वजन्यजनकादृष्टातीन्द्रियभावभूतधर्मवन्ति कारणत्वादात्मवत्। तत्रादृष्टं तथा सिद्धमिति सामान्यतः। भट्टमतेऽनुपलब्धिगम्यत्वात्तदभावोऽप्यतीन्द्रिय इति तद्व्यावृत्त्यर्थं भावभूतेति विशेषणम्। विशिष्य तु वह्निर्दाहानुकूलातीन्द्रियादृष्टधर्म्मसमवायवान् दाहजनकत्वादात्मवत्। अनुकूलत्वं च कार्याभावव्याप्याभावप्रतियोगित्वं कारणतदवच्छेदकसा-

न्यायलीलावतीप्रकाशविवृतिः

शेष्यसम्बन्धाभाव एव विशेषणे हेतुरस्तु विशेष्याणां मणीनामानन्त्येन तत्सम्बन्धाभावस्याननुगततया उत्तेजकाभावसम्बन्धाभावस्य लघुत्वात् अधिकरणभेदेऽपि उत्तेजकाभावस्यैकत्वात्।अस्तु वा विशेषणविशेष्यप्रतियोगिकत्वाभावसम्बन्धो दाहकारणं तस्यैकत्वादिति। केचित्तु सम्बन्धत्वावच्छिन्नाभावो विशिष्टाभावः। सम्बन्धत्वं च विशिष्टधीजननयोग्यत्वम्। तच्च क्वचित्संयोगादिनिबन्धनं क्वचित् स्वरूपसम्बन्धनिबन्धनम्। एवं च मणेः प्रतिबन्धकत्वं समानाधिकरणाभावस्य च दाहकारणत्वं निर्वहतीति वदन्ति। कारणानीति। वस्तुमात्रपक्षतायां पण्डापूर्व्वादौ बाध इति कारणानीत्युक्तम्। अनित्यत्वमपि विशेषणमतो न प्रागभावगर्भानुकूलत्वपक्षघटितसाध्यासत्त्वान्नित्यकारणेंऽशतो बाधो न चात्मादावंशतः सिद्धसाधनम्। न चैवमपि कारणतावच्छेदकतत्तद्धर्म्ममादायातीन्द्रियकारणेंऽशतः सिद्धसाधनमिति वाच्यम्, अनुकूलत्वस्य प्रागभावगर्भस्य निर्वचने तदप्रसङ्गात्। साध्ये च स्वजन्यत्वं स्वनिमित्तकारणकत्वमतो न गुरुत्वादिमति कारणेंऽशतः सिद्धसाधनम्। तदन्यस्यैव वा पक्षत्वम्। तथा सति (१) तज्जन्येत्यादिविशेषणं ताद्रूप्यसिद्धये। जनकत्वं चानुकूलत्वम्। क्वचित् पाठ एव तथा। वह्निरिति। दाहानुकूलत्वं ताद्रूप्यसिद्धये। नन्वनुकूलत्वं यदि जनकत्वं तदा बाधो (२) यदि च कारणतावच्छेदकत्वं तदा दृष्टान्तासिद्धि(३)रत आह—अनुकूलत्वं चेति। अ-

(१) स्वजन्यत्वादिविशेषणं तद्रूपासिद्धये इति पाठो द्वितीयपुस्तके।

(२) मीमांसकैः शक्तेः कारणतानुपगमात्।

(३) दृष्टान्तस्यादृष्टवदात्मनः स्वतः परतश्चासिद्धिरदृष्टस्य कारणतावच्छेदकतायाः केनाप्यनभ्युपगमात्।

नापि ज्ञातता। निराकरिष्यमाणत्वात्। नापि वैशिष्ट्यम्।

न्यायलीलावतीकण्ठाभरणम्

तत् पदार्थान्तरं स्यादित्यत आह—नापीति । नापि वैशिष्ट्यमिति। प

न्यायलीलावतीप्रकाशः

धारणमिति नासिद्धिः स्वतः परतो वा। न चात्मत्वमुपाधिः सामान्या नुमाने अन्त्यशब्दध्वंसकारणकालाकाशयोः*साध्याव्यापकत्वात्। वि शेषे दाहानुकूलौष्ण्यवति तेजोद्व्यणुके साध्याव्यापकत्वादित्यनुमा नं शक्तिसाधकमित्यपास्तम्, प्रतिबन्धकाभावेनान्यथोपपत्तेर्भा वभूतेतिविशेषणवैयर्थ्यात्। अन्यथा शक्तिसिद्ध्यनन्तरं शक्तिभि न्नत्वेन साध्याविशेषणात्, तत एव शक्तिभिन्नधर्मासिद्ध्यापत्तेरिति संक्षेपः। विस्तरस्तु "कुसुमाञ्जलिप्रकाशे"।

ज्ञातो घट इति विशिष्टबुद्धेर्विशेषणविशेष्ययोः स्वरूपमेव स म्बन्धो हेतुः, अन्यथा ज्ञानेन ज्ञातताधानेऽपि नियमो न स्यादतीता दौ तदसम्भवश्चेत्याशयेनाह—नापीति। तदननुभवात् सप्तमपदा र्थत्वेनेति शेषः । न हि वैशिष्ट्यानुभव एव नास्ति दण्डीतिवद् घटाभाववद्भूतलमिति प्रतीतेः । ननु विशिष्टव्यवहारत्वेन वि शेषणविशेष्यसम्बन्धस्य निमित्तस्यानुमानं क्लृप्तसम्बन्धबाधे त

न्यायलीलावतीप्रकाशविवृतिः

त्राभावपदं प्रागभावपरम्। व्याप्यत्वं च कालगर्भम्। इदं च समा धिसौकर्यात्। वस्तुतः कारणतावच्छेदकत्वमनुकूलत्वम्। न चाप्रसि द्धिः। धर्मत्वादिकमादायादृष्टस्य दृष्टान्तत्वात्। न च गुणगतजात्यन ङ्गीकारे नैवमिति वाच्यम्, परमते धर्मत्वादिकं स्वमते तु शक्तिमादा यादृष्टस्य दृष्टान्तत्वसम्भवादिति रहस्यम्। अन्त्येति। न चात्मत्व मपि कालेऽस्त्येवेति वाच्यम्, तस्य समवायेनोपाधित्वमित्याश यात्। प्रतिबन्धकाभावेनेति। इदमुपलक्षणं प्रत्यक्षत्वरूपपक्षधर्मावच्छि न्नयथाविवक्षितसाध्यव्यापकस्यात्मत्वस्य सामान्यानुमाने, शुद्धसा ध्यव्यापकस्य च द्वितीयानुमाने उपाधित्वसम्भवाच्चेत्यपि द्रष्टव्यम्। इदमेवाभिसन्धायाह—विस्तर इति।

---

* तव मत इत्यादिः। शब्दानां मीमांसकैर्नित्यत्वाभ्युपगमात्।

घटाभावभूतलयोस्तदननुभवात् । इह भूतले घटो नास्तीति व्यपदेशमात्रम् । असति सम्बन्धेऽत्र घटाभावो नान्यत्रेति व्यपदेशे किं नियामकम् । एतद्भूतलसम्बन्धेन प्रतियोगिना अभावनिरूपणम् । दण्डिपुरुष इत्यत्र तु गुरुत्वप्रतिबन्ध-

——————

न्यायलीलावतीकण्ठाभरणम्

दार्थान्तरमिति शेषः । व्यपदेशमात्रमिति । वस्त्वननुरोधी व्यपदेश इत्यर्थः । ननु व्यपदेशस्यैव प्रतिनियतत्वात् वैशिष्ट्यं स्वीकरणीयमित्याशङ्कते—असतीति । यत्र प्रतियोगी समारोप्यते तदेवेहेति व्यपदेशभाजनं भवति । समारोपश्चाहार्य्यः, स्वरसवाही वेति । विशिष्टबुद्धौ न विशेष इति परिहरति—एतदिति । एतद्भूतलसम्बन्धित्वेनारोपितेनेत्यर्थः । वस्तुतस्तु अभावभूतलयोः स्वरूपसम्बन्धो ज्ञानविशेष एव वा वैशिष्ट्यम् । ननु अभावविशिष्टप्रतीत्यनुरोधाद्वैशिष्ट्यं मा सिद्ध्यतु, भावविशिष्टधीरेव समूहालम्बनाद्विलक्षणा वैशिष्ट्ये प्रमाणमित्यत आह—दण्डीति । समूहालम्बने विशेष्यस्य विशेषणाधारत्वं न

न्यायलीलावतीप्रकाशः

त्रैव सम्बन्धान्तरे पर्यवस्यतीत्यत आह—इहेति । व्यपदेशमात्रमिति । मात्रपदेन सम्बन्धनैरपेक्ष्यमुक्तम् । एतद्भूतलेति । एतद्भूतलसम्बद्धतयारोपितेनेत्यर्थः । अत्यन्ताभावे प्रतियोग्यधिकरणयोः सम्बन्धाभावात् । न चैवमेतद्भूतलनिष्ठतया ज्ञातप्रतियोगिनिरूप्यत्वस्यैवाभावेनाधिकरणसम्बन्धरूपत्वाद्व्यपदेशमात्रमित्यनेन विरोधः, एतस्य व्यपदेशनियामकमात्रतयाऽभिधानेन व्यपदेशविषयानभिधायकत्वात् । तथा च यत्सम्बद्धतयारोपितेन प्रतियोगिनाऽभावो निरूप्यते तत्र सप्तमी प्रयुज्यत इति तात्पर्यम् । दण्डीति । दण्डी पुरुष इ-

न्यायलीलावतीप्रकाशविवृतिः

सप्तमपदार्थत्वेनेति । सम्बन्धिद्वयभिन्नत्वेनेत्यर्थः । सम्बन्धनैरपेक्ष्यमिति । सम्बन्धिद्वयातिरिक्तसम्बन्धनैरपेक्ष्यमित्यर्थः । तेन प्रागुक्तेन "न हि वैशिष्ट्यानुभव एव नास्ती"त्यादिना न विरोधः । तथा चेति । इदं च यथाश्रुतमूलानुसारेणोक्तम् । वस्तुतः स्वरूपसम्बन्धस्यैव नियामकत्वे तात्पर्य्यमतो न "न हि वैशिष्ट्ये"त्या

कत्वं पुरुषस्य दण्डाधारत्वं प्रतीयते व्यपदेशमात्रं वा । विप-
रीतस्तु न व्यपदेशोऽनभिधाननिरस्तत्वात् । तद्धि तस्य
विशेषणं विशेष्यं च तत्सम्बन्धफलार्पकम् ।

न्यायलीलावतीकण्ठाभरणम्

भासत इति विशेषः । ननु दण्डीत्यत्राधारत्वानुभवो नास्तीत्यनुश
येनाह—व्यपदेशमात्रमिति । तर्हि पुरुषी दण्ड इत्यपि स्यात् नियाम
काभावादत आह—विपरीत इति । अप्रयोगादेवाप्रयोग इति भावः
इदानीं व्यपदेशप्रतिनियममुपपादयति—विशेषणमिति । यद्वस्तुतो वि

न्यायलीलावतीप्रकाशः

त्यत्र वैशिष्ट्यं न प्रतीयते अपि तु दण्डाधारत्वम् । तच्च दण्डगुरुत्वप्र
तिबन्धकत्वमित्यर्थः । न च गुरुत्वप्रतिबन्धकत्वं गुरुत्वकार्यपतन
हेत्वभावप्रतियोगिसंयोगवत्त्वम्, तच्च दण्डस्याऽप्यस्तीति सोऽप्या
धारः स्यात्, प्रतिबध्यगुरुत्वानाश्रयत्वे सतीतिविशेषणात् । यद्वा
दण्डीत्यत्र संयोगमात्रं विशेषणतयाभिमतं न तु पराभिमतं पदार्था
न्तरमित्याह—व्यपदेशमात्रं वेति । नन्वेवं संयोगाधारत्वाविशेषात् पु
रुषी दण्ड इत्यपि व्यपदेशः स्यादित्यत आह—विपरीतस्त्विति । पूर्वेषां
प्रयोगाभावादाधुनिकानामप्रयोग इत्यर्थः । विशेषणमिति । न च प्राक् ज्ञा
नविशेषो वैशिष्ट्यमित्युक्तमिदानीं च विशेषणाद्यात्मकं तदुच्यते
इति विरोधः, उभयोर्यः सम्बन्धो वैशिष्ट्यं तत्फलार्पकं ज्ञानरूपं वै
शिष्ट्यमिति कीर्तितम् । तयोः कयोरित्यपेक्षायामुक्तं विशेषणं विशेष्यं
चेत्यर्थात् । ननु यथार्थविशिष्टज्ञानस्य विशेषणविशेष्यसम्बन्धनि
मित्तकत्वादभावे संयोगबाधेऽतिरिक्तं वैशिष्ट्यं सम्बन्धः सिद्ध्येत्
अन्यथा समवायोऽपि न सिद्ध्येत् तत्रापि ज्ञानविशेषेणोपपत्तेः । व्य
पदेशमात्रत्वे तु निरर्थकत्वापत्तिः । न च स्वरूपसम्बन्धेन सिद्धसा
धनं तस्य तत्तत्सम्बन्धिरूपत्वेनाननुगतत्वात् । नाप्येतद्भूतलसम्ब
न्धेनेत्याद्युक्तं नियामकं अभावं प्रत्यधिकरणोल्लेखस्यान्येन सम्बन्धे

न्यायलीलावतीप्रकाशविवृतिः

दिना विरोध इति ध्येयम् । वैशिष्ट्यम् अतिरिक्तवैशिष्ट्यम् । विशे
षणतयेति । इदं च संयोगप्रकारकज्ञानमभिसन्धाय, अन्यथा तु सं

ज्ञानरूपं स्वसामर्थ्याद्वैशिष्ट्यमिति कीर्तितम् ॥

न्यायलीलावतीकण्ठाभरणम्

शेषणं यच्च विशेष्यं तयोर्यत् सम्बन्धफलं विशिष्टव्यपदेशादि तदर्पकं तज्जनकं ज्ञानरूपमेव ज्ञानविशेष एवेत्यर्थः । तथा च विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहकृतं विलक्षणज्ञानं प्रतिनियतव्यपदेशहेतुरिति भावः । ननु संयोगाद्यविशेषेऽपि कुत एवमित्यत आह--स्वसामर्थ्यादिति । स्वभावविशेषात्तादृशादित्यर्थः । ननु ज्ञानविशेषोऽनुपलम्भबाधितः विशिष्टव्यहारहेतुश्च ज्ञानविषययोर्वैशिष्ट्यमन्तरेणानुपपन्नः । स्वरूपसम्बन्धश्च स्वरूपाणामानन्त्यादनन्त इति सकलाभावसाधारणं वैशिष्ट्यमेवमभ्युपेयमिति चेन्न तथा सति तद्वत्यपि तदभाववैशिष्ट्यधीप्रसङ्गात् तदितराभावस्य वैशिष्ट्येन तत्राभ्युगमात् । न च समवायप्रतिवन्दी वैशिष्ट्ये सर्वेषामभावानां वैशिष्ट्यस्याभ्युपगमेऽनवस्थापसिद्धान्तौ तेनैव तद्व्यवहारे स्वात्मवृत्तित्वं तत्र स्वरूपसम्बन्धेन

न्यायलीलावतीप्रकाशः

नानुपपादनात् । तथा हि एतद्भूतलसम्बन्धः प्रतियोगी तदभाववश्चेत्येव स्यान्न त्वभाववद्भूतलमिति दण्डी पुरुष इत्यत्रेत्यपि न युक्तम् । आधारत्वाभिधानेऽपि वैशिष्ट्यस्यानुभूयमानस्यानुपपादनात् तस्य ततोऽन्यत्वात् । नाप्यनभिधानं तथा विवक्षायां पुरुषो दण्ड इत्यस्य प्रयोगस्य सम्भवात् । न हि पूर्वेषां प्रयोग आधुनिकप्रयोगहेतुः, पूर्वप्रयोगमज्ञात्वाऽपि वाक्यार्थज्ञाने विवक्षायां चाभिनवकाव्यादिप्रयोगात् । नापि ज्ञानरूपं वैशिष्ट्यमचाक्षुषत्वाद्यापत्तेः । अत्राहुः । वैशिष्ट्यस्य समवायवदेकत्वे घटाभाववति पटवति पटाभावधीप्रसङ्गः घटाभाववैशिष्ट्यस्यैव पटाभाववैशिष्ट्यरूपत्वात् । न च पटाभाववैशिष्ट्यसत्त्वेऽपि पटाभावो नास्ति तस्य तद्भिन्नत्वादिति वाच्यम्, पटाभावाभावस्याभावत्वे वैशिष्ट्येन सम्बन्धेन तत्र

न्यायलीलावतीप्रकाशविवृतिः

सर्गविषयेति द्रष्टव्यम् । एवं च व्यपदेशमात्रमितिमूलस्यातिरिक्तवैशिष्ट्याभानमात्रे तात्पर्य्यम् । तस्येति । अन्यथा समवायोऽपि न सिद्ध्येदिति भावः । पटाभावाभावस्येति । तथा च पटाभावाभावानुरोधे-

न्यायलीलावतीप्रकाशः

सत्वात् । भावत्वे च पटस्य प्रतिबन्धकत्वे पटाभावस्य पटाभावधी-हेतुतापत्तेः, तस्य च वैशिष्ट्यसम्बन्धेन तत्र सत्त्वात् । वैशिष्ट्यस्य प्रत्यभावव्यक्ति नानात्वे विशिष्टबुद्धौ नैकः सम्बन्धो निमित्तमिति तत्तदभावविशिष्टज्ञाने तत्तत्स्वरूपा विशेषणतैवाननुगता निमित्तम-स्तु किमनन्तवैशिष्ट्यैनेति ।

न्यायलीलावतीप्रकाशविवृतिः

नापि (१)तत्र वैशिष्ट्यसत्त्वमावश्यकमिति भावः । नन्वेवं समवाय-स्यैकत्वे वायौ रूपविशिष्टप्रत्ययोत्पत्तिस्तथापीति चेन्न तस्य रूपाना-धिकरणस्वभावत्वात् । न चैवं श्यामघटे भाविरक्तरूपविशिष्टप्रत्य-यापत्तिः, तद्रूपस्य तदानीमभावात् । प्रत्यक्षे विषयस्यापि कारण-त्वात् । पटाभावस्यैव (२) तदान्यत्र विद्यमानत्वात् । न च तवापि कथं न तत्र पटाभावविशिष्टधीरिति वाच्यम्, कालविशेषावच्छेदेनैव तस्याधिकरणविशेषसम्बन्धात्मकत्वात् । न चैवं वैशिष्ट्यस्यापि क-दाचिदेवाधिकरणविशेषसम्बन्धात्मकत्वमिति वाच्यम्, सम्बन्धा-भावे तथाऽदर्शनात् । न चान्यत्र स्वरूपसम्बन्धेनैतद् दृष्टमिति वा-च्यम्, एवमपि तत्तत्कालवैशिष्टस्य (३) सम्बन्धत्वेऽननुगमतौ-ल्ये क्लृप्तस्यैव स्वरूपस्य सम्बन्धत्वकल्पनात् । समवायस्थले त्व-नुगतस्य समवायस्य सम्बन्धत्वेऽप्यधिकरणस्वाभाव्यादेव प्रत्ययो-पपत्तेरित्युक्तत्वादिति । मिश्रास्तु वैशिष्ट्यस्वीकारे ध्वंसनाशाप-त्तिः, नित्यसम्बन्धिकारणनाशत्वेनैव नाशकत्वात् । न च समवायि-नाशत्वेन नाशकता समवायत्वस्य जातेरभावे नित्यसम्बन्धस्यैव तथात्वात् । एतच्च(४)समवायान्यत्वविशेषणे गौरवात् । [न चाख-ण्डस्यैव समवायस्यावच्छेदककोटिनिवेश इति वाच्यम्, किञ्चिद्ध-र्म्मालिङ्गताया एव व्यक्तेरवच्छेदकत्वदर्शनादित्यधिकः पाठो द्वितीया-दर्शपुस्तके ।] न च जन्यभावत्वं नाश्यतावच्छेदकमतो न ध्वंसनाश इति वाच्यम्, प्रागभावसाधारण(५)स्य कादाचित्कत्वमात्रस्यैव ला-घवेन तथात्वात् । न चैवं तवापि ध्वंसनाशापत्तिः, नाशकाभावात् । नित्यस्येत्यादिव्याप्तौ च नित्यपदस्यैव कालिकपरत्वात् । अन्यथा

(१) 'पटाभावानुरोधेनापि' । (२) 'वस्य च तस्यैव तदा' । (३) 'कालविशिष्टवैशिष्ट्यस्य' ।
(४) 'तत्र' । (५) 'रण्यस्य' ।

आधारत्वं तु गुरुत्वप्रतिबन्धकत्वं क्वचित्समवायिकारणत्वमभिव्यञ्जकत्वं वेत्यूहनीयम् । अन्यथा तस्योभयवृत्तित्वेनोभय-

न्यायलीलावतीकण्ठाभरणम्

तद्व्यवहारे प्रथमवैशिष्ट्यस्यापि किमङ्गीकारेणेति विशेषात् । निरस्ता चेयं "मणिमयूखे" विस्तरेण ।

आधारत्वमिति । प्रतिबध्यपतनानाश्रयत्वे सति पतनप्रतिबन्धकसंयोगवन्मूर्त्तत्वम् । तर्हि पटे शौक्ल्यमिति धीर्न स्यादित्यत आह—क्वचिदिति । कथं तर्हि गवि गोत्वमित्याधारत्वधीरित्यत आह—व्यञ्जकत्वञ्चेति(१)। सामान्यतो विशेषणवत्त्वं आधारत्वम् । विशेषणत्वं चाधेयत्वम् । विशेषणवत्ता च क्वचित् समवायेन क्वचित् संयोगेन क्वचित् स्वरूपसम्बन्धेन यद्यपि, तथापि अनेनोपाधिनानुगतधीः । अत एव दध्नि कुण्डमिति न धीः कुण्डस्य दधिविशेषणत्वेनाप्रतीतेः । प्रतीतौ वा

न्यायलीलावतीप्रकाशः

गुरुत्वेति । यथा कुण्डे दधीत्यत्र । तन्तुषु पटः पटे शुक्ल इत्यत्र समवायिकारणत्वम् । समवायित्वं कार्येऽपि वर्त्तत इति तद्व्यावर्त्तनार्थं कारणेत्युक्तम् । समवायिकारणस्य क्वचिदभिव्यञ्जकत्वेऽपि क्वचि

न्यायलीलावतीप्रकाशविवृतिः

चरमक्रियाध्वंसस्य प्रतिबन्धकाभावत्वेन समानाधिकरणक्रियां प्रति योग्यत्वेऽपि कुतो न फलोपधानमिति वदन्ति । तच्चिन्त्यम् । गुणत्वावच्छिन्नप्रतियोगिकसम्बन्धिनाशत्वेनैव नाशकत्वात्(२)। न चैवं गौरवम् । तथापि(३)ध्वंसाप्रतियोगित्वरूपनित्यत्वविवेचने(४)गौरवादिति । नवीनास्तु । अभावनिरुपिताधारताप्रयोजकसम्बन्धवत्त्वमेवाभावाधिकरणताप्रयोजकमनुगतत्वात् । भावे तु नैवं गोत्वे गौरितिप्रत्ययापत्तेरित्यननुगतमेवाधारताप्रयोजकमिति वदन्ति । तत्तुच्छम् । अनुगतभावाधिकरणत्वनियामकनिर्व्वाहाय भाव एव स्वरूपसम्बन्धस्वीकारे वैपरीत्यापत्तेरिति दिक् ।

क्वचिदभिव्यञ्जकत्वेऽपीति । अभिव्यञ्जकत्वं तद्विषयकप्रतीतौ नियमतो विषयत्वम् । तच्च रूपादिकं प्रति घटादेरस्त्येवेत्य-

(१) "अभिव्यञ्जकत्वं वेति" मूलानुसारी पाठः ।
(२) गुणत्वावच्छिन्नसम्बन्धिनाशकत्वात् । (३) तथापि । (४) 'त्वनिर्वचने गौ०' ।

न्यायलीलावतीकण्ठाभरणम्

तथा प्रतीतावपीष्टत्वात् । आश्रयासिद्धिरपि तद्विशेषणवत्तासिद्धि
वानुगता । भूतले घटाभाव इत्यत्रापि अभावस्यैव विशेषणत्वम् । अत
एव सन्निकर्षोऽपि स एव । ननु सम्बन्ध एव कश्चिदाधारत्वं स्यादि
त्यत आह—अन्यथेति ।

ननु सामान्यवृत्तित्वात् सामान्यादिभिन्नं सादृश्यं पदार्थ

न्यायलीलावतीप्रकाशः

न्न तथेति तस्य पृथगुपादानम् । यथा समवायिकारणत्वेऽप्याक
शस्य नाभिव्यञ्जकत्वम् । इह गवि गोत्वमित्यत्र व्यक्तेरभिव्यञ्जकत्वम्
अन्यथेति । एकवृत्तित्वानङ्गीकार इत्यर्थः । अनुगतं त्वाधारत्वं धर्मस
म्बन्ध एव, धर्मश्च कुडस्य दधि, तन्तूनां पटो, व्यक्तेश्च गोत्वम् । तत्स
म्बन्धस्य त्वप्रत्ययेनाभिधानम् । स च क्वचित्संयोगः क्वचित्समवायः क्व
द्विशेषणता । सम्बन्धस्योभयवृत्तित्वाद्दध्याद्यपि कुण्डाद्याधारः स्य
दित्यत्र क्वचिदिष्टापत्तिः, कुण्डे दधीत्यनया च प्रतीत्या दध्यादि
प्रति कुण्डादेर्धर्मतानुल्लेखान्न तथा प्रतीतिः, कुण्डसंयोगो दध्नीत्य
दौ तथा प्रतीयत एव कुडस्याधेयकोटिप्रविष्टत्वात् । विशिष्य

न्यायलीलावतीप्रकाशविवृतिः

र्थः । धर्मसम्बन्ध इति । आकाशं च यदि निरधिकरणं तदा धर्मत
मत्र वृत्तिमत्त्वम् । क्वचिदिति । प्रतीताविति शेषः । विशिष्येति । संयो
गेन सम्बन्धेन गुरुणो द्रव्यस्य पतनप्रतिबन्धकत्वमित्यर्थः(१) ।
ण्डादावतिव्याप्तिवारणाय सत्यन्तम् । पुरुषस्यापि कदापि कदाचि
प्रतिबध्य(२)पतनाश्रयत्वात्तत्तत्पदम् । पुरुषान्तरस्यापि तदा
रत्वप्रसङ्गवारणाय द्वितीयं तत्तत्पदम् । पतनप्रतिबन्धकत्वं संयो
धारस्य पुरुषस्यापीति पुरुषावयवेऽतिव्याप्तिवारणाय संयोगपद
मेघादिपतनप्रतिबन्धकसंयोगवत्त्वमीश्वरस्यापीति तत्राप्याधार
व्यवहारः प्रसज्येतेति मूर्त्तपदम् । पतनप्रतिबन्धकत्वं च पतनप्र
भावप्रयोजकत्वं न तु पतनकारणीभूताभावप्रतियोगित्वं मूर्त्तपद
र्थतापत्तेः । न च पतनविशेषगर्भत्वे यदपतितमेव नष्टं तत्राप्रसि
तदाधारत्वे लक्षणाव्याप्तिः । एतस्य विशेषलक्षणत्वेन तस्यात्र
क्ष्यत्वात् । अत एव पतनाश्रयत्वगर्भतयापि नात्माश्रयः, तद(न्य

(१) 'णो द्रव्यस्येत्यर्थः' । (२) 'तिबन्ध प० ।'

न्नापि सप्तमी स्यात् । एकवृत्तित्वे च सम्बन्धत्वव्याकोपः ।

न्यायलीलावतीप्रकाशः

तत्तत्प्रतिबध्यपतनाश्रयान्यत्वे सति तत्तत्पतनप्रतिबन्धकसंयोगवन्मूर्त्तत्वमाधारत्वम्, ईश्वरश्चामूर्त्त इति नाधारः । न च सहैव कुण्डेन पतति दध्नि तदसम्भवः, तदा कुण्डस्य तदनाधारत्वात् पतनविशेषप्रतिबन्धकत्वाद्वा अननुगतमेव वाऽधारत्वम् । आधारशब्दश्च गोशब्दवदनेकार्थः । अनुगतधीश्च शब्दमात्रानुगमात् । न चैवमधिकरणताभेदे सत्याश्रयासिद्ध्यादेर्भेदप्रसङ्गः, यत्र येन रूपेण सिद्धिर्विवक्षितागमकत्वाय तत्र तदपगम इत्यनुगमात् । सर्व्वनाम्नामनुगतेन रूपेण बुद्धिस्थत्वादिना तत्तद्विशेषप्रतिपादकत्वमिति व्युत्पत्तेः । एवमाधेयत्वमपि वाच्यमिति सम्प्रदायविदः ।

न्यायलीलावतीप्रकाशविवृतिः

स्यैव लक्ष्यत्वात् । मिश्रास्तु । पतनप्रतिबन्धकतावच्छेदकावच्छिन्नतत्तत्संयोगवत्त्वं विवक्षितम् । प्रतिबन्धकतावच्छेदकं क्वचित् स्वाधिकपरिमाणनिविडद्रव्यसंयोगत्वम् । यथा दण्डसंयोगादौ । क्वचित्प्रान्तर्वर्त्तिसमानपरिमाणसमुदितसंयोगत्वम् । यथा गृहधारकस्तम्भसंयोगादौ । क्वचिज्जलविशेषसंयोगत्वम् । यथा नौकादिधारकजलसंयोगादौ । सर्व्वत्र प्रतिबन्धकतावच्छेदकत्वमनुगमक(१)मित्याहुः । एतेन धर्मत्वमेवाधेयत्वं सामान्यतो, विशिष्य तु प्रतिबध्यपतनाश्रयत्वं तद्योग्यत्वं वेत्यपि सूचितम् । तदा कुण्डस्यानाधारत्वे दध्नः पृथक्पातापत्तिरित्यरुचेराह—पतनविशेषेति । कुण्डावच्छिन्नदेशसंयोगरूपेत्यर्थः । तदपगम इत्यनन्तरमाश्रयासिद्धिरिति शेषः । "तदपगमः" सिद्ध्यपगमः । ननु यत्तदन्तर्भावेन निरुक्तमप्यननुगतमेवेत्यत आह—(सर्वना?)म्नामिति । अनुगतसम्भवेऽननुगतं हेयमत्र विशेषाधारत्वस्याननुगमेऽपि सामान्याधारत्वमादायैव पदप्रवृत्तिरित्यस्वरसादाह—सम्प्रदायविद इति । यथाश्रुतग्रन्थानुसारिण इत्यर्थः ।

नन्वतिरिक्तसादृश्यस्य पदार्थान्तरत्वनिषेधे आश्रयासिद्धिः ।

(१) 'त्वमनर्थकमि०' ।

नापि सादृश्यम् । तद्धि सामान्यादेरनेकवृत्तित्वम् । तच्चै-
कव्यक्तिग्रहणसमयेऽगृहीतमपि प्रतियोगिग्रहेऽवगम्यत इति सिद्धं

न्यायलीलावतीकण्ठाभरणम्

न्तरं स्यादित्यत आह—नापि सादृश्यमिति । पदार्थान्तरं सामा-
न्य एव तदन्तर्भावादिति शेषः । सामान्यादौ तत् प्रतीतिः
कथं स्यादत आह—सामान्यादेरिति । तत्रापि अनेकवृत्तित्वमेव उपा-
धिसामान्यं सादृश्यमित्यर्थः । यत्तु सामान्यादेरनेकवृत्तित्वमित्य-
नेकवृत्ति सामान्यमेवादूरविप्रकर्षादुच्यते इति व्याख्यानं तदयुक्तम्
सामान्येऽनेकवृत्तित्वविशेषणासम्भवात् सम्भवव्यभिचारे च वि-
शेषणस्य सार्थकत्वात् । तर्हि व्यक्तिमात्रग्रह एव तद् भासेत न तु
प्रतियोगिज्ञानमपेक्ष्येतेत्यत आह—तच्चेति । तद्भिन्नत्वे सति तद्ग-
तभूयोधर्म्मवत्त्वस्योपाधेः सादृश्यत्वेन प्रतियोगिग्रहापेक्षग्रह-
त्वमित्यर्थः । रामरावणयोरिवेत्यादौ तदीययुद्धानुकारेण
सादृश्यमिति भावः । सिद्धमिति । अयोगव्यवच्छेदान्ययोगव्य-

न्यायलीलावतीप्रकाशः

नापीति । सदृशबुद्धौ विशेषणतया भासमानं न पदार्थान्तरमि-
त्यर्थः । तद्धीति । यद्यप्येवं सामान्यादिः सदृशः स्यान्न तद्वान् गवादि-
स्तथाप्यनेकवृत्तिसामान्याद्येव सादृश्यम् । अनेकवृत्तित्वं त्वदूरवि-
प्रकर्षेणोक्तम् । ननु सामान्यं निष्प्रतियोगिकं सादृश्यं तु सप्रतियो-
गिकं तेन सदृशं इत्यनुभवादित्यत आह—तच्चेति । यद्यपि सामान्य-
मप्रतियोगिकं तथापि तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वं सादृश्य-
मतो विशेषणांशस्य सप्रतियोगिकत्वात्तद्विशिष्टमपि तथेत्यर्थः
सामान्यं च जात्युपाधिसाधारणं तेन सामान्ये सामान्यान्तराभावे

न्यायलीलावतीप्रकाशविवृतिः

सामान्यरूपस्य च तन्निषेधे सिद्धसाधनमत आह—सदृशेति । तथा
चोभयसिद्धत्वेन रूपेण पक्षतेति नोक्तकल्पावकाशः । "अदूरविप्र-
कर्षः" स्वसम्बन्धिवृत्तित्वम् । तद्भिन्नत्व इति । तदसाधारणधर्म्मशून्यत्व
इत्यर्थः । तस्य च तत्पदार्थनिरूपणाधीननिरूपणत्वं सप्रतियोगित्वम्
यथाश्रुते भेदस्य पृथक्त्वरूपस्य सावधितया तस्मात्सदृश इति प्र-

पडेव पदार्था इति । विचारासहत्वाच्च । तथाहि तत्स्पर्शवन्न वा । नेति पक्षे एकवृत्ति न वा । आद्ये द्रव्यत्वम् । द्वितीये गुणकर्मविशेषान्यतमत्वम् । शेषे संयोगसामान्यसमवायविभागान्यतमत्वम् । गुणवृत्तित्वादि गुणादित्वे न स्यादिति चेत् , गुण-

---

न्यायलीलावतीकण्ठाभरणम्

च्छेदाभ्यामधिकव्यवच्छेदः पर्य्यवसन्न एवेत्यर्थः । विचारेति । सादृश्यादीनां पदार्थान्तरत्वं विचारं न सहत इत्यर्थः । तमेव विचारमुपक्रमते—तदिति । "परस्परविरोधे हि न प्रकारान्तरस्थितिः । नैकतापि विरुद्धानामुक्तिमात्रविरोधतः ॥" इति भावः । आद्य इति । स्पर्शवत्त्व इत्यर्थः । द्वितीय इति । निःस्पर्शत्वे सत्येकसमवेतत्व इत्यर्थः । शेष इति । निःस्पर्शत्वे सत्यनेकवृत्तित्व इत्यर्थः । समवायस्यानेकवृत्त्वं स्वरूपसम्बन्धेन । भावत्वे सत्येतत् द्रष्टव्यम् । भावस्याप्यनेकवृत्तित्वाभ्युपगमात् । गुणेति । आद्येनादिपदेन धर्म्मवृत्तित्वादेः, द्वितीयेन

न्यायलीलावतीप्रकाशः

ऽपि लक्षणरूपोपाधिसत्त्वात् सदृशव्यवहार इति भावः । शेष इति । निस्पर्शैकवृत्तित्वशून्य इत्यर्थः । अत्र संयोगपदमनेकवृत्तिगुणोपलक्षणम् । समवायपदं च समवाय्युपलक्षकम् । तेन द्वित्वादिव्योमादीनां नाभावः । नन्वात्मनोऽपि नवमद्रव्यत्वसाधने एतादृशपरिशेषापत्तिः, न, अस्य परिशेषस्यैतत्कोटिचतुष्टयान्तर्भूतत्वेन सादृश्यस्य द्रव्यादिषट्कान्तर्भूतत्वानुमानपरत्वात् , आत्मनि चाष्टद्रव्यनियतरूपाभावेन परिशेषानवतारात् । गुणवृत्तित्वादीति । सादृश्यं न गुणः, गुण-

न्यायलीलावतीप्रकाशविवृतिः

त्ययापत्तेः । यथाश्रुते द्वित्वादावाकाशादौ व्यभिचारादाह—अत्रेति । तथा चाजहत्स्वार्थलक्षणया संयोगपदं व्यासज्यवृत्तिगुणपरम् । समवायपदं चावृत्तिपरमित्यर्थः । आत्मनि चेति । यद्यपि आत्मा द्रव्यं सत् स्पर्शवन्न वा । आद्ये पृथिव्याद्यन्यतमत्वमन्त्ये व्योमाद्यन्यतमत्वमिति कोटिद्वयान्तर्भावेणाप्यत्राष्टद्रव्यान्तर्भावः साधयितुं शक्य एव । तथापि तद्धर्म्मस्येच्छादेरष्टद्रव्यावृत्तित्वात् तस्य पार्थक्यम । न त्वेवमत्रेत्यर्थः । द्रव्यकर्म्मेत्याद्युपलक्षणम्, अभावविशेषवहिर्भा-

वृत्तित्वादि गुणादित्वे न स्यादिति किं प्रसङ्गमात्रम्, अथ गुणवृत्तित्वादेः स्वीकृतपदार्थातिरेकसाधनम्। नाद्यः। स्वतन्त्रतर्कस्यादूषकत्वात्। नेतरः। उक्तरूपचतुष्टयबाहिर्भाविस्य

न्यायलीलावतीकण्ठाभरणम्

च कर्मत्वादिसङ्ग्रहः। सादृश्याधारत्वं वैशिष्ट्यादीनां यदि गुणादित्वं वक्तव्यं तदा गुणादिवृत्तित्वं तेषां न स्यादित्यर्थः। प्रसङ्गेति। प्रसङ्गस्तर्कः। मात्रपदेन प्रमाणानुपग्रह उक्तः। गुणवृत्तित्वादेरिति। सादृश्यादि न गुणो गुणवृत्तित्वादित्याद्यनुमानेन षट्पदार्थीवर्हिभावसाधनमित्यर्थः। स्वतन्त्रेति। दूषणस्यापि प्रमाणोपग्रहसापेक्षत्वादन्यथातिप्रसङ्गादिति भावः। नन्वात्माश्रयान्योऽन्याश्रयादिः स्वतन्त्र एव तर्को दूषणमिति चेन्न, आत्माश्रयादिभिन्नस्य स्वातन्त्र्येण दोषत्वाभावादितिभावात्। यदि गुणः स्यात् गुणवृत्तिर्न स्यादित्यादेरपि स्वातन्त्र्येण दोषत्वं स्यादिति चेन्न, एतस्य विपर्य्यये पर्य्यवसन्नत्वेन स्वीकृतपदार्थातिरिक्तसाधनं वेति द्वितीयविकल्पप्रवेशात्। उक्तरूपेति। स्पर्शवत्त्वं निःस्पर्शैकवृत्तित्वं निःस्पर्शानेकवृत्तित्वं स्ववृत्ति-

न्यायलीलावतीप्रकाशः

समवेतत्वात्। नापि सामान्यं सामान्यवृत्तित्वात्। न समवायः समवायवृत्तित्वात्। द्रव्यकर्मवर्हिभावस्तूभयसिद्ध इत्यर्थः। स्वतन्त्रेति। स्वातन्त्र्यं तर्कस्यानुग्राह्यमानासहकृतत्वम्। यद्यपि द्रव्याद्यन्तर्भावसाधने व्याघातापादकतया तर्कमात्रमपि दूषणं भवत्येव तथाप्यनेन विचारेणोक्तान्तर्भावप्रदर्शनद्वारा सादृश्यवहिर्भावसाधने बाधकमुच्यते, तत्र च वहिर्भावसाधनमेव दूषणं न तु स्वतन्त्रतर्क इत्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

वोऽपि द्रष्टव्यः। यद्यपीति। द्विविधस्तर्कः। साधको दूषकः(१)। तत्राद्यस्यैवानुग्राह्यमानापेक्षा न चरमस्येति भावः। तथापीति। नात्र सिद्धान्तिनः सादृश्यान्तर्भावसाधनं मुख्यतोऽभिमतमपि तु बहिर्भावसाधनबाधकतयेति निरुक्ततर्केणान्तर्भावसाधननिषेधेऽपि बहिर्भावासिद्धौ तत्साधकं मानान्तरमास्थेयम्। न च तदस्तीत्य-

(१) 'कश्च'।

षट्पदार्थातिरेकित्वस्य विरोधादशक्यसाधनत्वात् ।

न्यायलीलावतीकण्ठाभरणम्

त्वं चेत्युक्तरूपचतुष्टयम् । चतुर्थी च कोटिराक्षेपलभ्या विभुचतुष्कोपग्रहाय । पदार्थातिरेकित्वस्येति पूर्व्वविवरणम् । यद्वा उक्तरूपचतुष्टयवहिर्भावस्येति । सति सप्तम्यर्थे षष्ठी । ननु सङ्ख्याया गुणादिवृत्तित्वात् पदार्थान्तरत्वमेवं महत्त्वपृथक्त्वयोरपि । भवति हि महानेकः शब्दः पृथगिति प्रतीतिरिति चेन्न, अग्रे निरसनीयत्वात् ।

ननु स्वत्वं पदार्थान्तरमस्तु । न हीदं गुणः गुणेऽपिवृत्तेः । प्रतीयते हि अरुणैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणातीतिश्रुतेरारुण्यस्यापि साधनत्वम् । न चास्वत्वास्पदेन क्रयः सम्भवति प्रमाणं चात्र प्रत्यक्षमेव । भवति हि चैत्रस्येदं धनमिति चाक्षुषी प्रतीतिः, चैत्रकर्त्तृकक्रियादिज्ञानस्य सापेक्षचक्षुर्वेद्यत्वेऽबाधकत्वात् । न हि इन्द्रियापातमात्रेण ब्राह्मणत्वं बालत्वं च न गृह्यते इति न तयोश्चाक्षुषत्वम् । अस्तु वा प्रतिग्रहादिज्ञानसहकृतमनोवेद्यत्वम् । न च प्रतिग्रहादिज्ञानस्य प्रमाणान्तरत्वापत्तिः, क्रयप्रतिग्रहादिज्ञानानामेवावच्छेदकाभावात इन्द्रियलिङ्गशब्दादीनां तत्सत्त्वात् ज्ञानत्वस्य चातिप्रसञ्जकत्वात् । यद्वा प्रतिग्रहादिक्रिया प्रतिग्राह्यप्रतिग्राहकनिष्ठसम्बन्धजनिका कर्त्तृकर्म्मनिरूप्यक्रियात्वात् गमनवदित्यनुमानमेव स्वत्वे प्रमाणम् । न च कर्त्तृकर्म्मभावेन सिद्धसाधनं चैत्रो गां प्रतिगृह्णाति चैत्रस्य गौः स्वमिति प्रतीतिभेदात् । न च चैत्रो ग्रामं त्यजतीति व्यभिचारः कर्त्तृकर्म्मनिष्ठकिञ्चिज्जनकत्वस्य साध्यत्वात्त्यजिक्रियाया अपि विभागजनकत्वात् । किं च प्रतिग्रहादेराशुविनाशितया चिरभाविनि योगफलाजनकत्वादान्तरालिकस्वत्वाद्यव्यापारसिद्धिः, तं विना विनियोगासिद्धेः । क्रियाध्वंसादिना चान्यथासिद्धौ यागानुभवयोरपि अपूर्व्वसंस्कारव्यापारवत्ताभावप्रसङ्गः । चौर्य्यमपि स्वत्वजनकमेवेति चौर-

न्यायलीलावतीप्रकाशः

उक्तरूपेति । तत्स्पर्शवन्न वेत्यादीत्यर्थः । वहिर्भावस्य विवरणं षट्पदार्थातिरेकित्वस्येति ।

न्यायलीलावतीप्रकाशविवृतिः

भिसन्धायैतदुक्तमिति भावः । पौनरुक्त्यभयादाह—वहिरिति ।

न्यायलीलावतीप्रकाशः

ननु स्वत्वं पदार्थान्तरमस्तु । तद्धि न सामान्यादित्रयात्मकमु-त्पत्तिविनाशशालित्वात् । नापि द्रव्याद्यात्मकं गुणेऽपि वृत्तेः । अथ तत्र मानाभावः । तथा हि तत्र प्रत्यक्षं न मानम् । तद्धि न वाह्यं स्व-त्वास्पदग्रहेपि तत्र संशयादस्वमितिविपर्ययाच्च । नापि मानसं मनसो वहिरप्रवृत्तेः । स्वत्वमवाह्यमेव वाह्यं तु धनं तस्य निरूपकमात्र-मिति चेन्न, उक्तोत्तरत्वात् । प्रतिग्रहादिज्ञानसहकृतमनोग्राह्यमिति चेन्न, प्रतिग्रहादिज्ञानस्य मानान्तरतापत्तेः । यदेवासाधारणं सहका-र्य्यासाद्य मनोवहिर्गोचरां प्रमां जनयति, तस्यैव मानान्तरत्वात् । नापि प्रतिग्रहादिक्रिया धनप्रतिग्रहीत्रादिसम्बन्धजनिका कर्त्तृकर्म-

न्यायलीलावतीप्रकाशविवृतिः

असहनतया 'विरोधा'दिति फक्किकामव्याख्यायैव शङ्कते—नन्विति। क्वचित्फक्किकाव्याख्यानन्तरमेवायमाक्षेप इति क्रमः । गुणेऽपीति । अरु-णयेत्यत्रारुण्यगुणस्य क्रयसाधनत्वं प्रतीयते । न च स्वत्वानाश्रयत्वस्य तथात्वं युज्यते परवस्तुस्वत्वोत्पत्त्युपाधिकपरस्वत्वापादनार्थकत्या-गकर्म्मत्वाश्रयस्य क्रयसाधनत्वादिति भावः । गुणकर्म्मानात्मकत्व-मप्युक्तहेतुनैव साधनीयमिति द्रष्टव्यम् । वाह्यं त्विति । तस्य चोपनी-तस्यापि भानमिति भावः । उक्तेति । धनज्ञाने संशयाभावापत्तेरित्य-र्थः । प्रतिग्रहादीति । तथा च व्यञ्जकाभावात् संशय इत्यर्थः । प्रतिग्रहा-दिज्ञानस्येति । यद्यप्यवाह्यस्वत्वविशेष्यकमुपनीतधनविशेषणकं च ज्ञा-नं मनसा जन्यत इति न प्रतिग्रहादिज्ञानस्य मानान्तरता । वहिर्वि-शेष्यकप्रमायां मनःसहकारिणस्तत्त्वात्(१) । स्वत्वविशेषणक(२)-ज्ञानं च उपनयसहकृतमनोजन्यं प्रमाणान्तरजन्यं च क्वचित् । न चोपनयस्य प्रमाणान्तरता निर्व्यापारत्वादन्यथा कविकाव्यमूलज्ञा-नजनकोपनयस्यापि तथात्वापत्तेस्तथापि स्वत्वमज्ञात्वा प्रतिग्रहत्व-मेव ज्ञातुमशक्यं तद्घटितत्वात्तस्येति न प्रतिग्रहादिव्यङ्ग्यं स्वत्वमि-त्यत्र तात्पर्य्यमिति मिश्राः । केचित्तु । धननिष्ठस्य स्वत्वस्य प्रतीय-मानतया वक्ष्यमाणक्रमेण च तस्योपपत्त्या नावाह्यं स्वत्वमित्यत्र ता-त्पर्य्यमित्याहुः । नापीति । न चास्य सम्बन्धस्योभयीयतायामिदं ममे-तिवदस्याहमिति स्यादिति वाच्यम् , तस्योभयनिरूप्यत्वेऽप्येकस्या-

(१) नस्तथात्वात् । (२) धनविशेष्यकेत्यधिकः पाठो द्वितीयपुस्तके ।

न्यायलीलावतीकण्ठाभरणम्

स्य तत्र क्रमेण विनियोगः। न च तद्धनविनियोगे शास्त्रशिष्टवि-भागाभाव(१)प्रसङ्गः, द्यूतोत्कोचादिसाधारण्यात्। न च पूर्व्वस्वा-मिना चौरापहृतधनानाच्छेदप्रसङ्गः, तदाच्छेदस्यापि श्रौतत्वात्, कु-सीदधनविनियोगवत् चोरितविनियोगे शास्त्रशिष्टविगानाभावाच्च। न च स्वत्वस्य स्वरूपतस्तद्विनियोगकारणत्वं तदा तदज्ञानदशा-यां विनियोगानध्यवसायो न स्यात् ज्ञातस्य कारणत्वे क्रयाद्युपाय-विषयत्वज्ञानमेव तन्त्रं तदन्तरेण स्वत्वस्याप्यज्ञानादिति वाच्यम्, स्वत्वसाधकप्रमाणस्य दर्शितत्वात्, ज्ञायमानस्यैव तस्य विनियोग-जनकत्वात्। तज्ज्ञानं च प्रतिग्रहादिज्ञानमन्तरेणेत्यन्यदेतत्। अत एव विनियोगरूपेषु साधनताज्ञानादेव प्रवृत्तौ किं स्वत्वेनेति परास्तम्, तज्ज्ञानस्यान्वयव्यतिरेकाभ्यां कारणत्वावधारणादिति पूर्व्वपक्षसङ्क्षेपः।

अत्रोच्यते। स्वत्वस्योत्पाद्यत्वे कारणाननुगमः। न हि प्रति-ग्रहादावैकरूप्यमस्ति येन कारणताऽवच्छिद्यते। शास्त्राविरुद्धार्ज्जनो-पायविषयत्वं चेत् तदा तदेवास्तु स्वत्वं किमविवेकेन। एवं स-त्युत्पादविनाशप्रत्ययस्तत्र कथमिति चेत् उपाध्युपधानानुपधा-नाभ्यां दण्डित्वस्येव दण्डसम्बन्धासम्बन्धाभ्याम्। विनियोगश्च त-ज्ज्ञानाधीनः। तच्च ज्ञानविषयत्वमिव चिरस्थायि। आगमान्तरान-न्तरितार्ज्जकागमविषयत्वमेव स्वत्वमनुगतम्। आगमश्च धनार्ज्जन-हेतुः क्रिया प्रतिग्रहादि(२)। तदुक्तम्—"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जय" इत्यादि(३)। अत एव दर्शिते प्रत्यक्षानुमानेऽप्यन्य-थासिद्धे। आगमनिषिद्धो द्यूतोत्कोचादिरनापदि कृष्यादिः प्रत्यवाय-हेतुस्तदर्ज्जिते च विनियोगं प्रति न विशेषः। चौर्य्यमपि तथा। अत एवा"स्तेयमग्नये काष्ठ" मित्यादिना काष्ठादिस्तेयस्य प्रत्यवायाभाव उक्तः। अरण्यफलादौ च उपादानमेवागमः। न च क्रीत्वा दत्तेऽपि स्वत्वं स्यात् तत्रागमान्तरानन्तरितत्वाभावात्। क्वचित् स्वत्वे स-

(१) 'विगानाभा'०।

(२) अत एव "आगमोऽभ्याधिको भोगा" दितियाज्ञवल्क्यवचनव्याख्यानावसरे मिताचराकाराः—"स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः।" (२।२१)

(३) "प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥" इति शेषः। मनु—१०।११५

न्यायलीलावतीकण्ठाभरणम्

त्यपि यथेष्टविनियोगप्रतिबन्धो वाचनिकः। यथा—"एको ह्यनीक (शः ?) सर्व्वत्र दानाधमन(१)विक्रय"(२)इत्यादौ, "सा यथा काममश्नीयात् दद्याद्वा स्थावराद्दृत"(३)इत्यादौ च। यदि च स्वत्वं कार्य्यं स्यात्तदा द्रव्यं गुणः कर्म्म चेति विकल्पं न सहेत। क्रयादिश्चागम आरण्यकफलादौ समान इति।

न्यायलीलावतीप्रकाशः

निरूप्यक्रियात्वात् गमनवदित्यनुमानं तयोः स्वत्वाख्ये सम्बन्धे मानं कर्तृकर्मभावेन सम्बन्धेन सिद्धसाधनात्। न च गन्तृग्रामसंयोगवत् साक्षात्सम्बन्धः साध्यः, ग्रामं त्यजतीत्यादावनैकान्तिकत्वात्। न हि तत्र त्यागक्रियया कर्तृकर्मणोः साक्षात्सम्बन्धो जन्यते। नाप्यर्जितेषु सर्व्वत्र स्वमितिप्रयोगोऽनुगतधर्मनिमित्तकोऽनुगतशब्दप्रयोगत्वात् गोशब्दप्रयोगवदित्यनुमानम्, अक्षाद्यनुगतप्रयोगेऽनैकान्तात् तत्रापि चाक्षादिपदवाच्येऽनुगतधर्मस्वीकारापत्तेः। अथ प्रतिग्रहा-

न्यायलीलावतीप्रकाशविवृतिः

श्रयत्वादपरस्य च प्रतियोगित्वादन्यथा व्याप्त्यादावप्यगत्यापत्तेरिति भावः। धनप्रतिग्रहीत्रादीति प्रकृताभिप्रायम्, कर्त्तृकर्मेति बोध्यम्। अन्यथा दृष्टान्तासङ्गतेः। कर्तृकर्मेति। अस्तिक्रियायां स्वध्वंसप्रागभावानवच्छिन्नसत्त्वरूपायां कर्तृनिरूप्यायां कर्म्मशून्यतया कर्म्मसम्बन्धाजनिकायां व्यभिचार इति कर्म्मपदम्। घटं जानामीत्यत्र विषयरूपकर्म्मनिरूप्यायां ज्ञानक्रियायां व्यभिचार इति कर्तृपदम्। सा च नात्मनिरूप्येति तद्वारणम्। क्रियापदं तु अविगीतक्रियापरम्, चौर्यादिक्रियाव्यभिचारवारणाय क्रियापदस्याविगीतक्रियायामेव लोकप्रसिद्धेः। अत एव चौर्य्ये अकीर्तिव्यपदेशः। गमनवदिति। उत्तरसंयोगावच्छिन्नस्पन्दस्य(४) संयोगवद् द्विष्ठतया उभयनिरूप्यत्वमिति भावः। सिद्धसाधनादिति। कर्त्तृव्यापार्य्यकरणव्यापारविषयत्वरूपपरम्परासम्बन्धेनेत्यर्थः। ग्राममिति। विभागस्य द्विष्ठतया विभागा-

(१) 'आधमनं बन्धकत्वेन ख्यातमिति "दायभागतत्त्वे" रघुनन्दनः।
(२) "दायभगतत्वे" रघुनन्दनभट्टाचार्य्येण व्यासवचनत्वेन धृतम्।
(३) "दायभागे" जीमूतवाहनधृतनारदवचनम्।
(४) 'गमनस्ये'त्यधिकः पाठो द्वितीयपुस्तके।

न्यायलीलावतीप्रकाशः

नन्तरं यथेष्टविनियोगदर्शनात्तयोः कार्यकारणभावः, स च न साक्षात्सर्वत्र प्रतिग्रहादीनां आशुविनाशित्वात्,विनियोगस्य कालान्तरभावित्वात्। नापि ध्वंसद्वारा, स्मृतेरप्यनुभवध्वंसजन्यत्वापत्तौ संस्कारापलापापत्तेः । प्रतियोगिध्वंसयोरेकत्राजनकत्वात् न तथेति तुल्यम्। तस्मात् प्रतिग्रहादिजन्यो धर्मविशेषः कल्प्यते। स च धनगतः स्वामिनिरूप्यस्तस्य च विक्रयादिना नाश इति मतम् । तन्न, चौर्य्यानन्तरं यथेष्टविनियोगात्तत्रापि स्वत्वकल्पनापत्तेः। न चेष्टापत्तिः चौर्य्योपात्तधने यथेष्टविनियोगे शास्त्रशिष्टविगानानुपपत्तेः, स्वत्वाश्रयत्वाद्विनियोज्यस्य।अपि च तस्य धर्मस्य स्वरूपसतो यथेष्टविनियोगहेतुत्वे मयेदमर्जितमितिज्ञानाभावेऽपि यथेष्टविनियोगापत्तेः । तादृशज्ञानविशेषितस्य च तस्य तद्धेतुत्वे लाघवादावश्यकत्वाच्च तादृशज्ञानस्यैव तद्धेतुत्वापत्तौ तस्यैवासिद्धेः। अत एव प्रतिग्रहादौ नेष्टसाधनताज्ञानं विना प्रवृत्तिरिष्टं च यथेष्टविनियोगान्नान्यत् तेषां चाशुविनाशितया साक्षात् तद्धेतुत्वाभावात् तज्जन्यं धर्मान्तरमस्तीत्यपास्तम्। किञ्च स्वत्वस्य यथेष्टविनियोगहेतुत्वे मानाभावः,विनियोगरूपायाः प्रवृत्तेरिष्टसाधनताधीजन्यतया तन्निरपेक्षत्वात्। न च तद्धर्म्मविशिष्टस्यैवेष्टसाधनत्वमिति वाच्यम्, स्वत्वास्पदानास्पदयो-

न्यायलीलावतीप्रकाशविवृतिः

वच्छिन्नस्पन्दरूपस्य त्यागस्योभयनिरूप्यत्वादिति भावः। न च तदुभयनिष्ठसाक्षात्सम्बन्धधर्ममात्रजनकत्वं साध्यं तथापि संयुतक्रीत्यादौ व्यभिचारादिति भावः। धनगत इति। फलोपपादकस्य व्यापारस्य लाघवेन तत्सामानाधिकरण्यकल्पनादिति भावः। ननु विभागानुपपत्ति(१)र्न स्वत्वबाधिका स्वत्वाश्रयेऽपि शब्दबलेन विनियोगनिषेधात्, सत्यन्वये सर्वस्वदाननिषेधवदित्यरुचेराह—अपि चेति। (२) आदिपदसंगृहीतापेक्षया बहुवचनम्। तादृशेति। क्रीतत्वादिविषयकेत्यर्थः। परकीयेति। यद्यपि बलवदनिष्टाननुबन्धीष्टसाधनत्वं स्वत्वविशिष्टस्यैव तथापि स्वत्वोत्पादकत्वाभिमतप्रतिग्रहादिध्वंसविशिष्टस्यैव तथात्वं न तु पदार्थान्तरकल्पना युक्तेति भावः।

(१) 'गानुत्पत्तिर्न'। (२) 'तेषां चेती'त्यधिकः पाठो द्वितीयपुस्तके।

न्यायलीलावतीप्रकाशः

विनियोगे फले विशेषाभावात्। न हि परकीयस्वत्वास्पदान्नभक्षणे न बुभुक्षा प्रशाम्यति। मैवम्। शब्द एव हि स्वत्वे मानम्। तथा हि या क्रिया क्रयप्रतिग्रहादिः स्वत्वहेतुत्वेन धर्मशास्त्रेण बोध्यते तत एव तदुपात्ते धने स्वत्वमुत्पद्यते। चौर्य्यादि तु न तथेति न तदुपात्ते स्वत्वम्। अत एव स्वत्वे सत्यपि यथेष्टविनियोगनिषेधोऽपि शाब्द एव यथा—

"विभक्ता वाऽविभक्ता वा दायादाः स्थावरे समाः।
नैकः कुर्यात् क्रयं दानं परस्परमतं विना॥"(१)

इत्यनेन सुतानामसम्मतौ दानविक्रयादिनिषेधः स्मर्य्यते।
यथा वा—

"सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते॥"(२)

न्यायलीलावतीप्रकाशविवृतिः

अत एवेति। यत एव स्वत्वं शाब्दमत एव तद्बलेन स्वत्वे सत्यपि कचिद्विनियोगविशेषनिषेधोऽपि शाब्द इति भावः। स्थावरादृत इति। एतच्च पतिदत्तमात्रविषयम्। अन्यथा

"सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्।
दाने च विक्रये चैव यथेष्टं स्थावरेष्वपि"॥ (३)

इत्यनेन विरोधापत्तेः। यद्व्यतिरेकेणेति। अत्रासम्भवनिश्चयोऽभावापादनं यदीदं न क्रियेत यथेष्टं न विनियुज्येतेत्यादिरूपम्। विनियोगोपायविषयत्वं चौरगृहीतेऽपीति शास्त्राविरुद्धत्वमुपायविशेषणम्। तावन्मात्रं च क्रीत्वा विक्रीतेऽपि गतमतीतेऽपि क्रये तद्विषयतायाः स्वयमुपगमादिति यद्व्यतिरेकेणेत्यादि। न च तत्र क्रीतत्वव्यतिरेकप्रयुक्तो विनियोगाभावनिश्चयः किन्नाम विक्रीतत्वप्रयुक्तः(४)। ननु विषयत्वं विशेषणमुपलक्षणं वा। आद्ये क्रियाया आशुविनाशित्वेन उत्तरका-

(१) "दायभागतत्त्वे" रघुनन्दनेन किञ्चिदन्यादृशानुपूर्व्या व्यासवचनतया धृतम्।
(२) तत्रैव तेन कात्यायननारदयोर्वचनत्वेन समुद्धृतम्। सुदायेभ्यः पितृमातृभर्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम्।
(३) "दायभागे" जीमूतवाहनधृतकात्यायनवचनम्।
(४) प्रयुक्तत्वं स्वरूपसम्बन्धविशेषः।

न्यायलीलावतीप्रकाशविवृतिः

लमस्वत्वापत्तिः। नोपलक्षणं क्रीत्वा विक्रीते प्रसङ्गतादवस्थ्यात्। न च तत्र तादृशापादनाभावादेव न तद्विशिष्टं स्वत्वमिति वाच्यम्, तादृशापादनस्य विशेषणतायां सुप्तस्य स्वत्वोच्छेदापत्तिरित्युपलक्षणत्वे प्रसङ्गसम्भवात्। अत्र मिश्राः। आपादनयोग्यतैव लक्षणप्रविष्टा। योग्यता च शास्त्राविरोध्युपायान्तरानन्तरितत्वमेव। एवं च शास्त्राविरुद्धविनियोगोपायसमानकालीनशास्त्रविरोधिविनियोगविरोध्युपायप्रतियोगिकयावदनादिसंसर्गाभावत्वं स्वत्वम्। क्रयेण स्वत्वमिति व्यपदेशस्तु सुवर्णेन धनीतिवत् सामान्यविशेषभावादुपपादनीयः। विक्रयेण तन्नाश इतिव्यपदेशस्तु यत्किञ्चित्समुदायिनाशेनैव समुदायनाशव्यवहारादुपपादनीयः। न च स्त्रीसौदायिकाव्याप्तिः, तत्र यथेष्टविनियोगाभावादिति वाच्यम्, तद्विनियोगोपायविषयत्वं तद्विनियोगप्रयोजकीभूत(१)स्वत्वविषयत्वरूपमित्याशयात्। वस्तुतः सौदायिके यथेष्टविनियोगयोग्यत्वमेव। अत एव दानं तत्र सिद्ध्यत्येव पुरुषस्तु प्रत्यवैति निषेधबलादन्वये सति सर्वस्वदानवदतिथावभोजिते स्वीयान्नभोजनवच्च। इदं च स्वत्वं पत्न्यादावपि दानविषयत्वात्(२)। अत एव तत्र दानादिनिषेधोऽपि। तद्दानं न भवत्येव। किन्तु दानप्रतिरूपकम्। दानप्रतिषेधस्तु यथेष्टविनियोगात्मकस्वत्वनिषेधपर एव। विनियोगविशेषस्तु स्वत्वेऽसत्यपि वचनबलादेवेत्यपि कश्चित्। न चैवं कृष्यार्जितधने निषिद्धप्रतिग्रहार्ज्जितधने च ब्राह्मणस्य स्वत्वं न स्याच्छास्त्रविरोधादिति वाच्यम्, उपायत्वे कृष्यादीनां शास्त्रविरोधेऽपि तदुपात्तधनविनियोगस्याविगानात्। तस्यैव च लक्षणप्रवेशात्। चौर्ये तूपायत्व इव विनियोगोऽपि विगानमेव। यत्तु कृष्यादौ नोपायत्वविगानमपि तु तस्मिन्नुपाये ब्राह्मणादिविषयत्वविगानमित्यविगीतोपायत्वमेव तत्रेति। तन्न। तथा सत्यनन्यगतिकतायां मातापित्रादिभरणार्थं नित्यदेवपूजार्थं च भक्ष्यपुष्पचौर्य्ययोरपि शास्त्राविरोधादन्यत्रापि चौर्य्यादिना स्वत्वापत्तेः। एवं भुजात्कृते राज्ञः स्वत्वबोधनादन्यत्रापि तत्र स्वत्वापत्तेः। न च शास्त्रविरो-

(१) तत्स्वरूपामि। (२) ननियतत्वाद्।

न्यायलीलावतीप्रकाशः

इत्यनेन स्थावरे स्त्रीणां भोग एव स्वत्वं न दानविक्रययोः

अत्रोच्यते। स्वत्वं न यथेष्टविनियोगविषयत्वं स्वं निरु ज्यते न तु विनियोगात् स्वं भवति विनियोगात् पूर्वं साधारण्यापत्तेः विनियोगाविषये स्वेऽप्यस्वत्वापत्तेश्च। किन्तु यद्व्यतिरेकेण यथेष्टवि नियोगासम्भवनिश्चयः शास्त्राविरुद्धतदुपायविषयत्वरूपं यथेष्टविनि योगयोग्यत्वं स्वत्वम्। तदुपायानां क्रयप्रतिग्रहादीनां क्रियात्वेनास्थिर त्वेऽपि तद्विषयत्वं स्थिरमेव। ज्ञाननिवृत्ताविव तद्विषयत्वम्। अत एव

न्यायलीलावतीप्रकाशविवृतिः

धस्य परस्वं नाददीतेत्यादिप्रतियोगिप्रसिद्ध्यधीनग्रहस्य स्वत्वनिरू प्यत्वादात्माश्रय इति वाच्यम्, शास्त्रविरोधस्य न कलञ्जमित्यादावेव प्रसिद्धेः। 'सप्त वित्तागमा धर्म्या' इत्यनने धर्म्यत्वस्य शा(स्त्रा?) निषिद्धत्वाच्चेति वदन्ति। वस्तुतः क्रयादिध्वंस एव स्वत्वं क्रया दीनां च शास्त्राविरुद्धविनियोगोपायत्वमेवानुगमकं क्रयादिसमा नकालीनविरोध्युपायप्रतियोगिक्रयावदनादिसंसर्गाभावसाहित्यं च विशेषणम्। एवं च क्रयजन्यत्वव्यवहारस्तत्रोपपद्यते। विक्रयनाश्य त्वव्यवहारस्तु पूर्व(१)एवोपपाद्यः। न (च?) क्रयकाले स्वत्वाना पत्तिः सम्प्रदानस्वीकारविशिष्टस्यैव दात्रिच्छाविशेषस्य तवापि स्वत्वतया यथा न प्रथमक्षणे स्वत्वं तथा द्वितीयक्षणेऽपीति सम्भ वात्। अतिरिक्तस्वत्ववादिमतेऽपि क्रयोत्पत्तिकाले(२)असम्भवाच्च

केचित्तु क्रयकालेऽपि स्वत्वमित्यभिसन्धिना शास्त्राविरुद्धविनि योगप्रयोजकीभूतोपायप्रागभावविरोधिमत्त्वं स्वत्वम्। विरोधी च क्रयादिस्तद्ध्वंसः। क्रयादिजन्यव्यवहारश्चैकदेशान्वयादेवेत्याहुः न च क्रीत्वा विक्रीते तदापत्तिः विरोध्युपायान्तरानन्तरितत्वस्य(३) विशेषणत्वात्। न चार्जितेषु प्रमीतस्य स्वत्वापत्तिस्तत्र मरणस्यैव पुत्रादिविनियोगप्रयोजकस्य व्यवधायकत्वादिति दिक्।

ज्ञाननिवृत्ताविति। यथातीतस्यैव ज्ञानस्य व्यवहारप्रयोजकत्व मेवमुक्तक्रमेणातीतस्य (४) क्रयादेर्विनियोगप्रयोजकत्वमित्यर्थः। भ वत्वेवं तथाप्यस्मन्मतेऽपि नाननुगमो विनियोगोपायत्वेनैवानुगमादि

(१) 'पूर्ववदेवोप'।

(२) ले च तदसम्भ। (३) 'विरोध्युपायानन्तरितत्वस्य'। (४) तस्यैव क्र

न्यायलीलावतीप्रकाशः

न तद्वत्पदार्थान्तरत्वम् । न च क्रयादीनामननुगमाद्योग्यताननुगमो लक्षणदोषः, स्वत्वस्य पदार्थान्तरत्वेऽपि तद्धेतूनां क्रयादीनामननुगमात् तत्कारणताभङ्गापत्तेः । अथ तृणारणिमणिन्यायेन कारणताग्रहः । एवं तर्हि क्रयादीनां प्रत्येकमेवोपायत्वे गृहीते उपायविषयत्वं योग्यतालक्षणमक्षुण्णमेव । अवश्यं हि क्रयादीनां स्वत्वोपायत्वेन प्रसिद्धानामेकरूपकार्यं प्रति मिथोऽव्यभिचारिणां कारणतानिर्वाहकानुगमार्थं शास्त्राविरुद्धत्वाद्येकमनुगमकं वक्तव्यम् । ननु यदि क्रयाद्युपायापगमेऽपि तद्विषयताऽस्ति तदा यत् क्रीत्वा विक्रीतं गृहीत्वा दत्तं वा तत्रापि तद्विषयताऽस्त्येवेति तत्र विक्रेत्रादिस्वत्वमपि व्यवह्रियेत । न । न ह्युपायविषयत्वमात्रं योग्यता किन्तु स्वव्यतिरेकप्रयुक्तयथेष्टविनियोगासम्भवनिश्चयसहकृतम् । तत्र च न पूर्वक्रयव्यतिरेकप्रयुक्तो विनियोगासम्भवः, किन्तु विक्रयदत्तत्वप्रयुक्त एव । पदार्थान्तरत्वपक्षेऽपि दूषणसाम्यात् । सा च योग्यता क्रयाज्जायते विक्रयान्निवर्तते । एका योग्यता नश्यत्यन्या त्वन्यस्योत्पद्यते । तत्किं योग्यता नाना । कः संशयः । तत्तद्व्यतिरेकप्रयुक्तत्वविशेषितविनियोगासम्भवनिश्चयभेदेन योग्यताभेदात् । प्रतियोगितावच्छेदकविशेषिताभावभेदवत् । अत एव चौरादिना गृहीते पूर्वस्वामिनः स्वत्वं वर्त्तत एव । न हि पूर्वागमव्यतिरेकप्रयुक्तस्तत्र विनियोगासम्भवः किं तु

न्यायलीलावतीप्रकाशविवृतिः

त्याह—एवमिति । वस्तुतोऽवान्तरवैचित्र्येऽपि यद्विशेषयोरित्यादिन्यायेनासंति बाधके सामान्यसामग्री त्वयाऽपि वाच्यैवेत्यनुगम उभयसाधारण एवेत्याह—अवश्यं हीति । शास्त्रेति । शास्त्राविरुद्धविनियोगप्रयोजकत्वमित्यर्थः, यथाश्रुते ब्राह्मणकृष्यादावव्याप्तेः । अत एवेति । यत एव यावदनादिसंसर्गाभावघटितं स्वत्वमित्यर्थः । न हि पूर्वागमेति । येन पूर्वस्वामिनः शास्त्राविरुद्धविनियोगोपायविषयता पूर्वनिरुक्ता चौरगृहीते न स्यादिति शेषः(१) । किं त्विति । तच्च शास्त्राविरुद्धमेवेति शास्त्राविरोधिविरोध्यनन्तरितत्वमपि पूर्वोपाय इति भावः । तथा च विक्रीत(२)वैषम्यमिति बोध्यम् । यत्तु तत्र चौरस्यैव स्वत्वमन्यथा

---

(१) ति भावः ।

(२) 'विक्रीतेति द्वितीयपुस्तके नास्ति ।

नन्वेवमपि न्यून(१)त्वम् । तथाहि क्षित्यादिकं द्रव्यत्वाद्

न्यायलीलावतीकण्ठाभरणम्

एवमपीति । अतिरिक्तपदार्थनिषेधेऽपि न्यूनत्वं विभागस्य दुष्टत्वमित्यर्थः । तथा च पृथिव्यादिनवकसङ्ग्राहकैकरूपाभावे न्यूनत्वात् दुष्टत्वं द्रव्यगुणकर्म्मणां मिथोभेदकाभावे चाधिकत्वात् दुष्टत्वमिति भावः । क्षित्यादिकमिति । क्षित्यादिनवकं गुणादिपञ्चभ्यो द्रव्यत्वात्

न्यायलीलावतीप्रकाशः

चौरादिगृहीतत्वप्रयुक्तः, औपादानिकस्वत्वविषयेऽपि तथैव । आरण्यककुशादिष्वप्युपादानव्यतिरेकप्रयुक्त एव हि विनियोगासम्भवनिश्चयः । तेनौपादानिकं स्वत्वमुच्यते । इति संक्षेपः ।

"विरोधात्" व्याहतत्वादित्यर्थः(२) । तथा हीति । द्रव्यादित्रिकं मिथोव्यावर्त्तकधर्माभावान्न मिथोभेद इति न पदार्थषट्कविभागः समीचीनः । किं च पृथिव्यादिरूपाद्युपग्राहकद्रव्यत्वगुणत्वाभावेन तेषां प्रत्येकं वक्तव्यतायां द्रव्यादिपदस्यैकैकपृथिव्यादिपरत्वे न्यून

न्यायलीलावतीप्रकाशविवृतिः

द्रव्यमस्वामिविक्रीतं पूर्वस्वामी समाप्नुयादित्यत्र पूर्वपदवैयर्थ्यापत्तिरत एव च हिरण्यादौ विनियोगो निःशङ्कमन्यथाचौरग्रहणमूलकत्वशङ्कया निःशङ्कप्रवृत्त्यनुपपत्तिरिति मतम् । तन्न, तत्रोत्तरस्वामिपदस्य यथोक्तविनियोक्तृमात्रपरतया पूर्वपदस्य सार्थकत्वान्निःशङ्कप्रवृत्त्यनुरोधेन च चौरादिग्रहणा(३)मूलकत्वनिश्चयाभावसहकृतस्य क्रयादेर्विनियोगोपायत्वस्वीकारादन्यथा चोरस्वत्वनिश्चितवाक्येऽस्वामिपदानन्वयापत्तेरविगानेन शिष्टानां चौरगृहीतक्रियापत्तेश्चेति दिक् ।

हेत्वाभासलक्षणो विरोधो नात्रेत्यत आह—व्याहतत्वादिति । न्यूनतेति(४) । मूले विभजनीयस्य विभागस्य चेत्यर्थ इति प्रथमं विभजनीयस्य न्यूनतामाह—द्रव्यादित्रिक इति । विभागस्य न्यूनतामाह—किं चे

(१) 'नता । त'

(२) उक्तरूपचतुष्टयवहिर्भावस्य विरुद्धत्वात् षट्पदार्थातिरेकित्वं साधयितुं न शक्यते, उक्तरूपचतुष्टयान्तर्भावस्यावश्यकत्वादिति 'उक्तरूरूपचतुष्टये'त्यादिमूलस्य शिरोमणिकृता व्याख्या।

(३) ०हणमूल० । (४) आदर्श'प्रकाश'ग्रन्थे एतत्प्रतीकानुसारी पाठो नास्ति ।

गुणवत्त्वाद्वा भिद्यते । नाद्यः । तदसिद्धेः । अनुगतमतेः सन्दिग्धत्वात् । स्वातन्त्र्यधीरियं(१)मिति चेन्न, शब्देऽपि तत्सत्त्वात्। समवेतत्वेनैव(२) चावयविनामवसायात् । नापि गुणवत्त्वात् । सङ्ख्यादिसाधारण्यात् रूपादिषु गुणत्वस्यैकस्यासिद्धेः । भिन्न-

न्यायलीलावतीकण्ठाभरणम्

गुणवत्त्वाद्वा भिद्यते इत्यर्थः । तदसिद्धेरिति । द्रव्यत्वजातेरसिद्धेरित्यर्थः। ननु द्रव्याकारानुगतमतिरेव द्रव्यत्वे प्रमाणमित्यत आह—अनुगतेति । न हि लौकिकपरीक्षकसाधारणी द्रव्याकारानुगतमतिराकाशादावित्यर्थः । परविप्रतिपत्त्या वा सन्देहस्तत्रेति वार्थः । ननु स्वतन्त्रमिदमित्यनेनाकारेण या धीः सैव द्रव्याकारानुगतधीरिति शङ्कते—स्वातन्त्र्येति । स्वाश्रयानुपरक्तधीः स्वातन्त्र्यधीः शब्दसाधारणी न द्रव्यत्वव्यवस्थापिकेत्याह—शब्देऽपीति । उक्तस्वातन्त्र्यधीर्द्रव्ये नास्त्येवेत्याह—समवेतत्वेनेति । द्वितीयं भेदकं निराकरोति—नापीति । संख्यादीति। संख्यादिना गुणेन गुणकर्म्मणोरपि गुणवत्त्वमित्यर्थः । भवति हि चतुर्विंशतिर्गुणाः पञ्च कर्म्माणीति धीरिति भावः । यदि रूपादिचतु-

न्यायलीलावतीप्रकाशः

त्वम्, पृथिव्यादीनां चैकत्वे व्याघात इत्यर्थः । 'अनुगतमति'र्द्रव्यमिति प्रत्यक्षमित्यर्थः । सन्दिग्धत्वाद् वादिविप्रतिपत्तेरिति शेषः । 'इयं'द्रव्येष्वनुगतमतिरित्यर्थः । स्वातन्त्र्यधीर्यद्याश्रयत्वबुद्धिस्तदा गुणादिसाधारण्यम् । अथाश्रयाभानेऽपि भासमानत्वं तदा शब्दगन्धादिसाधारण्यमित्याह—शब्देऽपीति । अथानाश्रितत्वबुद्धिः सा तदा वैपरीत्यमेवेत्याह—समवेतत्वेनैवेति । संख्यादीति । रूपादौ संख्यादेः संख्यादौ च

न्यायलीलावतीप्रकाशविवृतिः

ति । ननु पृथिव्याद्येकमेवेति न तत्रोपसंग्राहकापेक्षेत्यत आह—पृथिव्यादीनां चेति । व्याघातो नवत्वव्याघातः । प्रत्यक्षसिद्धवैधर्म्यव्याघातो वा । अथाश्रयेति । एतादृशवस्तुविषयक(३ मित्यर्थोऽन्यथा बुद्धिविकल्पा-

(१) स्वातन्त्र्यधीविषयत्वरूपमेव हि द्रव्यत्वं भेदकमभिमतमित्यर्थः ।

(२) इदं च समवायप्रत्यक्षतावादिमतेन । इतरथा वृत्तिमत्त्वेनेत्यर्थः ।

(३) ०यकत्वमि० ।

रूपस्य भागासिद्धेः। आदित्वस्यैव प्रतिक्षेपात्। अन्यतमत्वस्य

न्यायलीलावतीकण्ठाभरणम्

विंशतौ गुणत्वमेकमनुगतं स्यात्तदा क्षित्यादिनवकभेदकं गुणवत्त्वं भवेत्तदेव तु नास्तीत्याह—रूपादिष्विति। ननु गुणत्वासिद्धौ गुणवत्त्वमनुगमकं माऽस्तु रूपवत्त्वमेव भेदकमास्त्वित्यत आह—भिन्नरूपस्येति। आकाशादीनामपि पक्षत्वे तत्र रूपवत्त्वादेरसिद्धेरित्यर्थः। ननु रूपवत्तादिकं भागासिद्धं न तु रूपादिमत्त्वमपि कस्यचित् द्रव्यस्य किंचिद्गुणसत्त्वादित्यत आह—आदित्वस्येति। आदिपदं प्रकारवाचि प्रकारश्च गुणत्वमेव स्यात्, तच्च गुणत्वस्यैवासिद्धेरिति पूर्वोक्तेनैव प्रतिक्षिप्तमित्यर्थः। ननुं रूपवत्त्वरसवत्त्वाद्यन्यतमत्वमेव द्रव्यभेदकं स्यादत आह—अन्यतमत्वस्येति। आदिपदमनिर्द्धारितमेकमाह। तथा च रू-

न्यायलीलावतीप्रकाशः

पृथक्त्वादेः सत्त्वेन गुणवत्त्वस्य साधारण्याद्विरुद्धत्वादित्यर्थः। किंच गुणवत्त्वं गुणत्वाश्रयवत्त्वं वा रूपवत्त्वमिति प्रत्येकं वा रूपादिमत्त्वं वा रूपाद्यन्यतमवत्त्वं वा। आद्ये रूपादिष्विति। रूपादौ गुणाकारानुगतप्रतीत्यभावादित्यर्थः। द्वितीये भिन्नेति। तृतीये आदित्वस्येति। प्रकारवाचिन आदिशब्दस्यानुगतधर्माभावेनाप्रवृत्तेः प्रत्येकगुणपरत्वे तस्य भागासिद्धेः समुदायपरत्वे चासिद्धेरित्यर्थः। चतुर्थे अन्यतमेति। अन्यतमत्वं हि समभिव्याहृतपदार्थमध्ये किंचिद्वृत्तित्वे सति किंचिदवृत्तिधर्मवत्त्वम्। तथा च भागासिद्धिः पक्षीकृतेषु नवसु

न्यायलीलावतीप्रकाशविवृतिः

सङ्गत्यापत्तेः। सपक्षघटितं साधारण्यं केवलव्यतिरेकिणि न सम्भवतीत्यत आह—विरुद्धत्वादिति। साध्यानवगतसहचारः साध्याभावसहचारी विरुद्ध इति मतमाश्रित्येदमुक्तम्। किं चिदिति। सत्यन्तं स्वरूपनिर्वचनपरम्। यद्यपि एतावता तादृशधर्म एवान्यतमत्वं तथापि तादृशो धर्मो यत्र (१)तत्त्वं तादृशधर्म्मवत्त्वमेवाभिमतमत एव क्वचित्पाठोऽपि तथेति भावः। तादृशो धर्मो रूपत्वादिः संयोगत्वादिर्वा। अन्त्ये व्यर्थविशेषणतैवेति प्रथमे भागासिद्धिमाह-तथा चेति।

---

(१) यस्य।

न्यायलीलावतीकण्ठाभरणम्

पवत्त्वरसवत्त्वादावेव पर्य्यवस्येत, तच्च भागासिद्धमेवेत्यर्थः। नवा-नां समवायिकारणत्वेनैक्यमाशङ्क्य गुणकर्म्मणोरसमवायिकारणत्वे-

न्यायलीलावतीप्रकाशः

तेषामसत्त्वादित्यर्थः। यद्यपि भागासिद्धौ भागान्तरे साधनाभावात् साध्यसिद्ध्यभावस्य दूषकताबीजस्यात्राभावः, भागान्तरे साध्य-साधकस्य जलत्वादेः सत्त्वात्, न वा भागासिद्धिः पृथिव्याद्यन्या-न्यत्वस्य (१)विवक्षितत्वात्। तथापि पृथिव्यादिव्यक्तीनां प्रत्ये-कमुपस्थापयितुमशक्यत्वात् पृथिवीत्वादिना तत्तदुपस्थितिर्वाच्या सा च पृथिवीत्वाद्यसिद्धा न सम्भवति। [समवायीति। (२)] रूपादेः संख्यादिसमवायिकारणत्वे विरुद्धं(३) चेत्यभिसन्धिः [एकत्व इति।(२)]

न्यायलीलावतीप्रकाशविवृतिः

अन्यतमत्वमन्यान्यत्वं रूपादिनिष्ठमित्यपि व्यर्थविशेषणग्रस्तमेवेति नाशङ्कितम्। ननु नोक्तं दूषकताबीजमपि तूद्देश्यतल्लिङ्गकनवप-क्षकानुमितिप्रतिबन्धकत्वम्। अन्यथा हेत्वन्तरस्य साध्यसाधकस्य विद्यमानत्वेनास्यादोषत्वे व्यभिचारादेरप्यदोषत्वमित्यरुचेराह—न-वेति। स्वातन्त्र्येणैवायं हेतुरितरभेदसाधकत्वेनाशङ्कितो न तु गुण-वत्त्वविकल्पशेषत्वे। तथा सति रूपाद्यन्यान्यतमवत्त्वस्य शङ्कितुमु-चितत्वादिति ध्येयम्। ननु पृथिव्याद्यन्यान्यत्वमेव साध्यमिति साध्याविशेषः। न च पृथिवीत्वाद्यन्यान्यधर्मवत्त्वं हेतुरिति वाच्यम्, तथा (सति?) "पृथिव्यादिव्यक्तीना"मित्यग्रिमग्रन्थालग्नकतापत्ते-रिति। मैवम्। गुणादिप्रतियोगिकान्योन्याभावस्य साध्यत्वात्। अ-न्ये तु 'विवक्षितत्वा'दिति साध्यतावच्छेदकत्वेन विवक्षितत्वादिति नानुपपत्तिरिति वदन्ति।

रूपादेरिति। रूपादेः संख्यागुणयोगात् द्रव्यत्वावश्यकत्वे

---

(१) 'रूपाद्यन्यान्यत्वस्य' वि.।

(२) एतत्प्रतीकद्वयानुसारी पाठ आदर्शमूले न दृश्यते। परन्त्वत्र "समवायिकारणत्वेनैकत्वे—समवायिकारणत्वलक्षणैकरूपेण विभजने" इतिदीधितिग्रन्थदर्शनाच्च तत्पाठस्त्रुटित इत्यनुमीयते।

(३) विरुद्धं चात्र व्यभिचारित्वम्, तथा च द्रव्यं भिद्यते, समवायिकारणत्वादित्यत्र रूपादौ व्यभिचार इति भावः।

भागासिद्धेः। (१)असमवायिकारणत्वेन(२) गुणकर्मणोरस्त्यैकत्वे षडेवेति नियमानुपपत्तेः(३)। कार्याश्रयत्वं यज्जातिपुरस्कारात्तत्-

---

न्यायलीलावतीकण्ठाभरणम्

नैक्यमापाद्य विभागव्याघातमाह—समवायीति।(४)ननु कार्य्याश्रयत्वमाकस्मिकं स्यात् असत्येकस्मिन्नवच्छेदक इति यत्तदवच्छेदकं तद्द्रव्यत्वमित्याशङ्कते—कार्य्येति। अवच्छेदकं विनापि कार्य्याश्रयत्वं स्यात् अन्यथाऽकार्य्याश्रयत्वं गुणकर्म्मणोरेका जातिरवच्छिन्द्यात्। एवं

न्यायलीलावतीप्रकाशः

गुणादिव्यावर्त्तकैकजातिमत्त्व इत्यर्थः। असमवायिकारणत्वेनेति। एतच्चासमवायिकारणत्वेनैक्येऽपि गुणत्वकर्मत्वाभ्यामवान्तरभेदसम्भवान्न पदार्थत्वसाक्षाद्व्याप्योपाधीनामयं विभाग इत्यभिप्रेत्योक्तम्। षडेवेति। यद्यपि षडेवेतिनियमस्याधिकसंख्याव्यवच्छेदकत्वात् न्यूनत्वेऽपि नानुपपत्तिः, तथापि षडाश्रयो विभागः षट्त्वाभावेनाश्रयासिद्धः, अन्त्यावयविरूपादौ विनश्यदवस्थकर्मणि चासमवायिकारणत्वाभावात्। तेषामाधिक्येऽधिकसंख्याव्यवच्छेदोऽप्यनुपपन्न इत्यप्याहुः।

कार्याश्रयत्वमिति। आनन्त्यव्यभिचाराभ्यां व्यक्तौ तदसम्भवा-

न्यायलीलावतीप्रकाशविवृतिः

पृथिव्याद्यन्यान्यत्वमावश्यकमिति रूपादिभिन्नत्वसाध्यासत्त्वे व्यभिचारलक्षणविरोधदित्यर्थः। केचित्तु रूपाद्यन्यतमत्वमेव हेतुरस्त्वित्याशङ्कायामेवेयं फक्किका। तथा च रूपादावप्युक्तसाध्यासत्त्वादुक्तहेतुसत्त्वाच्च व्यभिचार इत्यर्थ इत्याहुः। क्वचित्तु समवायिकारणत्वेनेतिमूलधारणानन्तरमियं फक्किकेति क्रमस्तथा सति सुगमैव। तथापीति। एवकारस्याधिकव्यवच्छेदपरत्वेऽपि षडित्यस्यानुपपत्ति(५)रेवेति भावः। 'इत्यपी'त्यरुचौ। तद्बीजं तु तत्रापि स्वरूप-

---

(१) प्रकाशदीधितिधृतप्रतीकानुसारेणात्र कश्चित् पाठस्त्रुटित इत्यनुमीयते।

(२) असमवायिकारणवृत्तिसत्तान्यजातिमत्त्वमित्यर्थः। तेनात्मविशेषगुणानां नासंग्रहः।

(३) पदार्थानां पञ्चत्वेन षट्त्वायोगात्।

(४) एतत्प्रतीकानुसारी पाठ आदर्शमूले न दृश्यते।

(५) पत्तेरिति भा०।

द्रव्यत्वं भेदकमिति चेन्न, तां विनापि(१) तदुपपत्तेः । अ-
कार्यजात्याश्रयत्ववत्कारणत्वमसति बाधके सामान्य एव पर्यवस्य-
तीति चेन्न, स्पर्शसमवायिकारणतया क्षित्यादिषु प्रतिनियतसामा-
न्यापत्तेः । नापि गुणत्वं, तस्योपदेशं विनाऽप्रतीतेः । उपदेश-

न्यायलीलावतीकण्ठाभरणम्

द्रव्यादित्रयाणां जात्याश्रयत्वं जात्यन्तरेणावच्छिद्येतेत्याह —तद्विनेति।
ननु यथाङ्कुरकारणत्वं बीजत्वं तथा नवानां समवायिकारणत्वमपि
द्रव्यत्वं स्यादित्याह—कारणत्वमिति । शब्दकारणत्वं च नाकाशत्वं
जातिर्बाधकादित्यर्थः । एवं सति स्पर्शसमवायिकारणत्वं चतुर्षु
एका जातिः स्यादित्याह—स्पर्शेति । नवानां भेदकं निराकृत्य चतुर्विं-
शतेर्भेदकं निराचष्टे—नापीति । तस्येति । न हि गुणाकारानुगता मति-

न्यायलीलावतीप्रकाशः

दित्यर्थः । अकार्येति । आश्रयपदेन प्रत्येकमन्वयात् अकार्याश्र-
यत्ववत् जात्याश्रयत्ववदित्यर्थः । ननु कार्यसमवायिकारणताव-
च्छेदकतया नवस्वेको धर्मः, स च बाधकाभावाज्जातिः, आनन्त्य-
व्यभिचाराभ्यां व्यक्तौ तद्ग्रहाशक्यत्वादित्याह--कारणत्वमिति । एवं
पृथिव्यादिचतुर्षु स्पर्शसमवायिकारणतावच्छेदकत्वेनैका जातिः
स्यात् । अथ यदर्थं यत्कल्प्यते तस्यान्यथासिद्धिरेव कल्पनीये बा-
धिका तदा द्रव्यत्वेऽपि तुल्यमित्याह—स्पर्शेति । ननु माभूद्द्रव्यत्वं
गुणादितो भेदकं गुणत्वाद्द्रव्यादेर्गुणानां भेदसिद्धौ गुणवत्त्वमुपा
धिर्द्रव्याणामितरभेदसाधकं स्यादित्याशङ्क्य गुणत्वासिद्धिमाह—
नापीति । रूपादिषु गुणाकारानुगता धीर्नास्तीत्युपदेशसहकृतेन्द्रिय-

न्यायलीलावतीप्रकाशविवृतिः

योग्यताऽस्त्येव फलाभावस्तु जनयितव्यस्य समवायिकारणाभावादि-
ति व्यर्थविशेषणत्वादाह—अकार्येति । जातेरकार्यत्वेऽपि गोवृषन्याये-
न पृथगुपन्यासः । तत्तत्स्पर्शं (२) प्रति पृथिवीत्वादिनैव कारणत्व-
मिति यदि तदा तत्तद्गुणं प्रत्यपि तुल्यमिति शङ्कोत्तराभ्यामाह—अथेति।
गुणत्वखण्डनमर्थान्तरमत आह —नन्विति । पूर्वं जात्युपाधिसाधा-

---

(१) 'तद्विनापि'। (२) उद्भूतस्पर्शं ।

श्च गुणशब्दसङ्केतो, न चासौ व्यक्तिषु शक्यो, व्यभिचारात्। नाप्युपलक्षणान्तरेण। कर्मव्यावृत्तेरशक्यत्वात्। तदन्यत्वस्यानपेक्षितव्यावृत्तिरूपत्वेन रसान्यत्ववदनादेयत्वादिति त्रयाणामेकीभावेन षडेव पदार्था इति चेन्न, कालाकाशादीनां संयोगवि-

---

न्यायलीलावतीकण्ठाभरणम्

रस्ति रूपादावित्यर्थः। ननूपदेशव्यङ्ग्यैवाऽस्तु सेत्यत आह—उपदेशश्चेति। यथा गन्धवती पृथिवीत्युपदेशो नियतधर्म्मपुरस्कारेण तथा प्रकृते न नियतो धर्म्म इत्यर्थः। ननु सामान्यवानगुणो गुण इत्यत्रान्योऽन्याश्रयोऽपि सामान्यवान् स्पर्शरहितो गुण इत्युपदेशः स्यादित्यत आह—कर्म्मेति। ननु कर्म्मान्यत्वेन विशेषितः स्यादयमत आह—तदन्यत्वस्येति। कर्म्मणो विपक्षत्वनिश्चय एव तदन्यत्वेन विशेषणमुचितम्। भूषणादिमते च कर्म्मणोऽपि गुणत्वेन विशेषणमिदमनुपपन्नं भवेदन्यथा रूपाद्यन्यत्वेनापि विशेषणं सुलभं स्यादित्यव्यवस्थितिरित्याह—अनादेयेति। त्रयाणां द्रव्यगुणकर्म्मणां परस्परव्यावर्त्तकधर्म्माभावेन एकीभावे चत्वार एव पदार्था इति विभागेऽधिकं दोषः। क्षित्यादिनवकरूपादिचतुर्विंशत्युत्क्षेपणादिपञ्चकेषु ग्राहकैकरूपाभावात् न्यूनो विभाग इत्युपसंहरति—इतीति।

दोषद्वयपरिहाराय नवानामेकमवच्छेदकं गुणादिभ्यो भेदकं सा-

न्यायलीलावतीप्रकाशः

ग्राह्यं तद् रत्नत्वव्याप्यजातिवदिति वाच्यम्, तत्राह—उपदेशश्चेति। ननु जातिमात्रसमवायित्वादिनाऽनुगतधर्मेण सङ्केतग्रहः स्यादित्यत आह—नापीति। न च कर्मान्यत्वेन तद्विशेषणीयम्, कर्मणो हि विपक्षत्वनिश्चय एव तद्व्यावृत्त्यर्थं विशेषणमुचितम्। न च कर्मगुणत्ववादिनस्तथा। यदि च स्वानपेक्षिततत्त्वमात्रेण तदन्यत्वं विशेषणं तदा परेण रसान्यत्वेनापि तद्विशेष्यं स्यादित्याह—तदन्यत्वस्येति।

न्यायलीलावतीप्रकाशविवृतिः

रण्येनैवानुगतगुणत्वमात्रखण्डनमिदानीं तु जातिरूपगुणत्वखण्डनमित्यपौनरुक्त्यम्। आदिपदेनैव दिशो लाभे बहुवचनमयुक्तं त्रिभा-

न्यायलीलावतीकण्ठाभरणम्

धयति—कालेति । संयोगजनकत्वेन विभागजनकत्वेन चेत्यर्थः । तथा कालाकाशादयः सत्तेतरजातिमन्तः संयोगजनकत्वात् विभागजनकत्वाद्वा कर्म्मवदिति विवक्षितम्। संयोगविभागाभ्यां च न व्यभिचारस्तत्रापि साध्यसत्त्वात्। द्रव्यत्वव्याप्यजात्याऽन्यथासिद्धिर्माभूदिति कालाद्युपादानं तेषां तज्जात्यभावात् । न च त्रितयमात्रनिष्ठा सा स्यादिति वाच्यम्, पृथिव्यादिषट्त्वं कालादिनिष्ठसत्ताव्याप्यजाति-

न्यायलीलावतीप्रकाशः

कालाकाशादीनामिति । कालादित्रयं सत्ताव्याप्यजातिमत् संयोगजनकत्वात् कर्म्मवत् । न च त्रितयमात्रवृत्तिजातिसिद्धावर्थान्तरं पृथिव्यादिषट्कं कालवृत्तिसत्ताव्याप्यजातिमत् संयोगजनकत्वादाकाशवदिति पृथिव्यादिवृत्तित्वसिद्धेः । ननु विभुत्वमत्रोपाधिः । न च काले सा जातिर्न कालमात्रवृत्तिरेकव्यक्तिकसामान्याभावात् तदन्यत्र वर्त्तमाना मूर्त्तेऽपि सम्भाव्यत इति साध्याव्यापकत्वमिति वाच्यम्, तथापि सन्दिग्धोपाधेरपरीहारात् । मैवम् । विभुत्वमनवच्छिन्नपरिमाणवत्त्वं तत्रानवच्छिन्नपदं पक्षमात्रव्यावर्त्तकमिति

न्यायलीलावतीप्रकाशविवृतिः

गपदवैयर्थ्यं चेत्यन्यथा प्रयोगमाह—कालादीति । व्याप्यपदं भिन्नपरम् । यद्यपि कालाकाशयोरेका परा चात्मादिकमादाय दिशीत्यर्थान्तरं तथापि लाघवादेकजातिसिद्धिरिति भावः । पृथिव्यादीति। पृथिवीत्वादिनाऽर्थान्तरं माभूदिति कालवृत्तीति । न चैवमपि सत्तवृत्तिजात्याऽर्थान्तरम् , जातिसङ्करभयेन तदप्रसङ्गात् । अत एव पूर्वानुमानमपि साध्यप्रसिद्ध्यर्थमुपयोगि । क्वचित्तु कालवृत्तिपदं नास्ति तत्र च कालादित्रयवृत्तिजातेः पूर्वानुमानेन सिद्धौ लाघवादेकामेव तां विषयीकरोतीयमनुमितिर्न तु पृथिवीत्वादिकं गौरवात् । नापि षड्वृत्तिजातिमक्लृप्तत्वादित्याशयः । सत्तयाऽर्थान्तरवारणाय व्याप्यपदम् । तच्च भिन्नपरम्। गुणवत्त्वादिनाऽर्थान्तरवारणाय जातिपदम्। संयोगेति । (१)समवायित्वादित्यर्थो यथाश्रुते विभागध्वंसे व्यभिचारात् । समवायिकारणत्वविवक्षायां च कारणपदवैयर्थ्यादिति भावः । विभुत्वमिति । व्यभिचारोन्नायकश्चायमुपाधिः । सत्प्रतिपक्षतायां

(१) संयोगसमवायित्वा० ।

न्यायलीलावतीकण्ठाभरणम्

मत् समवायिकारणत्वात् आकाशवदिति तत्रापि तत्सिद्धेः सम-वायिकारणतावच्छेदकजात्यनङ्गीकारे नियामकमन्तरेण तदाकस्मिकं स्यादिति विपक्षबाधकं चात्र द्रष्टव्यम्। पूर्व्वोक्तां प्रतिवन्दीं निराचष्टे-

न्यायलीलावतीप्रकाशः

पक्षेतरत्वात् तथाप्यर्थान्तरत्वम्। पृथिव्यादिष्वेका जातिरस्ति न वेति विवादो न तु कालादित्रयमेकजातिमन्न वेति। द्रव्यत्वापरजात्यनु-मितिश्चैवं स्यात्। किं च संयोगजनकत्वं यदि तत्समवायिकारणत्वं तदा दृष्टान्तासिद्धिः तदसमवायिकारणत्वं चापक्षधर्मः। तन्निमित्त-कारणत्वं च दृष्टान्ते नास्ति, अभावे अनैकान्तिकत्वं च।

अत्राहुः। द्रव्यमिति प्रत्यक्षं तावत्सर्वसिद्धम्। तच्च यथा पृथिव्यां तथा जलतेजसोरपीत्युभयसाधारणं निमित्तं सिद्ध्यति। तच्च न पृथिवीत्वादिकं एकदेशवृत्तित्वात्। न गुरुत्वादिकं तदज्ञानेऽपि धूमादौ द्रव्यमितिप्रत्यक्षात्। तच्च जातिः, तथात्वे बाधकाभावात्। इत्यतीन्द्रियेऽपि वाय्वाकाशादौ संयोगजनकत्वात्तदनुमेयम्। न चाप्रयोजकत्वं संयोगमात्रं कार्यमात्रमेव वा प्रति समवायिकारणं किं चिद्वाच्यम्। अन्यथा कारणान्तरप्र-

न्यायलीलावतीप्रकाशविवृतिः

व्यतिरेके भागासिद्धेरित्यवधेयम्। पक्षेतरत्वादिति। पक्षमात्रव्यावर्त्त-कविशेषणवत्त्वादित्यर्थः। न चैवमप्यतीन्द्रियत्वादिकमुपाधिः स्यादेवेति वाच्यम्, संयोगसमवायिकारणतावच्छेदकत्वेन नवस्वेकजातिसिद्धौ विपक्षबाधकेन हेतोः साध्यव्याप्यतयोपाधेः साध्याव्यापकत्वादिति भावः। कालादित्रयमित्यत्र दोषमाशङ्कते—तथापीति। अर्थान्तरत्वमप्राप्तकालत्वम्। प्रकृतानुकूलतया नार्थान्तरमत आह—द्रव्यत्वापरेति। तादृशजातौ विपक्षबाधकाभावान्न तत्सिद्धिरित्यरुचेराह—किं चेति। कारणत्वसामान्यमेव हेतुरित्यरुचेराह—अभाव इति। (संयो?) ग (प्राग?) भावे संयोगध्वंसे चेत्यर्थः। एवं चोपजीव्यानुमानखण्डने षट्पक्षकानुमानमप्यर्थतः खण्डितमिति भावः। संयोगजनकत्वात् संयोगसमवायित्वादित्यर्थः। कार्यमात्रमिति। यद्यपि नवपक्षकानुमानादप्युक्तहेतुना लाघवादेका जातिरेव सिद्ध्यति उद्देश्यप्रतीत्यसिद्ध्या च नांशतः सिद्धसाधनं तथापि सम्भवप्राचु-

भागजनकत्वेन कर्म्मवत्सत्तेतरजातिमत्त्वासिद्धेः । पृथिव्यादौ तु स्पर्शसमवायिकारणत्वनिर्वाहकजातिस्वीकारे जातिसङ्करप्रसङ्गो बाधकः । न च कर्मत्वमसिद्धम् । चलतीत्यनुगताकारवेदनवेद्य-

---

न्यायलीलावतीकण्ठाभरणम्

पृथिव्यादा विति । स्पर्शसमवायिकारणतावच्छेदिका जातिर्जलपरमाणौ नास्ति जलत्वञ्च तेजसि नास्ति जलावयविनि द्वयमप्यस्तीति साङ्कर्य्यमित्यर्थः ।वस्तुतः स्पर्शत्वं नित्यानित्यवृत्तितया कार्य्यतावच्छेदकं न भवति । कार्य्यस्पर्शमाश्रित्येदमुक्तम् । ननु कर्म्म दृष्टान्तीकृतं न च तत्र सत्तेतरजातिमत्त्वं साध्यमिति साध्यवैकल्यमत आह—न चेति। चलतीत्यनुगतमतिः सर्व्वसाक्षिणीत्यर्थः । अनुगतधीवेद्यत्वं जातित्वव्यापकं तन्निवृत्तौ द्रव्यत्वं जातिर्न स्यादित्याशङ्क्य रक्तत्वे व्यभिचारान्नेयं

न्यायलीलावतीप्रकाशः

पि न स्यात्, तद्धर्मत्वात्तन्निमित्तासमवायिकारणयोः । तच्चानुगतधर्मावच्छेद्यमन्यथा व्यभिचारादकारणत्वापत्तेः । स चानुगत औत्सर्गिको जातिरूप इति विपक्षे बाधकात् स्पर्शसमवायिकारणत्वावच्छेदकत्वेनापादितां जातिं दूषयति—पृथिव्यादाविति । जलत्वं विना सा जातिः पृथिव्यादौ तां विना जलत्वं परमाणावित्येकत्र जलावयविनि परस्परात्यन्ताभावसमा(ना?)धिकरणजात्योः सङ्करापत्तिरित्यर्थः । न च जलपरमाणावपि सा जातिरस्त्येव समानाधिकरणस्पर्शस्य च प्रतिबन्धकत्वान्न तत्र स्पर्शोत्पत्तिः, स्वरूपयोग्ये च कार्यानवश्यम्भा-

न्यायलीलावतीप्रकाशविवृतिः

र्यैणेदमुक्तम् । कार्याकार्येत्यत्र कार्यपदं सम्पातायातम् । ननु नित्यस्येत्यादिव्याप्तेरङ्गीकारे जलत्वमपि न परमाणौ, अनित्यस्नेहसमवायिकारणतावच्छेदकतयैव तत्सिद्धेः। व्याप्त्यनङ्गीकारे(१)स्पर्शसमवायिकारणतावच्छेदकजातिरपीत्युभयथापि न साङ्कर्यम् ।न च नानाजातीयद्रव्यवृत्ति[२]गुणत्वावान्तरजातेर्न द्रव्यवृत्तिजातिनियामकत्वमन्यथा वेगसमवायिकारण [तावच्छेदक ?] तयापि पञ्चस्वेक-

---

(१) तदनङ्गीकारे । (२) गुणवृत्तीत्यधिकः पाठो द्वितीयपुस्तके ।

न्यायलीलावतीप्रकाशः

वादिति वाच्यम्, नित्यस्य स्वरूपयोग्यस्य सहकारियोग्यतावश्य-म्भावात्। एतच्च स्पर्शत्वस्य कार्य्याकार्य्यवृत्तित्वेन कार्यतानवच्छे-दकत्वेऽप्यनित्यस्पर्शत्वस्य तथात्वमभ्युपेत्योक्तम्। चलतीतिप्र(त्य?)-क्षसिद्धं कर्मत्वमित्यर्थः। न च संयोगविभागाश्रयत्वमात्रालम्बनेयं

न्यायलीलावतीप्रकाशविवृतिः

जात्यापत्तेरिति वाच्यम्, संयोगसमवायिकारणतावच्छेदकतया द्रव्यत्वसिद्धिविरोधात्। न च कतिपयद्रव्यगुणवृत्तिजातावयं निय-मोऽप्रयोजकत्वात्। वेगप्रयोजकजातेरपि पूर्वपक्षिणापादनीयत्वेनो-क्तस्याबाधकत्वात्। मैवम्, जलसमवायिकारणतावच्छेदकत्वेनै-व जलत्वसिद्धावुक्तव्याप्तिस्वीकारे जातिसङ्करात्। न चैवमपि वे-गप्रयोजकतया पञ्चस्वेकजातौ न बाधकमिति वाच्यम्, फलोपहि-तमात्रवृत्तिधर्मस्यैव गुणत्वसाक्षाद्व्याप्यजात्यवच्छिन्नकार्यताप्रतियो-गिकसमवायिकारणतावच्छेदकत्वमितिनियमादुत्पन्नविनष्टे च वेगा-नुत्पत्त्या पञ्चसाधारणजात्यसिद्धेः। संस्कारत्वं च (न?) जाति-रिति वेगत्वस्य साक्षाद्व्याप्यत्वात्। दैशिकपरत्वप्रयोजकतयाऽपि नोक्तजातिसिद्धिरुभयपरत्वसाधारणैकजात्यभावे तस्यापि साक्षाद्व्या-प्यत्वात् क्षणद्वयावस्थायिनि असमवायिकारणविलम्बेन परत्वानु-पपत्तेश्चोक्तनियमस्यैव निरोधात्(१)। यदि चोक्तनियमेऽप्रयोजक-त्वं तदाऽस्तु पञ्चसाधारणी जातिः कर्मसमवायिकारणतावच्छेदकत-याऽपि तस्या आवश्यकत्वात्।

केचित्तु जलशब्दशक्यतावच्छेदकत्वेन जलत्वसिद्धौ स्पर्श-प्रयोजकजातौ सङ्कर इति वदन्ति। मिश्रास्तु। द्रव्यानुगतबुद्धेरेव द्रव्यत्वं सिद्धयति उपाध्यननुसन्धानेऽपि तथाप्रतीतेः। स्पर्श-वत्त्वप्रतीतिस्तु नोपाध्यननुसन्धाने येन तयाऽपि जातिराक्षिप्येत इति वदन्ति। तत्रेदं चिन्त्यम्। एवमपि कारणतावच्छेदकतया चतुःसाधारणजातौ बाधकानभिधाने उक्तबाधकानुसरणे आकरो-क्तसाधकमेव किमिति परित्यक्तमिति।

(१) व विरोधात्।

त्वात् । न चानुगतबुद्धिगम्या जातिस्तदपायाद् व्यावर्तते । गृहीत-समयस्य रत्नतत्त्ववद्धानात्(१) । प्रतारणैवेय(२)मिति चेत् ? न, रत्नशास्त्रेऽपि प्रतारणापत्तेः । तदार्षमिति चेत्तुल्यम् । न चेदेव-

—— ——

न्यायलीलावतीकण्ठाभरणम्

व्याप्तिरिति परिहरति—न चेति । एषेति । उपदेशसहकृतेन्द्रियग्राह्य-ता जातेरिति प्रतारणेत्यर्थः । आर्षमिति । ऋषिप्रणीतमित्यर्थः । यद्यपि ऋषिप्रणीतत्वादेव यदि विश्वासस्तदा युक्तिशास्त्रत्वविरोधस्तथापि प्रणयनप्रयोजिकाया युक्तेर्ऋषिणापि स्वप्रामाण्यदर्शनाय दर्शनीय-त्वादिति भावः । द्रव्यत्वसाधकानुमाने विपक्षबाधकमाह—न चेदेव-मिति । समवायिकारणता यद्येकव्यक्तिमात्रनिष्ठा स्यात्तदा व्यक्त्य-

न्यायलीलावतीप्रकाशः

प्रतीतिः श्येनसंयोगविभागवति स्थाणावपि तदापत्तेः । द्रव्याकारा-नुगतबुद्ध्यभावमभ्युपेत्याह—न चेति । गृहीतसमयस्येति । वस्तुत उपदेशं विनापि रत्नविशेषेऽनुगतधीरस्त्येव शब्दविशेषवाच्यत्वं परमुपदेशात् प्रतीयते । न च येनानुगतरूपेणोपदेशस्तेनान्यथासिद्धिः, जातौ बा-धके सत्येवोपाधिस्वीकारात् । न चैवं वैपरीत्यमेव स्यात् उपाधेः क्लृप्तत्वादिति वाच्यम्, साक्षात्सम्बद्धधर्मस्यावच्छेदकत्वे बाधके सत्येव परम्परासम्बद्धस्य तथात्वाल्लाघवादिति भावः । समवायि-कारणत्वनियामकद्रव्यत्वाभावे व्यक्तितः कारणत्वनिरूपणे व्यभि-

न्यायलीलावतीप्रकाशविवृतिः

श्येनेति । श्येनविभागस्य स्वनाश्यसंयोगसमानकालत्वादिति भा-वः । न च विभागपूर्वसंयोगस्तदालम्बनं विभज्य संयुक्ते श्येने सति तथाप्यतिप्रसङ्गात् । न च विभागाव्यवहितोत्तरवर्त्तिश्येनसंयोगस्त-था । एकदेशावच्छिन्नस्थाणुविभागानन्तरं तज्जनककर्मणैवापरदेशा-न्तरावच्छेदेन श्येनसंयोगवति स्थाणौ तथाप्यतिप्रसङ्गात् । संयोग-प्राक्कालिककर्मण एव विभागप्रत्यय इति वैपरीत्यस्यापि सुवचत्वाच्च । वस्तुतः कर्माभावे संयोगविभागयोरेवानुत्पत्तिरिति भावः । साक्षादिति ।

(१) द्रावात् । (२) 'णैवैषेति' ।

मेकव्यक्तिजनकत्वे व्यक्त्यन्तरे तद्बुद्धिविरहापत्तिः। भावे वा सर्वव्यक्तिष्वतिप्रसङ्गः। कतिपयव्यक्तिनिष्ठत्वं तु यदि जातिमन्तरेण तदा नियतानामेव व्यक्तीनां समानाकारविकल्पजननसामर्थ्यादेकजातीयताव्यवहारोऽस्त्विति जात्यपह्नवप्रसङ्गः। गुणत्वं च रूपादयो रूपत्वादिव्यतिरिक्ता(वा?)न्तरजातिमन्तः सामा-

---

न्यायलीलावतीकण्ठाभरणम्

न्तरे तदभावापत्तिरित्यर्थः। ननु कतिपयव्यक्तीनामेवायं स्वभावो यत्ता एव समवायिकारणं न गुणादिव्यक्त्योऽपीत्यत आह—कतिपयेति। एवं सति सास्नादिव्यक्तीनामेव स्वाभाव्यात् गवाकारानुगतमतिजनकत्वे किं गोत्वादिनेत्यर्थः। गुणत्वं चेति। नासिद्धमिति शेषः। साधकमाह—रूपादय इति। रूपत्वादीति। रसत्वमधुरत्वाद्युपग्रहः। अ-

न्यायलीलावतीप्रकाशः

चारात् कारणत्वव्यवहारविलोप इत्याह—न चेदेवमिति। सर्वव्यक्तिष्विति। गुणकर्मादिष्वपीत्यर्थः। कतिपयेति। समवायिकारणत्वस्येति शेषः। समानाकारविकल्पो गौरित्याद्यनुगतव्यवहार इत्यर्थः। सामर्थ्यात् स्वभावादित्यर्थः। रूपत्वादीति। आदिपदाद् रूपत्वव्याप्यरसत्वतद्व्याप्यजातिपरिग्रहः। न च नानैव जातिः सिध्येत्, लाघवादेकस्या एव सिद्धेः। नापि द्रव्यकर्मवृत्तिः सा सिध्येदित्यर्थान्तरम्, सा जातिर्न-

न्यायलीलावतीप्रकाशविवृतिः

अन्यथा जातिमात्रापलापे तद्घटितोपाधेरपि विलयापत्तेरिति भावः। नापीति। द्रव्यवृत्तिः कर्म्मवृत्तिरिति प्रत्येकमाशङ्का। अन्यथा सत्तया सहान्यूनानतिरिक्तव्यक्तिकताप्रसङ्गेन शङ्कानुत्थानादित्यवधेयम्। सा जातिरिति। न चाप्रयोजकत्वं रूपमात्रवृत्तित्वस्य तत्राप्रयोजकत्वात् अन्यथा रूपवृत्तित्वेन सत्ताया अपि तद्वृत्तित्वापत्तेरिति वाच्यम्, संयोगविभागेत्यादिवक्ष्यमाणस्य चतुर्विंशतिगुणमात्रवृत्तिजातिसाधकस्य विपक्षबाधकत्वात्। द्रव्यगुणोभय (वृत्ति ?) जातौ च मानाभावात्। द्रव्यमात्रे (च) तादृशजातिसाधनं बाधितम्,

हरिदाससंस्कृतग्रन्थमालासमाख्य–

काशीसंस्कृतसीरीज़–पुस्तकमाला।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति। एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति। अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते। परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत्।

तत्र मुद्रितग्रन्थनामानि। **मूल्यम्।**

१ नलपाकः नलविरचितः। संपूर्णः (पाकशास्त्रम् १) रु० १—८

२ संक्षेपशारीरकम्। रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम्। (वेदान्तं १) रु० ८—०

३ वैशेषिकदर्शनम्। पं० श्रीढुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं१) रु० २—८

४ श्रीसूक्तम्। विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम्। (वैदिकं १) रु० ०—६

५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमासिपर्यन्तः। (व्याकरणं १) रु० ८—०

६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता। (न्यायं १) रु० ६—०

७ पञ्चीकरणम्। वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम्। (वेदान्तं २) रु० ०—८

८ अलङ्कारप्रदीपः। पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः। (काव्यं१) रु० ०—८

९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः। (कामशास्त्रं१) रु० ०—१२

१० जातकपारिजातः। श्रीवैद्यनाथशर्मणा विरचितः। (ज्यो० १) रु० २—०

११ पारस्करगृह्यसूत्रम्। कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम्। (कर्मकाण्डम् १) रु० ०—८

१२ पुरुषसूक्तम्। सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम्। (वैदिकं २) रु० १—

१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम्। (वेदान्तं ३)

१४ कुमारसंभवं महाकाव्यम्। महाकवि-श्रीकालिदासवि[illegible] वनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्ण[illegible]

१५ श्रुतबोधश्छन्दोग्रन्थः। आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६

१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्यायं २) रु० १—०

१७ पारस्करगृह्यसूत्रम्। काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम्। हरिहरभाष्यसहितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्ठोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च। (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम्-मधूसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः। (व्याकरणं २) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः। (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम्। हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम्। (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः—भाषाटीकासहितः (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्यटीका-श्रीवाचस्पतिमिश्रविरचिता। सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः। (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः। अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीय-[...]त्ति कृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः। (व्या०४) रु० ३—८

[...]तौ च [...]महाकाव्यम्। महाकविश्रीकालिदासविरचितम् पञ्चसर्गा-[...]म । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया [...]नकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च सम-(का[...]वि० २) रु० ०—१२

२९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नैरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम् । बहुखण्डितपाठान् परिपूर्य, सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । (काम० २) रु० ८—०

३० न्यायकुसुमाञ्जलिः । न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः । महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासितमहामहोपाध्यायवर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः । (न्यायं ४) रु० ६—०

३१ परिभाषेन्दुशेखरः । म० म० श्रीनागेशभट्टरचितः । म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या-तत्त्वप्रकाशिकया टीकया च सहितः । व्याकरणं ४) रु० ३—०

३२ अर्थसंग्रहः । पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः । (मीमां० २ रु० १—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम् । परमर्षिभारद्वाजोद्द्योतकरविरचितम् । महर्षि-गोतमादिचरितसङ्कलितबृहत्भूमिकासहितम् । (न्यायं ५) रु० ६—०

३४ शुक्लयजुर्वेदसंहिता । वाजसनेयिमाध्यन्दिनशाखीया । श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता । (भाग १-२-३-४) (वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता । श्रीसायणाचार्यविरचितभाष्यसहिता । १ अध्यायादारभ्य २० अध्यायपर्यन्ता । (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः । श्रीमदप्पयदीक्षितविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः । (वेदान्तं ४) रु० ६—०

३७ काशिका । श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः त्रिछद्दर-वामन-जयादित्यविनिर्मिता । (व्याकरणं ५) रु० ६—०

३८ प्राकृतप्रकाशः । भामहकृतः । श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः । टिप्पण्या च संयोजितः । (व्याकरणं ६) रु० १—४

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः । भाषानुवादसमेतः । (वेदान्तं ५) रु० २ - ०

४० श्रीनारदीयसंहिता । ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः । (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः-मेदिनीकारविरचितः । (कोशं १) रु० १—८

४२ मीमांसादर्शनम् । श्रीशबरस्वामिविरचितभाष्यसहितम् (भाग १—२) (मीमांसा ३) रु० १

४३ न्यायदर्शनम् । श्रीगोतममुनिप्रणीतम् । श्रीवात्स्यायनमुनिप्रण… भाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्य… तन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् (न्या…

४४ दानमयूखः। विद्वद्वरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं १) रु
४५ कालमाधवः। विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं २) रु
४६ भास्वती । श्रीमच्छतानन्दविरचिता । श्रीमातृप्रसाद (दैव
षण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाह
भाषाटीकाभ्यां सहिता । (ज्योतिषं ३) रु
४७ फक्किकाप्रकाशः। उपाध्यायोपाह्ववैयाकरणकेसरीविरुदाङ्कितमै
लेन्द्रदत्तशर्मविरचितः । पं० सीतारामशर्मकृतटिप्पण
विभूषितः। (व्याकरणं ७) रु०
४८ मिताक्षरा । श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या -श्री
त्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामि
कृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०६) रु
४९ काव्यप्रकाशः। श्रीमम्मटाचार्यविरचितः। पं० श्रीहरिशङ्करशर्म
मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः। (काव्य०४) रु
५० अधिकरणकौमुदी । श्रीदेवनाथठक्कुरकृता। (मीमां० ४) रु०
५१ रघुवंशमहाकाव्यम्। महाकविश्रीकालिदासविरचितम् महामहो
पाध्याय श्रीमल्लिनाथकृतसंजीवनीटीकयोपेतम् पं० श्रीकनक
लालठक्कुरेण विरचितया भावबोधनीटिप्पण्या समल
ङ्कृतम् सपूर्णम् । (काव्य ५) रु०
५२ काथबोधः। साजनीकृत टीकोपेतः। दत्तात्रेय सम्प्रदायाऽनुगतः। रु
५३ रसचन्द्रिका । पर्वतीय-पण्डितप्रवर-श्रीविश्वेश्वरपाण्डे
निर्मिता (काव्य० ६) रु०

पत्रादिप्रेषणस्थानम् —
जयकृष्णदास–हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस
विद्याविलास प्रेस, गोपालमंदिर के उत्तर
बनारस सिटी ।

महोदय
पाण्डुलिपियों
य में उप
का डिजी
नुसंधान
गया है।
सरकार
र्लभ / अप्रा
का प्रावधान
कृपया
01 से स

िर
तो च